ओषधिविशेषः, तद्वर्णनं यथा—'तक्राह्वा तक्रभक्षा तु तक्रपर्यायवाचिका । पञ्चाङ्गुली सिताभा स्यादेषा पञ्चाभिधा स्मृता ॥' इति ।
Dactyloctanium aegyptium Beauv.

तक्षकी (सो. नि. १.६७९)
नागिनी ।

तगरम् (च. सू. ४.१७)
शीतप्रशमनमहाकषाये ।
१. तगर ।
Delphimium brunonianum Royle.
२. अम्लद्रव्यविशेषः, अम्लगणे (अ. प्र. ९.१७)

तगरपादिका (चक्र. , च. सू. ३.२३)
नतम् (तगरम्) ।

तगरपादुकम् (भै. र. , पृ. २२८)
तगरपादिका ।

तण्डुलसाह्वयः (सु. उ. ४५.३१)
तण्डुलीयः (ड०) ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तण्डुलीयः (च. चि. १४.१२३)
गण्डीरकाख्यःइत्यरुणः। (अ. सू. ६.८३)
तण्डुलीयकः।

तण्डुलीयकः (च. सू. २७.८५)
चौलाइ।
Amaranthus spinosus Linn.

तनुत्वक् (भा. नि. २. ६६)
दारुसिता।

तन्त्रिका (ध. नि. १.३)
गुडूची।

तपनीयः (च. सू. २७.८)
शालिभेदः।

तमाखुः (यो. र., पृ. ६.१४)
तम्बाकू, तमाकू। Tobacco.
Nicotiana tabacum Linn.

तमालः (च.चि. २३.१९२)
Garcinia morella Desr.

तमालपत्रम् (च. चि. ३.२६७)
१. त्वक्पत्रम्।
Cinnamomum tamala Nees and Eberm.
२. तमाखुः। (सि. भे. ४.३८०)

तमाली (रा. नि. ३.३७)
१. ताली।
२. तमाखुः। (सि. भे. ४.३७९)

तरटी (रा. नि. ८.३२)
ओषधिविशेषः, तल्लक्षणं यथा—'तरटी तारटी तीव्रा बर्बुरा रक्तबीजका' इति।

तरवटम् (रा. नि. ४.३३)
आहुल्यम्।
तरवड़, आहुल, आवल।
Cassia auriculata Linn.

तरुः (रा. नि. २.१७)
वृक्षः।

तरुणी (च. सि. १०.३१)
पुष्पविशेषः। गुलाबमिति प्रियनिघण्टुः; आरामतरुणी नवमालिका वेति चक्रः। सांग्राहिकवस्तौ प्रयुक्ता।

तरूटः (च. सू. २७.११६)
कन्दविशेषः शाके प्रचलितः पार्वत्यप्रदेशे।
तरूड। Dioscorea belophylla Voight.

तर्कारी (च. वि. ८.१५१)
टेकार।
Clerodendrum phlomidis Linn. f.

तर्कारीद्वयम् (हे. अ. सू. १५.२१)
जयाद्वयम्।
तर्कारी, अग्निमन्थश्चेति।

तर्बूजम् (सि. भे. २.१५३)
तरबूज। water melon.
Citrullus vulgaris Schrad.

तलः (अ. सू. १५.१९)
तालः।

तलकोटः (सु. उ. ५१.४५)
अङ्कोटः (ड०)।

तलकोटकः (प्रि. नि. १.२१७)
अङ्कोटः।

तलफलः (नि. शे. २.२५३)
धत्तूरः।

तलिता (अ. प्र. ९.२)
वामनगणे।

तवक्षीरः (द्र. गु. वि. २, पृ. ७४२)
तेखुर।
Curcuma angustigolia Roxb.

तवक्षीरी (अ. सू. ३०.५१)
तुगाक्षीरी। तवक्षीरकन्दजा शर्करा।

तवराजशर्करा (कै. नि. १.१५८)
शर्करा विशेषः।

तस्करः (सु. चि. ३७.१७)
चोरकः।

तस्करस्नायुः (ध. नि. ४.२५)
काकनासा।

ताडकः (च. सू. २५.४९)
तालः। पत्रासवे।

ताडकपत्रिका (का. सं. ६.३४३)
तालपत्री।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तापसः (ध. नि. ६.८७)
नीवारः ।

तापसद्रुमः (रा. नि. ८.१७)
इङ्गुदी ।

तापसवृक्षः (सु. चि. १८.१३)
इङ्गुदः ।(ड०)

तापसेक्षुः (सु. सू. ४५. १४९)
इक्षुभेदः ।
A kind of sugarcane.

तापिच्छः (रा. नि. ९.१५)
तमालः ।

तामलकी (च. चि. ३.२१९)
भूम्यामलकी । (चक्र०)
भुंइ आँवला ।
Phyllanthus fraternus Liwebsternn.

ताम्बूलम् (च. सू. ५.७७)
पान । Betel.
Piper betle Linn.

ताम्बूलपर्णः (हा. १.१६.२९)
कन्दविशेषः ।
Dioscorea sp.

ताम्बूलवल्ली (श. च. १.१९८)
ताम्बूलम् ।

ताम्बूली (शा. सं. २.११.३६)
ताम्बूलम् ।

ताम्रकण्टकः (रा. नि. ८.३६)
खदिरविशेषः ।
खैर का भेद ।
A kind of catechu plant.

ताम्रचूडः (प्रि. नि. १.१८५)
कुकुन्दरः । ताम्रवर्णा चूड़ा शिरःस्थपुष्पगुच्छः यस्येति ।

ताम्रचूडपदिका (स. .यो. २.९३)
हंसपदी ।

ताम्रदुग्धी (रा. नि. ५.५३)
गोरक्षदुग्धी, दुग्धिकेत्यर्थः ।
दुद्धी ।

ताम्रपुष्पा (ध. नि. १.१२०)
पाटला, ताम्रवर्णपुष्पत्वात् ।

ताम्रपुष्पिका (कै. नि. १.३५)
पाटला ।

ताम्रपुष्पी (ध. नि. ३.९०)
धातकी ।

ताम्रफलः (ध. नि. १.२५२)
अङ्कोटः ।

ताम्रमूली (भा. प्र. चि. १.८४४)
दुरालभा (धन्वयासः) ।

ताम्रवल्लरी (र. चू. ८.२५)
रक्तस्नुह्यादिगणे रसौषधिविशेषः ।

ताम्रवल्लिका (र. च. ६.२८)
दिव्यौषधिः; तल्लक्षणं यथा— 'ताम्रवर्णलतापत्रपुष्पक्षीरसमन्विता । सा ताम्रवल्लिका प्रोक्ता रसलोहादिसाधिनी ॥' इति ।

ताम्रवल्ली (सु. शा. १०.५९)
१. मञ्जिष्ठा ।
२. ताली । (रा. नि. ३.३७)

तार्क्ष्यम् (सु. चि. ९.४६)
रसाञ्जनम् ।

तार्क्ष्यपच्यम् (स. यो. १.४७६)

तार्क्ष्यपच्यकम् (स. यो. ४.३१)

तार्क्ष्यप्रसवः (रा. नि. ९.१३)
अश्वकर्णः ।

तार्क्ष्यशैलम् (सु. चि. ९.१३)
रसाञ्जनम् (ध. नि. ३. १५८) ।

तालः (च. चि. ३.२५८)
ताड़ । Palmyra Palm.
Borassus flabellifer Linn.

तालकदम्बः (भे. सं. चि. ४.४७)

तालघडी (स. यो २.८१)

तालपत्रिका (अ. चि. ११.२८)
तालपत्री ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तालपत्री (सु. सू. ३७.३०)
कृष्णमुशली, तालवत्पत्रत्वात्। स्याह मुसली।
Curculigo orchioides Gaertn.

तालपर्णी (शा. सं. २.१२.१२८)
तालपत्री।

तालपादिका (सु. चि. ७.१८)
मुशली मूषकपुच्छाकारशिफा (ड०)।
तालपत्री।

तालप्रलम्बः (च. सू. २७.११५)
तालाङ्कुरः। (चक्र.)

तालमखान्नम् (प्रि. नि. ३.१०७)
कोकिलाक्षः, 'तालमखाना' इति लोके।

तालमस्तकम् (सु. सू. ४६.३१०)
तालवृक्षाग्रमज्जा (ड०)।
Borassus flabellifer Linn.

तालमूलिका (सु. चि. ७.१८)
तालमूली।

तालमूली (च. चि. १२.७५)
तालपत्री।

तालवृन्तः (सु. चि. २९.६)
१. सोमभेदः।
२. तालपत्रस्य वृन्तः।

तालशस्यम् (च. सू. २७.११६)
तालफलम्।

ताली (रा. नि. ३.३७)
वल्लीविशेषः।

तालीतलम् (सु. चि. १७.२५)
मुशलीमूलम्। (ड०)

तालीशम् (सु. सू. ३९.६)
तालीशपत्रम्। (ड०)
तालीसपत्र।
Abies webbiana Lindl.

तालीशपत्रम् (च.चि. ८.१४५)
तालीशम्।

तालीसम् (च. चि. २७.३०)
तालीशम्।

तालीसपत्रम् (च. चि. १७.१४३)
तालीशम्।

तिक्तः (अ. उ. २.२५)
किराततिक्तः।

तिक्तकः (अ. चि. १०.३४)
किराततिक्तः।

तिक्तकरोहिणी (ध. नि. १.३८)
कटुका।

तिक्तकर्कटिका (शा. नि. १०, ६.६६७)
कर्कटीभेदः।
तीती ककड़ी।
Bitter Cucumber.

तिक्तका (र. चू. ७.३)
रसौषधिविशेषः।

तिक्तकोशातकी (शा. सं. २.९.१८५)
कोशातकीविशेषः।

तिक्तजीवन्तिका (सो. नि. २.१६७)
तिक्तजीवन्ती, यथा—'तिक्तजीवन्तिका वातकफजीर्णज्वरापहा' इति।

तिक्तजीवन्ती (सो. नि. १.१९४)
जीवन्तीभेदः तिक्तः।

तिक्ततुण्डी (रा. नि. ३.३०२)
तिक्तबिम्बी।

तिक्तदुग्धा (ध. नि. १.२४०)
काञ्चनक्षीरी।

तिक्तदुग्धिका (अ. र. ४.४८)
स्वर्णक्षीरिणी।

तिक्तपटोलः (शा. सं. ३.११.२०)
पटोलभेदः।

तिक्तपटोलिका (सो. नि. २.१३२)
तिक्तपटोलः। यथा— 'तिक्ता पटोलिका सर्वदोषघ्नी ज्वरनाशनी। कुष्ठहृन् मूत्रकृच्छ्रघ्नी शीतलिकादि-रोगजित्॥' इति।

तिक्तबीजा (ध. नि. १.१७०)
कटुकालाबूः।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तिक्तमज्जा (अ. र. ४.९३)
इङ्गुदी ।

तिक्तरोहिणी (च. चि. ७.१३९)
कटुका ।

तिक्तला (च. र. ११.३)
शङ्खिनी ।

तिक्तवल्कला (सि. नि. ३७)
मूर्वा ।

तिक्तवल्ली (प.र. ७५)
मूर्वा ।

तिक्तशाकः (ध. नि. ५.११९)
वरुणः ।

तिक्ता (ध. नि. १.३८)
कटुका । 'मम द्वयं विस्मयमातनोति तिक्ताकषायो मुखतिक्तताघ्नः' इति वैद्यजीवने ।

तिक्ताद्वयम् (अ. सू. १५.४०)
एका कटुका, अन्या काकतिक्ता (अ. द.)

तिक्ता रोहिणी (च. चि. ३.२४१)
कटुका ।

तिक्तालाबुः (सु. सू. ४६.२१५)
तितलौकी, कड़वी लौकी । Bitter gourd.
Lagenaria siceraria (Mol.) Standl. (bitter variety).

तिक्तालाबुकम् (च. चि. ७.१०३)
तिक्तालाबुः ।

तिक्तेक्ष्वाकुः (च. चि. २३.२०६)
तिक्तालाबुः ।

तिक्तोत्तमः (अ. क. १.२४)
तिम्ब इत्यरुणः, पटोल इति हेमाद्रिः ।

तिण्डिशम् (अ. सू. ६.८७)
टिण्डा ।
Citrullus vulgaris var. fistulosus (Stocks) Duthie & Fuller.

तित्तिडीका (ध. नि. ५.३३)
अम्लिका ।

तिनिः (सु. चि. १६.४३)
तिनिशः ।

तिनिशः (च. चि. १.२.१२)
तिनिसा, सानन ।
Ougeinia dalbergioides Benth.

तिन्तिडीकम् (च. सू. २६.८४)
वृक्षाम्लम् । (ध. नि. २.९५)
Rhus parviflora Roxb.

तिन्दुकम् (च.सू. २७.१४७)
तेंद, गाभ ।
Diospyros peregrina (Gaertn.) Guerke.

तिन्दुकी (सु. सू. १२.२६)
तिन्दुकम् ।

तिन्द्रिणी (स. यो. १.१५०)
तिन्तिडी ।

तिमिरः (सु. उ. ५१.३२)
नखरागिपत्रः तिवरिया' इति प्रसिद्धः ।(ड०)
नृत्तकौण्डकः ।

तिरिगिच्छिः (म. नि. ५.६३)
कण्टकिकरञ्जः ।

तिरीटकः (ध. नि. ३.१७५)
लोध्रः ।

तिलः (च. सू. २.२५)
तिल । Sesame.
Sesamum indicum Linn.

तिलकः (अ. उ. ३८.३०)
तिलका ।
Wendlandia exerta DC.

तिलकण्टकः (अ. सं. सू. १८.२१)
अम्लस्कन्धे पठितः ।

तिलकन्दः (रा. नि. ७.५२)
कन्दविशेषः ।

तिलकन्दा (र. चू. ६.६१)
दिव्यौषधिविशेषः, यथा — 'तिलकन्देति विख्याता तिलवत्फलपत्रिणी । लता क्षीरवती सूतं निबध्नात्यातपे खरे ॥' इति ।

तिलपर्णकम् (ध. नि. ३.१)
चन्दनम् ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तिलपर्णिका (अ. हृ. सू. ६.७६)
तिलपर्णी ।

तिलपर्णी (च. चि. ३.२६७)
'हुलहुल' इति ख्याता (चक्र०) । हुलहुल, तिलवन ।
Cleome icosandra Linn.

तिलपुष्पः (कै. नि. १.२४२)
बिभीतकः ।

तिलपुष्पकः (म. नि. १.२८)
बिभीतकः ।

तिलपेजः (नि.शे. ६.३९८)
षण्ढतिलः ।

तिल्वकः (सु. सू. ३८.२९)
रोध्राकारो बृहत्पत्रो रक्तत्वक्को वैरेचनिकः । (ड०)
थेल्का ।
Viburnum nervosum D. Don.

तिष्यफला (श. च. १.७६)
आमलकी । तिष्यनक्षत्रे फलशालिनी ।

तीक्ष्णम् (अ. हृ. चि. ५.५४)
मरिचम् ।

तीक्ष्णकम् (अ. हृ. शा. १.८८)
मरिचम् ।

तीक्ष्णकण्टका (अ. प्र. ९.३६)
शाकविशेषः ।

तीक्ष्णगन्धः (ध. नि. ९४)
शिग्रुः ।

तीक्ष्णगन्धा (सु. उ. २३.४)
शोभाञ्जनकः ।(ड०)

तीक्ष्णगन्धिका (प्रि. नि. ३.४५)
वचा ।

तीक्ष्णतण्डुला (ध. नि. २.७३)
पिप्पली ।

तीक्ष्णतैलम् (च. द. ५५.१०८)
सार्षपतैलम् ।

तीक्ष्णपत्रः (ध. नि. २.४२)
तुम्बुरुः ।

तीक्ष्णपत्रकम् (सि. भे. ४.११)
पोदीना ।

तीक्ष्णपत्री (सि. भे. ४.५०१)
तमाखुः ।

तीक्ष्णपर्णः (भै. र, पृ. ९९)
शिग्रुः ।

तीक्ष्णफलः (ध. नि. २.४२)
तुम्बुरुः ।

तीक्ष्णवल्कः (ध. नि. २.४२)
तुम्बुरुः ।

तीनीलम् (अ. प्र. ९.३३)

तुगा (सु. उ. ५२.१७)
वंशरोचना ।

तुगाक्षीरी (च. चि. १.१.६८)
वांशी (सि. नि. ८३), वंशरोचना ।

तुगाख्या (सु. उ. ४५.३२)
वंशरोचना ।

तुङ्गः (च. सू. ३.२६)
पुंनागः । (चक्र०)

तुङ्गद्रुमः (सं. यो. ५.३.९)
नारिकेलः ।

तुटिः (अ. सं. उ. १६.७४)
त्रुटिः । सूक्ष्मैला ।

तुण्डिका (ध. नि. १.२०२)
बिम्बी ।

तुण्डिकेरम् (सु. उ. ४८.२७)
तुण्डिकेरी वनकार्पासी, तस्याः फलम् । (ड०)

तुण्डिकेरफला (ध. नि. १.२०२)
बिम्बी ।

तुण्डिकेरी (रा. नि. २३.३६)
१. तुण्डिका (बिम्बी) ।
२. वनकार्पासी ।

तुण्डी (ध. नि. १.२०२)
बिम्बी ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तुण्डीरम् (हा. १.१६.२३)
बिम्बीफलम् ।

तुत्था (ध. नि. १.२३२)
नीलिनी ।

तुन्नकम् (भे. सं. सू. २८.४८)
वितुन्नकम् (धान्यकम्) ।

तुम्बम् (अ. हृ. सू. ६.८४)
अलाबुः । (हे०)

तुम्बरकः (अ. प्र. ,.५८)
तुम्बुरुः ।

तुम्बरपत्रिका (अ. द., अ. सू. १५.३०)
सरसी ।

तुम्बिनी (सो. नि. १.२१२)
अलाबूः ।

तुम्बी (च. चि. २६.१५)
अलाबूः ।

तुम्बुरु (अ. हृ. उ. १८.१७)
धनीयकाकृति वणिग्द्रव्यम् (शि.)
धान्यकात् स्थूलो धान्यकविशेषो वणिग्द्रव्यम् ।
(नि., च. द. ४.६७)
तुंबुल, नेपाली धनियां ।
Xanthoxylum alatum Roxb.

तुरगी (ध. नि. १.२७२)
अश्वगन्धा ।

तुरङ्गगन्धा (सु. उ. ४१.४१)
अश्वगन्धा ।

तुरङ्गी (भे. सं. सि. ७.१४)
अश्वगन्धा ।

तुरटिः (स. यो. ४.२५)
त्रुटिः (एला) ।

तुरुष्कः (च. चि. २८.१५३)
शिलारस । Liquid Storax.
Liquidamber orientalis Miller.

तुलसी (अ. सं. उ. ६.३८)
तुलसी । Holy Basil.
Ocimum sanctum Linn.

तुलसीयुग्मम् (शा. सं. २.१२.५२)
श्वेता कृष्णा च तुलसी ।

तुवरः (च. चि. ३०.१२४)
१. तुवरकः ।
२. कषायः । (भा. नि. १.१९)

तुवरकः (सु. सू. ४५.१२२)
पश्चिमार्णवतीरजातमाहुः, तदुक्तम्— 'पत्रैस्तु केशराकारैः कपित्थसदृशैः फलैः । वृक्षस्तुवरको नाम पश्चिमार्णवतीरजः ॥' इति ।(ड०)
चालमोगरा ।
Hydnocarpus laurifolia (Dennst.) Sleumer.

तुवरवल्ली (र. चू. ८.१६)
रसौषधिविशेषः ।

तुवरी (ध. नि. ६.९३)
आढकी ।

तुषः (नि. शे. ६.४०१)
धान्यत्वक् ।
धान्यों का छिलका, भूसी ।
Husk.

तुषम् (ध. नि. ३.३१)
कर्पूरः ।

तुषाम्बु (र. चू. ७.३)
रसौषधिविशेषः ।

तुहिनः (ध. नि. ३.३१)
कर्पूरः ।

तूणिः (ध. नि. ३.१८)
तूणी ।

तूणी (ध. नि. ३.१९)
वृक्षविशेषः ।
तून ।
Cedrela toona Roxb.

तूदम् (च. सू. २७.१३२)
तूत, शहतूत । Mulberry.
Morus alba Linn.

तूर्णकः (च. सू. २७.८)
शालिविशेषः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शालि चावल का भेद ।
A kind of Śāli rice.

तूलफलः (रा. नि. १०.२६)
अर्कः । तूलसहितं फलं यस्य सः ।

तूलवृक्षः (रा. नि. ८.२११)
शाल्मलिः । तूलयोनिः वृक्षः ।

तूलिनी (भा. नि. ६.५४)
शाल्मलिः ।

तृणकम् (च. द. ५०.१२५)
गन्धतृणम् (शि.)

तृणकुङ्कुमम् (रा. नि. १२.२३)
कुङ्कुमविशेषः ।

तृणज्योतिः (र. चू. ८.२४)
रक्तस्नुह्यादिगणे रसौषधिविशेषः ।

तृणधान्यम् (रा. नि. १६.१३९)
१. नीवारः ।
२. क्षुद्रधान्यम्—'नीवारश्यामाकादीनि ।
(अ. द., अ. चि. १२.११)

तृणधान्यकम् (म. पा. १०.२)
कंग्वादि ।

तृणपञ्चमूलम् (च. चि. २२.३०)
शरादिपञ्चमूलम्—'शेरक्षुदर्भकाशानां शालीनां मूलमेव च' इति चरकोक्तम् (च. चि. १.१.४४) । सुश्रुते तु—'कुशकाशनलदर्भकाण्डेक्षुका' इति. (सु. सू. ३८.७५) । परिभाषाप्रदीपे (३.१५८) पुनः 'कुशः काशः शरो दर्भ इक्षुश्चैव तृणोद्भवम्' इति ।

तृणपञ्चमूली (अ. हृ. क. ४.१२)
तृणपञ्चमूलम् ।

तृणाबीजः (ध. नि. ६.८८)
श्यामाकः ।

तृणमूली (सू. क. ६.२१)
केतकी ।

तृणराजः (ध. नि. ५.६८)
तालः ।

तृणरास्ना (ध. नि. १.३९८)
रास्नाविशेषः ।

तृणशुण्ठः (ध. नि. १.८३)
गुण्ठः ।

तृणशूनी (पा०) (सु. क. ६.२१)
केतकी । (ड०)

तृणशून्यम् (च. सू. २५.४९)
केतकी (चक्र.) । फलासवे ।

तृणाख्यः (शा. नि. ३, पृ. २८२)
तृणविशेषः ।

तृणाख्यपञ्चकम् (अ. हृ. चि. १४.६३)
तृणपञ्चमूलम् ।

तृणाख्यपञ्चमूलम् (अ. हृ. चि. ११.६)
तृणपञ्चमूलम् ।

तृणाद्यम् (रा. नि. ८.५३)
तृणविशेषः ।

तेकराजः (स. यो. ३.४९)
भृङ्गराजः ।

तेजनी (सि. नि. ३७)
मूर्वा ।

तेजपत्रम् (शि., च. द. ६.९०)
पत्रम् ।

तेजःफलः (रा. नि. ११.१७)
तुम्बुरुविशेषः ।
Xanthoxylum sp.

तेजिनी (सो. नि. २.२४६)
तेजोह्वा ।

तेजोमन्थः (शा. नि. ३, पृ. २०३)
अग्निमन्थः ।

तेजोवती (च. वि. ८.१४८)
तुम्बुरुवृक्षः ।

तेजोवृक्षः (ड०, सु. सू. ३८.१०)
अग्निमन्थः । क्षुद्राग्निमन्थ इति राजनिघण्टुः (९.१३८)

तेजोह्वा (च. चि. ८.१३७)
तेजोवती ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तैरिणी (रा. नि. ४.१५)
तेरड ।
Impatiens balsamina Linn.

तैलम् (च. सू. १३.१३)
१. स्नेहविशेषः ।
२. मूलजविषम् । (च. चि. २३.१२)

तैलकन्दः (रा. नि. ७.५१)
१. कन्दविशेषः रसकर्मणि प्रयुक्तः ।
२. वत्सनाभः । (प्रि. नि. ३.१९४)

तैलकिट्टम् (रा. नि. १६.६)
पिण्याकः ।

तैलपर्णः (द्र. गु. वि. २, पृ. ३११)
युकेलिप्टस ।
Eucalyptus globulus Labill.

तैलफलानि (च. सू. ३.१८)
तैलयोनिफलान्येरण्डफलतिलादीनि (चक्र) ।

तैलवर्गः (र. चू. ९.१५)
तिलातसीकुसुम्भानां निम्बस्य करजस्य च । राज्याः सिद्धार्थकस्यापि गुञ्जाकङ्गुणिबीजयोः । मधूकस्य च तैलैश्च तैलवर्गो रसे हितः ॥' इति ।

तोक्मः (कै. नि. ३.३६)
'तोक्मस्तु हरितो यवः' ।
हरा जौ ।
Green barley.

तोदनम् (च. सू. २७.१४२)
धन्वनभेदः । (चक्र)

तोदपर्णी (सु. सू. ४६.२१)
कुधान्यविशेषः ।

तोदरिः (सि. भे. २.१०५)
तोदरी । Pepper grass.
Lepidium iberis Linn.

तोयम् (सु. क. २.५१)
बालकम् । (ड०)

तोयदः (अ. चि. १२.७)
मुस्तः ।

तोयपर्णी (च. सू. २७.१७)
कुधान्यविशेषः ।

तोयप्रसादनफलः (ड., सु. सू. ४२.११)
कतकः, तत्फलस्य जलप्रसादकत्वात् ।

तोयबद्धम् (अ. प्र. ९.६१)
पौष्टिकगणे ओषधिविशेषः ।

तोयवल्लिका (रा. नि. ३.४५)
अमृतस्रवा ।

तोयश्यामाकः (ड., सु. सू. ४६.२१)
श्यामाकः । 'श्यामाकशब्देन तोयश्यामाक उच्यते' इति ।

तोरी (अ. प्र. ४.५१)
तुवरी ।

त्रपुषम् (च. चि. २६.५२)
वल्लीफलविशेषः ।
खीरा । Cucumber.
Cucumis sativus Linn.

त्रपुषी (सु. उ. ४७.३३)
त्रपुषवल्ली ।

त्रपुसम् (च. सू. २७.१११)
त्रपुषम् ।

त्रायन्तिका (च. चि. २९.५८)
त्रायमाणा ।

त्रायन्तिकादिगणः (चि. क. ५३)
पित्तकफामयघ्नो गणः ।

त्रायन्ती (च. चि. १२.५३)
त्रायमाणा ।

त्रायमाणा (च. वि. ८.१४३)
कडू । Indian gentian.
Gentiana kurroo Royle.

त्रायमाणाख्यः (सु. चि. ३८.१०६)
त्रायमाणा ।

त्रिकटः (च. द. २६.७०)
गोक्षुरः ।

त्रिकटु (च. चि. २३.४१)
त्रयाणां कटुद्रव्याणां शुण्ठीपिप्पलीमरिचानां समाहारः । धन्वन्तरिनिघण्टौ (७.६) यथा—'पिप्पली मरिचं शुण्ठी त्रयमेतद् विमिश्रितम् । त्रिकटु त्र्यूषणं व्योषं कटुत्रयमिहोच्यते ॥' इति ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्रिकटुकम् (च. चि. १५.१७७)
त्रिकटु ।

त्रिकण्टकः (ध. नि. १.१०३)
गोक्षुरः ।

त्रिकण्टकाद्यः (अ. हृ. चि. १२.२)
त्रिकण्टकाद्यो भल्लातकान्तो गणः वातकफजे प्रमेहे प्रशस्तः (अ. हृ. चि. १२.१७-१८) ।

त्रिकत्रयम् (भै. र. पृ. ३४१)
त्रिकाणां त्रिफला—त्रिकटु — त्रिमदानां त्रयम् ।

त्रिकदम्बाः (रा. नि. ९.१७५)
धाराकदम्बः, धूलिकदम्बः भूमिकदम्बश्च ।

त्रिकार्षिकम् (ध. नि. ७.६)
'नागरातिविषामुस्ता त्रयमेतत् त्रिकार्षिकम्' इति ।

त्रिकोणफलम् (भा. नि. ८.९२)
शृङ्गाटकम् ।

त्रिगन्धम् (शा. सं. २.६.१५)
त्रिजातकम् ।

त्रिगन्धकम् (च. चि. १६.८९)
त्रिगन्धं च पत्रत्वगेला उच्यन्ते — 'त्रिगन्धं तु समाख्यातं त्वगेलापत्रकैः समैः । तदेव तु समाख्यातं चातुर्जातं सकेसरम् ॥' इति (चक्र.) । त्रिजातकम् ।

त्रिजातम् (सु. सू. ४४.११)
त्रिजातकम् ।

त्रिजातकम् (अ. हृ. सू. ६.१६०)
'त्वक्पत्रैलं त्रिजातकम्' इति । भावप्रकाशनिघण्टौ च — 'त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्' इति ।

त्रिदण्डी (र. चू. ८.२४)
रक्तस्नुह्यादिगणे रसौषधिविशेषः ।

त्रिदण्डीलता (र. चू. ६.४३)
दिव्यौषधिविशेषः, तल्लक्षणं यथा —
'सुपुष्पाऽतिलतोपेता रक्ता व्यस्तफलान्विता ।
रसबन्धविधौ प्रोक्ता त्रिदण्डीति कृताभिधा ॥' इति ।

त्रिदशाह्वः (च. चि. २८.१६२)
देवदारुः । (चक्र.)

त्रिधारा स्नुही (रा. नि. ८.३५८)
स्नुहीभेदः ।
तिधारा सेहुण्ड ।
Euphorbia antiquorum Linn.

त्रिपत्रकः (नि. शे. १.९१)
पलाशः ।

त्रिपत्रिका (सि. भे. ५.८)
'तिपत्ती' इति ख्यातौषधिः ।

त्रिपदा गायत्री (सु. चि. २९.२)
सोमभेदः ।

त्रिपर्णिका (सु. सू. ४६.२७४)
त्रिपर्णी ।

त्रिपर्णी (प. र. ३३)
१. सिंहपुच्छिका (पृश्निपर्णीविशेषः) ।
२. तिलकन्दः । (रा. नि. ७.५३)
३. ओषधिविशेषः । (र. चू. ८.५, २७)
४. हंसपादिका (चक्र., च. सू. २७.१००) ।

त्रिपादी (अ. सू. १५.९)
हंसपादी ।

त्रिपुटः (म. पा. १०.४०)
क्षुद्रखण्डिकः, त्रिपुटकलाय इत्यर्थः ।

त्रिपुटकः (सु. सू. ४६.२७)
त्रिपुटकलायः । खेसारी ।
Lathyrus sativus Linn.

त्रिपुटकलायः (चक्र., च. सू. २७.२८)
खण्डिकाः ।

त्रिपुटककलायः (ड. सु. सू. ४६.२७७)
कलायः ।

त्रिपुटा (ध. नि. १.२४५)
१. त्रिवृत् ।
२. स्थूलैला । (ध. नि. २.४६)
३. वार्षिकी । (ध. नि. ५.१३६)

त्रिपुरभण्टिका (भै. र., पृ. १०१)
बृहती ।

त्रिफलम् (च. द. ५३.२०)
त्रिफला । (शि.)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्रिफला (च. सू. २.९)

हरीतक्यामलकबिभीतकानीति त्रिफला। (सु. सू. ३८. ५६)

त्रिफलात्रयम् (स. यो. ५.९९)

धन्वन्तरिनिघण्टौ त्रिफलात्रयम्— त्रिफला, स्वादुत्रिफला सुगन्धित्रिफला चेति। त्रिफला ख्याता; स्वादुत्रिफला द्राक्षाखर्जूरकाश्मर्यफलै; सुगन्धि-त्रिफला च जातीफलैलालवङ्गैरिति (ध. नि. ७.१-५)

त्रिभण्डी (ध. नि. १.२४५)

त्रिवृत्।

त्रिमदः (भै. र., पृ. १२)

'विडङ्गमुस्तचित्रैश्च त्रिमदः परिकीर्तित' इति।

त्रिवर्गः (सु. चि. २.७३)

त्रयाणां द्रव्याणां वर्गः यथा त्रिफला, त्रिकटु, त्रिजातकम्।

त्रिवर्गत्रितयम् (अ. सं. सू. ३.१६)

त्रिफला, त्रिकटु त्रिजातकमिति त्रिवर्गाणां समाहारः।

त्रिवर्णकम् (सु. सू. ४४.७)

त्रिजातकम्।

त्रिवृत् (प्रि. नि. २.३७)

'मूलं रक्तनिभं त्रिपक्षसहितं काण्डं सितं रोमशं, वल्ली वेल्लति सुप्रभूतप्रसरा त्वारुह्य कञ्चिद् द्रुमम्॥ अन्तःकोरटपुष्पकं सितदलं वृत्तं फलं क्षुद्रकं, श्रेष्ठा सर्वविरेचनेषु सुखदा वैद्यैर्मता सा त्रिवृत्॥'

त्रिपक्षकाण्डत्वात् त्रिवृत्।

निसोत।

Turpeth, Indian Jalap. Operculina turpethum (Linn.) Silva Manso.

त्रिवृता (च. सू. २.९)

त्रिवृत्।

त्रिशूला (र. चू. ८.२२)

रक्तस्नुह्यादिगणोक्तः रसौषधिविशेषः।

त्रिशूली (र. चू. ६.४१)

दिव्यौषधिः, तल्लक्षणं यथा — 'त्रिशूलाकारपत्रा या शम्याकफलवत्फला। त्रिशूलीति समाख्याता विख्याता रसबन्धने॥' इति।

त्रिशृङ्गः (अ. र. १.६३)

शृङ्गाटकः।

त्रिसन्धिः (रा. नि. १०.३७)

पुष्पविशेषः।

त्रिसमम् (शा. नि. २३, पृ. ८३०)

हरीतकी च शुण्ठी च गुडं चैकत्र मिश्रितम्। त्रिसमं भाष्यते सुज्ञैरथवापि समत्रिकम्' इति।

त्रिसुगन्धि (अ. सं. सू. १२.४८)

त्रिजातकम्।

त्रिसुगन्धिकम् (सु. उ. ४७.४५)

त्रिजातकम्। (ड०)

त्रिसैर्यकम् (सो. नि. २.२५०)

सैरेयकत्रयम् - पीतरक्तनीलभेदात्।

त्रिसौगन्ध्यम् (च. चि. १२.५०)

त्रिजातकम्।

त्रिहिमम् (अ. हृ. सू. १२.१९)

चन्दनत्रयम् - मलयज-रक्तचन्दन-कालीयकभेदात्।

त्रुटिः (ध. नि. २.४४)

एला।

त्रुटिग्रन्थिकः (प्रि. नि. ३.१२९)

सोमकल्प; 'टुटगंठा' इति लोके।

त्रैलोक्यविजया (श. च. १.२६०)

भङ्गा।

त्रैष्टुभः (सु. चि. २९.७)

सोमभेदः।

त्र्यक्षम् (हे., अ. सू. ६.११९)

नारिकेलम्।

त्र्यम्बकफलः (रा. नि. ११.१०५)

नारिकेलः।

त्र्यष्टकः (च. द. ६३.४५)

राजिका। (शि.)

त्र्यस्रा (ध. नि. १.२४५)

१.त्रिवृत्।

२. वार्षिकी। (ध. नि. ५.१३६)

त्र्यूषणम् (च. सू. २३.१५)

त्रिकटु।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्वक् (च. सू. ३.२८)
१. वराङ्गम्— तज, दालचीनी।
Cinnamon bark.
Cinnamomum zeylanicum Breyn.
२. वल्कलम्। (रा. नि. २.२२)

त्वक्क्षीरी (च. चि. ११.१७)
वंशरोचना।

त्वक्पञ्चकम् (चि. क. ५७)
पञ्चवल्कलम्—वटोदुम्बराश्वत्थप्लक्षवेतसानां वल्कलम्।

त्वक्पत्रम् (मा. नि. २.६४)
१. त्वक्।
२. त्वक्पत्रिका। (ड०, सु. उ. ४७.३२)

त्वक्पत्रिका (ड०, सु. उ. ४७.३२)
तेजपत्रम्।

त्वक्पत्री (च. द. २१.२२७-२७१)
तेजपत्रम्। (शि., च. द. २२.२७१)

त्वक्सारः (सु. सू. २.१५)
वंशः।(ध. नि. ४.१३७)

त्वक्सुगन्धः (ध. नि. ५.२०)
नारङ्गः।

त्वच्यगणः (अ. प्र. ९.६)
तैलाद्यः स्पृक्कान्तो गणः त्वग्रोगे प्रशस्तः।

त्वरितकः (सु. सू. ४६.१२)
व्रीहिभेदः।

थ

थौणेयकम् (च. चि. १२.६५)
स्थौणेयकम्।

द

दक्षिणापथगाः गन्धाः (सु. चि. ४.२९)
चन्दनजातीफलकङ्कोललवङ्गादयः।
दक्षिण भारत के गन्धद्रव्य।
Aromatic plants of South.

दग्धा (रा. नि. ९.२८)
ओषधिविशेषः।

दण्डफलः (षो. हृ. ३.२९)
आरग्वधः। दण्डवत् फलमस्येति, अत एव 'सियरलाठी' इति लोके।

दण्डिनी (भै. र., पृ. ३४४)
दण्डोत्पला।

दण्डैरकः (च. क. १.२५)
गुन्द्राख्यगुल्मः, नलो वां। (चक्र.)

दण्डोत्पला (हृ. दी. ९७)
सहदेवी।

दद्रुघ्नः (ध. नि. ४.९)
चक्रमर्दः। दद्रुं चर्मरोगविशेषं हन्तीति।

दधित्थः (च. सू. २.१८)
कपित्थः (ध. नि. २.१०२)

दधिनाम (सु. उ. ५०.२७)
कपित्थम्। (ड०)

दधिपुष्पी (ध. नि. १.१४९)
काकाण्डी (कपिकच्छूविशेषः)।

दधिफलः (भा. नि. ५.६१)
कपित्थः, दधिवत् फलमज्जत्वात्।

दन्तधावनः (ध. नि. १.२५)
खदिरः, दन्तधावने प्रशस्तत्वात्।

दन्तरङ्गा (प्रि. नि. ४.९८)
चर्मिवृक्षः, 'दँतरंगा' इति लोकभाषायाम्।

दन्तशठः (च. सू. २६.११२)
जम्बीरः (ध. नि. ५.१४)। दन्तान् हर्षयत्यम्लत्वात्।

दन्ती (च. सू. २.९)
दन्ती।
Baliospermum montanum Muell-Arg.

दमः (ध. नि. ३.६५)
दमनकविशेषः।

दमनः (ध. नि. ३.६३)
दमनकः।

दमनकः (भा. नि. ४.६०)
दौना।
Artemisia vulgaris Linn.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दमनपर्पट (नि., च. द. १.८२)
पर्पटः ।

दरकृष्णः (सो. नि. ७.६९१)
आशालिमः ।

दर्दुरः (च. सू. २७.१४)
षष्टिकभेदः ।

दर्दुरदला (भा. प्र. चि. १.६८४)
मण्डूकपर्णी ।

दर्भः (च. सू. ४.१२)
दृभति बध्नाति मृदमिति ।
दाभ, उलू ।
Imperata cylindrica Beauv.

दलम् (ध. नि. २.५२)
पत्रम् ।

दलफलिका (सु. उ. ५१.२७)
तामलकी, भूम्यामलकीत्यर्थः । दलेषु पत्रेषु संलग्नानि फलानि यस्याम् ।

दलस्नुही (अ. र. ४.२५)
स्नुही ।

दश पुष्पाणि (स. यो. ५.६८)
यथा विष्णुक्रान्ता, दूर्वा, भृंगराजः, शक्रलता, वाराही, भद्रिका, उत्तम कन्यका, शशकर्णी, लक्ष्मणा, समंगा चेति ।

दशमूलम् (च. सू. ३.१९)
बिल्वः गंभारी, पाटला, अग्निमन्थः श्योनाकः (बृहत् पञ्चमूलम्) शालपर्णी, पृश्निपर्णी, बृहती, कण्टकारी, गोक्षुरः (लघु पञ्चमूलम्) इत्येतेषां द्रव्याणां गणो दशमूलमिति । तेषां मूलं, अभावे मूलत्वग् वा प्रयुज्यते । सुश्रुते च— 'त्रिकण्टकबृहतीद्वयपृथक्पर्ण्यो विदारिगन्धाचेति कनीयः (पञ्चमूलम्), बिल्वाग्निमन्थटिण्टुकपाटलाः काश्मरी चेति महत् (पञ्चमूलम्)..... अनयोर्दशमूलमुच्यते' इति ।
(सु. सू. ३८.६६-७०)

दशमूली (च. चि. ५.१४२)
दशमूलम् ।

दशाङ्गयोगः (सु. उ. ४९.२३)
'नागरं धान्यकं भार्ङ्गीमभयां सुरदारु च । वचां पर्पटकं मुस्तं भूतीकमथ कट्फलम्' इति । अथवा — 'हरिद्रां चित्रकं निम्बमुशीरातिविषे वचाम् । कुष्ठमिन्द्रयवान् मूर्वां पटोलं चापि' इति । अथवा— 'शालपर्णी पृश्निपर्णी बृहती कण्टकारिका । बलाश्वदंष्ट्राबिल्वानि पाठानागरधान्यकम्' इति ।

दशाङ्गी (अ. हृ. उ. ३.४५)
'वचा हिङ्गु विडङ्गानि सैन्धवं गजपिप्पली । पाठा प्रतिविषा व्योषं दशाङ्गी परिकीर्त्तिता ॥' इत्यरुणः । (शि.)

दशाङ्गुलम् (भा. नि. ५.४३)
खर्बूजम् ।

दहनः (अ. सू. १५.१)
चित्रकः ।

दाक्षिणात्यकः (ध. नि. ५.७४)
नारिकेलः । दक्षिणदेशे बहुलतयोपलम्भमानत्वात् ।

दाडिमः (च. सू. ४.१०)
अनार । Pomegranate.
Punica granatum Linn.

दाडिमपुष्पकः (ध. नि. ५.१३०)
रोहीतकः, दाडिमस्येव पुष्पत्वात् ।

दान्तः (ध. नि. ३.६४)
दमनकः ।

दारु (च. वि. ७.६४)
देवदारु (ध. नि. १.७६)

दारुकद्वयम् (का. सं., पृ. ३१४)
देवदारु वृद्धदारु चेति ।

दारुचीनी (अ. प्र. ४.२१)
दारुसिता ।

दारुचीर्णकम् (अ. प्र. ४.६)
दारुसिता ।

दारुनिशा (च. चि. ६.४०)
दारुहरिद्रा

दारुसिता (भा. नि. २.६६)
त्वक्, 'दालचीनी' इति लोके ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दारुहरिद्रा (च. सू. ४.९)
दारुहलदी । Indian berberry. Berberis aristata DC.

दार्विपत्रिका (चक्र., च. सू. २७.९७)
गोजिह्वा । दर्वीव पत्राणि यस्याः, अत एव 'दर्विका' इत्यमरः पठति । अन्यथा दार्व्याः दारुहरिद्राया इव पत्राणि यस्या इति ।

दार्वी (च. सू. ५.६३)
दारुहरिद्रा ।

दाली (रा. नि. ३.२४४)
देवदाली ।

दाशपुरम् (ध. नि. १.४३)
कैवर्तमुस्तम् ।

दासी (रा. नि. १०.४१७)
नीलाम्लानः (नीलसैरेयकः) ।

दासीकुरण्टकः (सु. सू. ३८.६)
बाणः (नीलसैरेयकः) ।

दाहागुरु (रा. नि. १२.४३)
अगरुविशेषः ।

दिनेशवल्ली (सं. यो. ५.४६)
वल्लीविशेषः, दिनेशवल्ल्यादितैले व्रणोपयुक्ते ।

दिर्जौधला (अ. प्र. ९.३३)
क्षुद्रधान्यविशेषः ।

दिव्यतेजा (ध. नि. ४.१००)
ब्राह्मी ।

दीप्यः (सु. उ. ४७.२४)
दीप्यकः अजमोदा, यवानीत्यपरे । (ड०)

दीप्यकः (च. चि. ५.६९)
.१. अजमोदा । (ध. नि. २.९८)
२. यवानी । (रा. नि. ६.१४०)

दीर्घकीलः (नि. शे. १.१३३)
अङ्कोटः । दीर्घाः कीलाः सन्त्यस्मिन्निति ।

दीर्घकीलकः (ध. नि. १.२५८)
अङ्कोटः ।

दीर्घदण्डकः (ध. नि. १.२९५)
एरण्डः, दीर्घपत्रवृन्तत्वात् ।

दीर्घपटोलिका (रा. नि. ७.७६)
पटोलभेदः ।

दीर्घपत्रः (सु. सू. ४५.१५१)
इक्षुभेदः ।

दीर्घपत्रा (ध. नि. ४.७५)
कदली ।

दीर्घफलः (ध. नि. १.२१९)
आरग्वधः ।

दीर्घफलकः (रा. नि. १०.१३)
अगस्त्यः ।

दीर्घमूलः (ध. नि. १.२२)
यवासः ।

दीर्घमूला (सु. सू. ३८.४४)
दुरालभा ।

दीर्घरोहिषकम् (रा. नि. ८.१०८)
दीर्घनालः कत्तृणभेदः ।

दीर्घवृन्तः (अ. नि. १४७)
अरलुः ।

दीर्घवृन्तकः (ध. नि. १.११५)
श्योनाकः ।

दीर्घशूकः (च. सू. २७.८)
शालिभेदः ।
शालि चावल का एक भेद ।
A kind of Śāli rice.

दीर्घस्कन्धः (ध. नि. ५.६८)
तालः ।

दुंदुभटी (सो. नि. १.६५८)

दुःस्पर्शः (च. चि. २४.१६६)
दुःस्पर्शा ।

दुःस्पर्शकः (च. चि. १४.१००)
दुःस्पर्शा ।

दुःस्पर्शा (च. चि. १५.१८६)
कण्टकित्वात् ।
धन्वयासकः ।(ध. नि. १.२०)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दुग्धकन्दगणः (अ. प्र. ४.२६)
'अश्वगन्धा च मुसली विदारी च शतावरी। क्षीरवाराहिका चेति दुग्धकन्दगणस्त्वयम् ॥' इति। वृष्यः स्तन्यजननश्चायं गणः।

दुग्धफेनी (रा. नि. ५.३४)
दुधली। Ccmmon dandelion.
Taraxum officinale Weber ex Wiggers.

दुग्धिका (च. चि. ८.१३१)
दुद्धी।
Euphorbia thymifolia Linn.

दुग्धिनीका (अ. उ. ३७.८६)
दुग्धिका।

दुग्धीका (च. चि. २१.८३)
दुग्धिका।

दुरारोहा (ध. नि. ५.५३)
खर्जूरी, विषमस्कन्धत्वात्।

दुरालभा (च.सू. ४.१४)
धन्वयासः।

दुरालम्भा (अ. हृ. क. २.२९)
धन्वयासः। (ध. नि. १.२०)

दुर्गन्धा (र. चू. ७.४)
रसौषधिविशेषः।

दुर्द्रुमः (ध. नि. ४.७१)
हरितपलाण्डुः।

दुर्मिलः (सो. नि. १.६५१)

दूर्वा (च. सू. ३.२७)
दूब।
Cynodon dactylon (Linn). Pers.
'दूरीकरोति सन्तापं तथा वारयति व्यथाम्। दूर्वेति नामधेयास्माद् यथा नाम तथा गुणः ॥' इति प्रियनिघण्टौ (३.७४)।

दूर्वासोमः (सु. चि. २९.५)
सोमभेदः।
A kind of Soma.

दूषकः (सु. सू. ४६.३)
शालिभेदः।
शालि चावल का एक भेद।
A kind of Śāli rice.

दृक्प्रसादा (ध. नि. ३.१५६)
चक्षुष्या, नेत्रप्रसादकत्वात्।

दृढवल्कः (रा. नि. ११.७१)
पूगः।

दृढसूत्रिका (श. च. १.१२५)
मूर्वा। दृढानि सूत्राणि यस्यामिति।
Having strong fibres.

दृषत्पुनर्नवा (सो. नि. २.२४९)
पुनर्नवाभेदः रक्तस्तम्भनः।

देवकाष्ठम् (सु. उ. १८.१००)
देवदारु।

देवकुसुमम् (ध. नि. ३.४१)
लवङ्गम्।

देवगन्धा (कै. नि. १.११०३)
आरामशीतला।

देवगंधारिका (सो. नि. १.६७५)

देवडङ्गरी (ग. नि. २.३०.८८)

देवतरुः (शा. सं. ३.११.१४१)
देवदारुः।

देवताडः (ध. नि. १.१७३)
जीमूतः।

देवताडकः (च. र. २.३)
जीमूतः।

देवदारु (च. सू. ३.२५)
देवस्थाने हिमालये संभूतं दारु तरुविशेषः।
देवदार। Deodar.
Cedrus deodara (Roxb.) Loud.

देवदाली (सु. सू. ३९.४)
जीमूतः (ध. नि. ४.५०)
Luffa echinata Roxb.

देवदालीत्रयम् (सो. नि. २.१८०)
'श्वेता रक्ता च पीता च देवदाल्यो गुणैः समाः' (१८१)

देवदुन्दुभिः (ध. नि. ४.५०)
तुलसी। दुन्दुभिवत् पुष्पमञ्जरीत्वात्।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

देवद्रुः (सो. नि. २.१४०)
देवदारुः ।

देवद्रोणी (रा. नि. ५.५०)
महाद्रोणा ।

देवधूपः (अ. सू. १५.४३)
सर्जरसः । (अ. द.)

देवनलः (अ. सं. सू. ३०.१०)
नलभेदः. महानल इति राजनिघण्टुः (८.२२५)

देवपुष्पी (च. द. २२.२६८)
लवङ्गम् ।

देवसर्षपः (कै. नि. १.९७६)
वक्रेन्दुकः शिरोविरेचनः ।

देवाह्वम् (अ. हृ. सू. १५.३५)
देवदारु ।

देवाह्वयः (अ. सू. १५.९)
देवदारुः ।

देवी (ध. नि. ३.६२)
स्पृक्का ।

दैत्या (ध. नि. ३.६७)
मुरा ।

दोडी (रा. नि. ४.४१)
जीवन्ती ।

द्रवणिका (क.का. ४.३२)
शाकविशेषः ।

द्रवन्ती (सु. सू. ३८.२९)
एरण्डसदृशफलपत्राऽल्पविटपः 'शम्बरी' इति लोके । (ड०)
जयपालः ।

द्रवरेची (षो. हृ. ३.१०८)
जयपालः ।

द्राक्षा (च. सू. ४.१०)
दाख । Grape.
Vitis vinifera Linn.

द्राक्षोत्तमा (च. चि. २०.३३)
गोस्तनी द्राक्षा । (चक्र.)

द्रामटी (स. यो. ३.३२)
द्राविडी ।

द्रावणी (र. चू. ८.२९)
कदल्यादिगणे रसौषधिविशेषः ।

द्राविडः (ध. नि. ३.९४)
कर्पूरः ।

द्राविडी (सु. सू. ३८.५३)
एला (ध. नि. २.४४), द्रविडदेशे दाक्षिणात्ये जातत्वात् ।

द्रावी (कै. नि. १.३२०)
अम्लवेतसः ।
द्रवीभवत्यजामांसं मलवस्त्रं सितं भवेत् । चणकाम्लोपमं स्वादु साम्लं स्यादम्लवेतसम् ॥' इति ।

द्रुः (रा. नि. २.१७)
वृक्षः ।

द्रुमः (च. द. ५०.१६०)
१. स्वर्णालुः । (शि.)
२. वृक्षः । (रा. नि. २.१७)

द्रुमज्योतिः (र. चू. ८.२४)
रक्तस्नुहयादिगणे रसौषधिविशेषः ।

द्रुमव्याधिः (ध. नि. ३.८२)
लाक्षा ।

द्रुमोत्पलः (श. च. १.८०)
कर्णिकारः ।

द्रेका (भा. प्र. चि. ५४.८६)
महानिम्बः (वकायनः) ।

द्रेकी (ध. नि. १.३१)
महानिम्बः ।

द्रेक्का (सो. नि. १.१२०)
महानिम्बः ।

द्रोणः (अ. सं. उ. ४२.७०)
विषघ्नौषधिविशेषः । वैकुण्ठ इतीन्दुः ।

द्रोणपुष्पकः (ड०, सु. सू. ४६.२७४)
कुतुम्बकः, द्रोणपुष्पीत्यर्थः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

द्रोणपुष्पी (भा. नि. ३.२८८)
गूमा।
Leucas cephalotes Spreng.

द्रोणा (अ. उ. ३७.९२)
विषघ्नौषधिविशेषः। (द्र. — द्रोणः)

द्वारदा (च. वि. ८.१२९)
शाकतरुः। (चक्र.)

द्वारदारुः (कै. नि. १.८०५)
शाकः।

द्विकरञ्जम् (अ. हृ. सू. १५.२१)
नक्तमालः पूतीकश्चेति। (अ. द.)

द्विजा (ध. नि. ३.५१)
रेणुका।

द्वितिक्ता (अ. हृ. सू. १५.४०)
कटुका काकतिक्ता च। (अ. द.)

द्वितीयगोक्षुरकः (नि., च. द. २.१३)
श्वदंष्ट्रा।

द्विनिशा (अ. हृ. सू. १५.४०)
हरिद्रा दारुहरिद्रा च।

द्विपञ्चमूलम् (च. चि. १३.११३)
दशमूलम्।

द्विपञ्चमूलिकः (च. चि. ५.६७)
दशमूलम्।

द्विपर्णी (र. चू. ८.५)
सर्पाक्ष्यादिगणे रसौषधिविशेषः।

द्वीपिशत्रुः (का. सं., पृ. ३२२)
शतावरी।

द्विपुनर्नवम् (अ. हृ. चि. १२.१९)
रक्ता श्वेता च पुनर्नवा।

द्विबृहती (अ. हृ. सू. १५.२१)
बृहती कण्टकारी च।

द्विमधुकम् (च. चि. २६.२३८)
मधुकं जलमधुकञ्च।

द्विमेदा (अ.हृ.शा. २.४८)
मेदा महामेदा च।

द्विसारिवा (अ. हृ. उ. ६.२७)
अनन्तमूल—श्यामालते (शि.), श्वेता कृष्णा च सारिवेत्यर्थः।

द्विस्थिरा (अ. हृ. उ. ६.२७)
शालपर्णी-पृश्निपर्ण्यौ।

द्वीपमारिचम् (ध. नि. ३.३७)
कङ्कोलम्। द्वीपान्तरे भवं मरिचाकारम्।

द्वीपान्तरवचा (भा. नि. १.१०७)
चोपचीनी।

द्वीपान्तरीयवृक्षाम्लम् (सि. भै. ४.४००)

द्वीपिका (च. क. १.२२)
शतावरी। (ध. नि. १.२९१)

द्वीपिशत्रुः (ध. नि. १.२९१)
शतावरी।

द्वीपी (च. वि. ८.१३५)
चित्रकः। (ध. नि. २.२८१)।

द्वे त्रिफले (च. चि. २६.८७)
अत्र द्राक्षाकाश्मर्यपरूषकाणि द्वितीया त्रिफला (चक्रः)। प्रथमा तु प्रसिद्धैव।

द्वे निदिग्धिके (च. चि. ११.३५)
बृहती क्षुद्रा च ग्राह्या (चक्रः), बृहती कण्टकारी चेत्यर्थः।

द्वे पाठे (च. चि. १८.३९)
द्वे पाठे इत्यनेन स्वल्पपत्रां द्वितीयां पाठां ग्राहयन्ति। (चक्रः)
पाठा राजपाठा च।

द्वे बले (च. चि. १२.३४)
बला अतिबला च।

द्वे विशाले (अ. हृ. चि. १२.२५)
इन्द्रवारुणी महेन्द्रवारुणी च।

ध

धत्तूरः (अ. हृ. उ. ३८.३७)
धतूर, धतूरा।
Thorn apple.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Datura metel Linn.

धत्तूरकः (अ. उ. २४.३०)
धत्तूरः ।

धनञ्जयः (च. चि. ४.७५)
अर्जुनः ।

धनिका (अ. चि. ८.५०)
धान्यकम् ।

धनीयकम् (भै.र., पृ. ७९०)
धान्यकम्, 'धनिया' इति लोके ।

धनुःश्रेणी (प.र. ७६)
मूर्वा ।

धनुर्गुणा (श. च. १.१२५)
मूर्वा । धनुर्गुणोपयोग्यत्वात् ।

धनुर्वृक्षः (रा. नि. ९.२०)
धन्वनः । धनुषो योनित्वात् ।

धन्याकम् (च. चि. ५.६९)
धान्यकम् ।

धन्वनः (सु. चि. १५.९)
धनुर्वृक्षो बदरीसदृशपत्रः । (ड०)
धामनिरिति ख्यातः (नि., च. द. ३३.६)
धामन ।
Grewia tiliaefolia Vahl.

धन्वनच्छदः (अ. नि. २९)
परूषकः, धन्वनस्येव पत्रत्वात् ।

धन्वयवासः (च. चि. ७.१४५)
धन्वयासः ।

धन्वयवासकः (च. सू. ४.१४)
धन्वयासः ।

धन्वयासः (च. चि. ४.४६)
धन्वदेशे जातो यासः याससदृशः क्षुपः ।
धमासा ।
Fagonia cretica Linn.

धन्वयासकः (च. सू. ४.११)
धन्वयासः ।

धन्वा (अ.हृ. उ. ३०.१२)
धन्वयासः ।

धमनः (ध. नि. ४.१४१)
नलः, शुषिरत्वात् ।

धमासकम् (ग. नि. १.६.२६७)
धन्वयासः, 'धमासा' इति लोके ।

धरणीकन्दः (रा. नि. ७.४२)
कन्दविशेषः ।

धर्मणः (नि. शे. १.१०५)
धन्वनः ।

धर्मपत्तनम् (ध. नि. २.८८)
मरिचम्, द्वीपान्तरे निर्यातत्वात् ।

धवः (च. सू. ३.३)
धौरा, धौरी ।
Anogeissus latitolia Wall.

धवलविटपा (प्रि. नि. ३.१६३)
सर्पगन्धा, 'धवलबरुआ' इति लोके ।

धातकी (च. सू. ४.९)
धाय ।
Fire flame bush.
Woodfordia fruticosa kurz.

धात्री (च. सू. ४.१८)
आमलकी । वयःस्थापने महाकषाये ।

धात्रीपत्रम् (रा. नि. ६.८२)
तालीशम्, आमलक्या इव पत्रत्वात् ।

धानका (अ. सू. १५.१६)
धान्यकम् ।

धानेयकम् (ध. नि. २.६३)
धान्यकम् ।

धान्यम् (सु. चि. ५.२८)
धान्यकम् ।

धान्यकम् (च. सू. ४.१४)
तृष्णानिग्रहणे महाकषाये । धनिया ।
Coriander.
Coriandrum sativum Linn.

धान्यका (ध. नि. २.६३)
धान्यकम् ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

धान्यतुम्बुरु (च. क. ४.१५)
धान्यकम् ।
धान्यमाषः (च. शा. ८.२८)
माषः ।
धान्या (पा.) (अ. हृ. उ. ३०.१२)
धान्यकम् । (ध. नि. २.६३)
धामार्गवः (च. सू. १.८१)
राजकोशातकी ।
नेनुआ, घिया तरोई
Sponge gourd, smooth Luffa.
Luffa cylindrica (Linn.)
M.J. Roem.
धारा (ध. नि. १.१)
धारयति शरीरमिति ।गुडूची ।
धाराकदम्बः (रा. नि. ९.१७२)
कदम्बभेदः प्रावृषेण्यः ।
धाराकोशातकी (रा. नि. ७.२८९)
कोशातकी । फलोपरि ग्रव्यक्तराजित्वात् ।
धाराधरः (ग. नि. २.१.४८०)
मुस्तः ।
धाराफलकः (रा. नि. ११.१३)
कर्मरङ्गः, धारवत्फलत्वात् ।
धार्मपत्तनम् (नि. शे. ३.३०३)
मरिचम्, धर्मपत्तने द्वीपान्तरे पत्तनविशेषे लभ्यमानत्वात् ।
धावनी (च. चि. ३.१८७)
१. कण्टंकारी । (चक्र.)
२. पृश्निपर्णी । (ध. नि. १.९०)
धावयति शरीरं, धावति शीघ्रं प्रसर्पति चेति धावनी ।
धुत्तूरः (सु. चि. १७.३७)
धत्तूरः ।
धुर्धूरकः (अ. सं. उ. ४०.१०३)
धत्तूरः । (इ०)
धूनराजः (आ. वि. ३.१६, पृ. ४६९)
रूमी मस्तगी ।
धूपकाष्ठः (ड०, सु. चि. २५.१९)
सरलः ।
धूपराजः (स. यो. ३.५४)
सर्जरसः ।
धूमपत्रम् (स. यो. ३.७०)
तमाखुः ।
धूमवल्ली (सि. भे. ४.३७३)
तमाखुः ।
धूम्रपत्रा (रा. नि. ५.८)
कीटमारी । कीड़ामारी ।
Aristolochia bracteata Retz.
धूर्तः (ध. नि. ४.७)
धत्तूरः ।
धूर्तपत्नी (ग. नि. १.४.४४७)
भङ्गा ।
धूलीकदम्बः (रा. नि. ९.१७३)
कदम्बभेदः प्रावृषः प्राक् पुष्पितः ।
ध्याममम् (च. चि. २८.१५४)
ध्यामकम् ।
ध्यामकम् (च. सू. ५.२१)
कत्तृणम् । (ध. नि. १.८०)
ध्रुवा (ध. नि. १.८७)
शालपर्णी ।
ध्वजद्रुमः (ध. नि. ५.६८)
तालः ।
ध्वाङ्क्षमाची (ध. नि. ४.२१)
काकमाची ।
ध्वांक्षिका (रा. नि. ३. १६६)
काकोली ।
ध्वांक्षोलिका (ध. नि. १.१३२)
काकोली ।

न

नक्तमालः (च. सू. ४.११)
नक्तं रात्रौ आलते पुष्पभारेण शोभते इति ।
करञ्जः । (चक्र.)
नक्तमालिका (भे. सं. चि. १४.७)
करञ्जी ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नक्ताह्वः (अ. उ. २५.६७)
नक्तमालः, करञ्जः ।

नखरञ्जकः (शा. नि., पृ. ९१४)
मदयन्ती, 'मेंहदी' इति लोके ।

नगवृत्तिकः (सु. चि. २०.१२)
जिङ्गिनी गुडमज्जनिकेति लोके । (ड०)

नगवृत्तिका (सु. चि. १५.९)
शल्लकी, नगे पर्वते वर्त्तनात् ।

नग्नजीवः (अ. सं. शा. १.६१)
ओषधिविशेषः पुंसवने प्रयोज्यः । अत्र 'नग्नजित्' इति पाठान्तरम् ।

नतम् (च. सू. ३.२३)
तगरम् ।

नदीकान्तः (कै. नि. १०९३)
काकजंघा ।

नदीकान्ता (ध. नि. ४.२३)
काकजंघा ।

नदीनिष्पावः (शा. नि. ९., पृ. ६२१)
निष्पावविशेषः ।

नदीभल्लातकः (सु. सू. ४६.२४९)
कषायमधुरशाके पठितः पादपविशेषः ।

नदीमाषकः (च. सू. २७.११४)
'उदीमानक' इति ख्यातः । (चक्र.)

नदीसर्जः (नि. शे. १.१०३)
अर्जुनः । वने नदीनिर्झरपरिसरे जातः सर्जवत्तरुः ।

नद्याम्रः (रा. नि. ४.१)
समष्ठिलः ।

नद्युदुम्बरी (शा. नि. ६, पृ. ४९६)
उदुम्बरभेदः लघुः ।

नन्दनम् (सु. क. २.५)
फलविषम् ।

नन्दा (च. क. १०.८)
स्नुही ।

नन्दिकः (ध. नि. ३.१८)
तूणिः ।

नन्दितरुः (ध. नि. ५)
धवः ।

नन्दिनी (र. चू. ७.७)
रसौषधिविशेषः ।

नन्दिवृक्षः (ध. नि. ३.१८)
तूणिः ।

नन्दी (अ. सू. १५.४१)
नन्दीवृक्षः ।

नन्दीतकः (च. वि. ८.१४०)
अम्लफलविशेषः कर्परनन्दीति चक्रः ।

नन्दीमाषकः (अ. सं. सू. ७.१३८)
नदीमाषकः । शाकविशेषः ।

नन्दीमुखः (सु. सू. ४६.१२)
व्रीहिविशेषः ।

नन्दीमुखी (च. सू. २७.२२)
नन्दिया ।
Eleusine indica Gaertn.

नन्दीवृक्षः (सु. सू. ३८.४६)
न्यग्रोधादिगणे पठितः ।
प्ररोही गर्दभाण्ड इति डल्हणः ।
Ficus altissima Blume.

नन्द्यावर्तः (प. र. ६२७)
तगरः ।

नमलिका (क. का. ४.२९)
कन्दशाकविशेषः ।

नमस्करी (अ. सू. १५.३८)
समङ्गा (लज्जालुः) ।

नमस्कारी (ध. नि. ४.१०९)
समङ्गा (लज्जालुः) ।

नमेरुः (अ. नि. १६२)
देवपुन्नागः ।

नयनौषधम् (अ. चि. ११.५९)
पट्टिकारोधम् । (अ. द.)

नरकसा (र. चू. ८.१२)
व्याघ्रिकादिगणे रसौषधिविशेषः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नरजीवा (र. चू. ८.१५)
व्याघ्रिकादिगणोक्तो रसौषधिविशेषः ।

नरपुष्पः (सो. नि. १.६९०)
नरहुल ।
Indigofera sp.

नरवृक्षः (पा.) (च. द. ५५.१२३)
Indigofera sp.

नराधिपः (सु. चि. ३७.११)
आरग्वधः ।

नरेन्द्रः (सु. चि. १८.६)
किरमालकः (आरग्वधः) । (ड०)

नरेन्द्रद्रुमः (सु. चि. ९.४०)
आरग्वधः ।

नर्त्तकः (शा. नि. ९, पृ. ६३९)
रागी ।

नलः (सु. सू. ३८.१२)
दूर्वाकारोऽन्तःसुषिरः । (ड०)
नरकट । Great reed.
Arundo donax Linn.

नलदम् (च.सू. ३.२५)
उशीरम् । मांसीति चक्रः ।

नलदा (ध. नि. ३.४५)
मांसी ।

नलिका (च. चि. २८.१५२)
गन्धद्रव्यविशेषः । नालुकेति वङ्गीयाः ।
(द्र०-नालुका)

नलिनम् (च.सू. ३.२७)
कमलम् ।

नलिनी (सु. चि. २५.२९)
कमलिनी ।

नलिनीका (च. सू. २७.१०१)
कमलिनी ।

नली (ध. नि. ३.४३)
नलिका ।

नवधान्यादिवर्गः (सु. सू. १९.१६-१७)
नवधान्यादिस्तक्रान्तो वर्गः व्रणिभिः परिहार्यः; यथोक्तं—'तक्रान्तो नवधान्यादिर्योऽयं वर्ग उदाहृतः । दोषसंजननो ह्येष विज्ञेयः पूयवर्धनः ॥' इति ।

नवनीतखोटिः (चक्र., च. सू. ३.३)
श्याह्वः, श्रीवेष्टक इत्यर्थः ।

नवनीतधूपः (ड०, सु०चि० ११.१०)
सरलनिर्यासः । श्रीवेष्टकः ।

नवमालिका (च. चि. २६.१८४)
नेपाली ।

नहिका (अ. र. ४.१०५)
शुकनासा ।

नाकदण्डा (सो. नि. ७.६४९)
नाकनारी ।

नाकनारी (सो. नि. १.६४९)
नाकस्त्री ।

नाकुली (च. चि. ३.२६७)
ईश्वरी ।
ईश्वरमूल, इसरौल ।
Aristolochia indica Linn.

नाकुलीद्वयम् (च. चि. ९.४६)
नाकुली गन्धनाकुली च ।

नागम् (सु. सू. ४५.१२)
नागपुष्पम् । (ध. नि. २.४८)

नागकण्ठी (र. चू. ८.२६)
रक्तस्नुह्यादिगणे रसौषधिविशेषः ।

नागकर्णी (र. चू. ८.२३)
रक्तस्नुह्यादिगणे रसौषधिविशेषः ।

नागकुसुमम् (अ. चि. ५.५४)
नागकेशरम् ।

नागकेशरम् (च. चि. २८.१५४)
नागकेसर ।
Mesua ferrea Linn.

नागकेसरम् (ध. नि. २.४८)
नागकेशरम् ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नागचम्पः (अ. प्र. ९.७७)
कुसुमगणे । बं.—भुलिचांपा ।
Mgnolia pterocarpa Roxb.

नागजिह्वा (प. र., ६४)
१. सारिवा ।
२. नाही । (सो. नि ७.६५४)

नागदमनी (रा. नि. ५.२४)
१. जम्बूः ।
२. ईश्वरी । (कै. नि. १.७७८)

नागदन्ती (च. वि. ८.१५१)
शिरोविरेचने नागदन्तीमूलम् ।
पुतेर ।
Croton oblongifolius Roxb.

नागधारी (र. चू. ८.४५)
भूपाटल्यादिवर्गे रसौषधिविशेषः ।

नागपर्णी (भै. र., पृ. २२५)
ताम्बूलम् ।

नागपुरीषच्छत्रः (अ. उ. ३७.४२)
हस्तिपुरीषे जातश्छत्रकः ।

नागपुष्पम् (च. चि. ३.२५८)
नागकेशरम् ।

नागपुष्पी (भा. नि. ३.२५६)
नागिनी ।

नागफणी (सि. भे. ४.३८२)
नागफनी । Cactus.
Opuntia dillenii Haw.

नागबला (च. चि. ११.९१)
नागवद् बलं ययेति ।
Grewia hirsuta Vahl.

नागरः (ध. नि. १.४०)
मुस्तः ।

नागरम् (च. सू. २.५)
१. शुण्ठी ।
२. फलविशेषः ।(हा. १.१७.२)
३. पित्तविकारे मुस्तम् । (चक्र., च. सू. २.२१)

नागरङ्गम् (च. सू. २७.१५६)
नारङ्गम् ।

नागवल्लिका (प. र. ७०२)
ताम्बूली ।

नागवल्ली (ध. नि. ३)
ताम्बूलम् ।

नागविन्ना (पा.) (सु. उ. ६२.३१)
इन्द्रवारुणीभेदः, वृश्चिकपत्रिकेत्यपरे (ड०) ।

नागार्जुनी (सो. नि. १.६७३)
लघुदुग्धिका ।

नागाह्वम् (अ. सू. १५.१४)
नागकेशरम् ।

नागाह्वयम् (अ. सू. १५.४३)
नागकेशरम् ।

नागाह्वा (ध. नि. ३)
ताम्बूलम् ।

नागिनी (कै. नि. १.७६८)

नाटाकरञ्जः (शि., च. द. १२.१९)
कण्टकिकरञ्जः ।

नाडी (च. सू. २७.९७)
नाडीचः । (चक्र.)

नाडीकः (शा. नि. १०, पृ. ६५४)
पट्टशाकः (नाडीचः) ।

नाडीकलायः (अ. हृ. सू. ६.७७)
मत्स्याक्षः । (हे.)

नाडीचः (च. द. ५०.१६१)
नरचा । पटुआ । Jute
Corchorus olitiorius Linn; C. capsularis Linn.

नाडीतिक्तः (रा. नि. ९.५२)
नेपालकिरातः ।

नाडीशाकः (शा. नि. १०, पृ. ६५४)
पट्टशाकः (नाडीचः) ।

नादेयः (ध. नि. १.४१)
मुस्तः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नादेयबृहती (कै. नि. १.६५)
बृहतीभेदः ।

नादेयी (सु. चि. ४.३२)
तर्कारी । (ध. नि. १.१११)

नान्दीमुखी (च. सू. २७.२२)
नन्दीमुखी ।

नाभिः (स. यो २.३५)
वत्सनाभः ।

नारङ्गम् (सु. सू. ४६.१३९)
नारंगी, सन्तरा । Orange.
Citrus reticulata Blanco.

नाराचकम् (सु. क. २.५)
स्थावरविषविशेषः ।

नाराची (सो. नि. १.६६५)

नारायणी (कै. नि. १.१०६३)
शतावरी ।

नारिकेलः (च. सू. २६.११३)
नारियल । Coconut.
Cocos nucifera Linn.

नारी (च. चि. १.४.७)
दिव्यौषधिविशेषः, तद्वर्णनं यथा — 'नारी नामौषधिः 'अश्वबला इति विज्ञायते या बल्वजसदृशपत्रा' इति । (द्र.-अश्वबला)

नालम् (च. सू. १.७३)
पुष्पनालम् ।
फूल का डंठल । Flower-stalk.

नालिका (अ. हृ. सू. ६.९३)
तस्मात् (कलम्बात्) अल्पा श्लक्ष्णा च । (हे.)
कलम्बभेदः ह्रस्वनालः ।

नालिकेरः (अ. उ. ११.५३)
नारिकेलः ।

नालुका (शि., च. द. १०.८९)
नलिका । 'त्वगेव परमस्थूला नालुकेत्यभिधीयते' इति प्रियनिघण्टुः ।
Cinamon cassia Blume.

नासापत्री (प्रि. नि. ८.३९)
टङ्कम् । नासपाती ।

नासाफला (चक्र., च. चि. १.१६४)
काकनासा ।

नाही (सो. नि. १.६५४)
मामज्जकः । नाई, मामेजवा ।
Enicostemma littorale Blume.

निःश्रेणिका (शा. नि. ३, पृ. २८२)
तृणविशेषः ।

निःसारा (ध. नि. ४.७५)
कदली, साररहितत्वात् ।

निकुचम् (च. सू. २५.३९)
लकुचम् ।

निकुञ्चिका (रा. नि. ८.३५)
तृणविशेषः ।

निकुम्भः (अ. सू. १५.२)
दन्ती ।

निकुम्भा (ध. नि. १.२२३)
दन्ती ।

निकोचकम् (च. सू. १३.९)
सरलफलम् । (अ. द., सू. ६.१२०)
सरलवद्वृक्षस्य फलमिति ।
चिलगोजा, नेवजा ।
Pinus gerardiana Wall.

निक्षारः (चक्र., च. सू. २७.११४)
ऐन्दुकम् ।

निचुलः (च. सू. २.९)
Barringtonia acutangula Linn.

नितम्बः (रा. नि. २.२०)
अर्वाग्भागः पादपस्य ।

निदिग्धिका (च. सू. २.११)
कण्टकारी । (ध. नि. १.९५)

निदिग्धी (अ. चि. १६.२५)
कण्टकारी ।

निम्बः (च. सू. २.७)
नीम ।
Margosa tree, Neem tree.
Azadirachta indica A Juss.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

निम्बपत्रा (प्रि. नि. १.११८)
शल्लकी । निम्बस्येव पत्रं यस्याः सा ।

निंबी (सो. नि. १.६५७)
नीमतीता ।
Picrasma quassioidas Bennett.

निम्बुकीलता (र. चू. ६.६०)
दिव्यौषधिविशेषः, तल्लक्षणं यथा — 'दलैः पुष्पैः फलैर्वल्ली निम्बुवृक्षस्य सम्मिता । तन्मूलैर्बध्यते सूतः सा प्रोक्ता निम्बुकी लता ॥' इति ।

निम्बूकः (रा. नि. ११.२२)
जम्बीरविशेषः ।

नियमनः (ध. नि. १.२९)
निम्बः । रोगान् नियच्छति निवारयतीति ।

निर्गुण्डिका (शा. सं. २.१२.१६६)
निर्गुण्डी ।

निर्गुण्डी (सु. सू. ३८.१८)
नीलनिर्गुण्डी ।
संभालू, मेउड़ी ।
Vitex negundo Linn.

निर्दहनी (सु. चि. ४.३२)
अग्निमन्थः ।

निर्मली (सि. भे. ५.४८)
कतकः ।

निर्माल्या (ध. नि. ३.६२)
स्पृक्का ।

निर्यासः (च. सू. १.७३)
वृक्षवल्कलात् क्षतान्निर्गतः सान्द्रीभूतो रसः 'गोंद' इति लोके ।

निर्विषा (सि. भे. २.७९)
जद्वार, निर्विषी ।
Delphinium denudatum Wall.

निर्विषी (शा. नि., पृ. ९३०)
निर्विषा ।

निशा (च. चि. ६.३१)
हरिद्रा । (ध. नि. १.५४)

निशाचरी (र. चू. ८.४७)
पञ्चरत्नकगणे रसौषधिः ।

निशाच्छदः (सु. चि. ३८.४३)
कर्चूरः ।

निश्रेणिका (रा. नि. ८.५०)
तृणविशेषः ।

निष्कुटम् (रा. नि. २.२२)
कोटरम् ।
Cavity (in trunk or branch).

निष्पावः (अ. ह. सू. ६.२०)
वल्लः । (हे.)
शिम्बः । (नि., च. द. ३९.५३)
Dolichos lablab Linn.

निष्पावी (रा. नि. ७.९९)
निष्पावविशेषः ।

निस्त्रिंशपत्रकः (च. क. १०.७)
स्नुही । (ध. नि. १.२३५)

नीड्गणम् (स. यो. ५.६२)
तृणविशेषः ।

नीपः (च. सू. ४.२३)
राजकदम्बः । (कै. नि. १.४८४)

नीरजम् (सु. चि. २५.३३)
कमलम् ।

नीरकदम्बकम् (भे. चि. २४.२५)
भूकदम्बः ।

नीलः (रा. नि. ९.११)
नीलिनीविशेषः । नरवृक्षः ।
Indigofera sp.

नीलकुरुण्टकः (च. द. ४७.३१)
नीलोट इति ख्यातः । (नि.)
बाणः, नीलसैरेयकः ।
Blue Variety of Saireyaka.

नीलज्योतिः (र. चू. ८.२४)
रक्तस्नुह्यादिगणे रसौषधिविशेषः ।

नीलझिण्टी (चक्र., च. वि. ८.१३९)
नीलसैरेयकः ।

नीलतिलाः (भे. सं. सि. ४.६३)
कृष्णतिलाः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नीलदूर्वा (ध. नि. ४.१४३)
दूर्वाभेदः ।

नीलपलाशः (रा. नि. १०.२७६)
पलाशभेदः ।

नीलपुनर्नवः (रा. नि. ५.४१०)
पुनर्नवाविशेषः ।

नीलपोरः (सु. सू. ४५.१५०)
इक्षुभेदः ।

नीलबीजः (रा. नि. ९.२०९)
सर्जकविशेषः ।

नीलबुघ्ना (चक्र., च. सू. १.८२)
अन्तःकोटरपुष्पी ।
Ipomoea sp.

नीलभृङ्गराजः (रा. नि. ४.२२)
भृङ्गराजभेदः ।

नीलयवाः (सु. उ. ११.११)
अपक्वयवाः । (ड०)
unripe grains of barly.

निलशिग्रुः (रा. नि. ७.६२)
शिग्रुभेदः ।

नीलस्पन्दा (ध. नि. ४.८५)
नीलापराजिता ।

नीला (च. चि. १.४.७)
दिव्यौषधिविशेषः, तल्लक्षणं यथा — 'नीला नामौषधिस्तु नीलक्षीरा नीलपुष्पा लताप्रतानबहुला' इति ।

नीलाञ्जनिका (ड०, सु. चि. २.९०)
नीलिनी ।

नीलाम्भोजम्
नीलोत्पलम् ।

नीलाम्ली (रा. नि. ४.३८)
क्षुपविशेषः ।

नीलालुः (रा. नि. ७.३२)
आलुकभेदः ।

नीलिका (च. चि. २६.१२)
नीलिनी ।

नीलिनी (च. स. २.९)
नील का पौधा ।
Indigo plant.
Indigofera tinctoria Linn.

नीली (सु. चि. २५.२८)
नीलाञ्जनिका शारदफला 'श्रीफली' इति लोके । (ड०)
नीलीनाम्ना ख्याता वस्त्ररञ्जनलता (शि., अ. उ. २४.३६) नीलिनी ।

नीलोत्पलम् (च. सू. ४.४१)
दाहप्रशमने महाकषाये ।
नीलोफर ।
Blue water lily.
Nymphoea stellata Willd.

नीवारः (च. सू. २७.१७)
वन्यधान्यं फलाहारे सम्मतम् ।
तेनी का चावल, उड़िया ।
Wild rice.

नृतकौण्डकः (सु. उ. ५१.३४)
मर्कटतृणम् । मकरा ।
Eleusine aegyptiaca Desf.

नृत्यकुण्डकः (अ. चि. ११.३०)
नृत्तकौण्डकः ।

नृपतरुः (अ. चि. १९.३७)
आरग्वधः ।

नृपद्रुमः (अ. चि. १.१२१)
आरग्वधः ।

नृपवृक्षः (सु. उ. ४२.६१)
आरग्वधः ।

नेता (ध. नि. १.२९)
निम्बः । नयति आरोग्यं प्रापयतीति, वृक्षाणामग्रणीश्च ।

नेत्रः (क. का. ४.३९)
फलशाकविशेषः ।

नेत्रम् (रा. नि. २.१९)
मूलम् ।
जड़ । Root.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नेत्रोपमफलः (भा. नि. ५.१२३)
वातादः । नेत्रोपमं फलं यस्य सः ।

नेत्र्यगणः (अ. प्र. ९.५)
'रसाञ्जनं द्विधा प्रोक्तं त्रिफला लोध्रकद्वयम् । कुमारिका च पिघला (?) गणोऽयं नेत्र्यसंज्ञितः ॥' इति ।

नेपालनिम्बः (रा. नि. ९.५२)
नेपालकिरातः ।

नेपाली (ग. नि. १.६.२४३)
पुष्पविशेषः ।
नेवारी ।
Jasminum arborescens Roxb.

नेपालशृङ्गी (आ. वि. ३, पृ. ६२८)
शृङ्गीविषविशेषः ।
Aconite sp.

नेमिः ((श. च. १.२०)
तिनिशः, रथनेमिसाधनत्वात् ।

नेयल्ली (स. यो. ५.११९)

नैपालः (सु. सू. ४५.१५०)
इक्षुभेदः ।
ईख का भेद ।
A kind of sugarcane.

नैपालम् (अ. प्र. ९.१७)
अम्लफलविशेषः ।

नैषधः (च. नि. ४.५)
नैषधकः ।

नैषधकः (च. सू. २७.११)
अवरशालिविशेषः ।
Inferior veariety of Śāli.

नौवृक्षः (प्रि. नि. ४.९७)
चर्मिवृक्षः ।

न्यग्रोधः (च. सू. ५.२२)
वटः ।

न्यग्रोधवर्गः (सु. उ. ४४.२७)
न्यग्रोधादिगणः । (ड०)

न्यग्रोधा (ध. नि. १.२२९)
द्रवन्ती ।

न्यग्रोधादिः (च. शा. ८.२४)
क्षीरिवृक्षाः ।

न्यग्रोधादिकम् (च. चि. २५.६३)
न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसाः ।

न्यग्रोधाद्यैश्चतुर्भिः (च. सि. १०.३८)
न्यग्रोधोदुम्बराश्वत्थप्लक्षाः । (चक्रः)

न्यग्रोधी (च. क. १२.३)
द्रवन्ती ।

प

पक्वकर्पूरः (सो. नि. १.३८६)
पाकविधिना निष्पन्नः कर्पूरः ।

पक्वकूष्माण्डम् (च. सू. २७.११३)
पका कूष्माण्डफल ।
Ripe fruit of Kūṣmāṇḍa.

पक्वाण्डः (रा. नि. ८.१६)
पखौड़ ।

पङ्कजम् (अ. हृ. उ. ३९.१०४)
कमलम् ।

पङ्क्तिबीजकः (रा. नि. ९.३३६)
आरग्वधः ।

पञ्चकटुकम् (का. सं., पृ. १०७)
पञ्चकोलम् ।

पञ्चकषायाः (सु. ३८.२५)
न्यग्रोधादुम्बरप्लक्षाश्वत्थगर्दभाण्डाः ।
(कषायवृक्षाः) । (ड०)

पञ्चकोलम् (भा. नि. १.७२)
पिप्पली—पिप्पलीमूल—चव्य—चित्रक—शुण्ठीनां पञ्चानां योगः, यदुक्तं—'पिप्पलीपिप्पलीमूलचव्य-चित्रकनागरैः । पञ्चभिः कोलमात्रं यत् पञ्चकोलं तदुच्यते ॥' इति ।

पञ्चकोलकम् (अ. हृ. सू. ६.१६६)
पञ्चकोलम् ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पञ्चक्षीरिवृक्षाः (च. चि. ११.५६)

क्षीरिवृक्षाः वटोदुम्बराश्वत्थप्लक्षकपीतनाः । उक्तं च शालाक्ये—'उदुम्बरो वटोऽश्वत्थो मधूकः प्लक्ष एव च । पञ्चैते क्षीरिणो वृक्षा अस्मिंस्तन्त्रे प्रकीर्त्तिताः ॥' इति । (चक्र.) । इत्थं शालाक्ये कपीतनस्थाने मधूको गृह्यते । क्वचिद् वेतसोऽपि युज्यते ।

पञ्चतिक्तः (प्रि. नि. १.१८३)

त्रिविधः पञ्चतिक्तः— १. निम्ब—गुडूची—वासा—पटोल—कण्टकारिकाः ।
२. गुडूची—वासा—कटुका—भूनिम्ब—निम्बाः ।
३. पटोल—निम्ब—भूनिम्ब—रास्ना—सप्तच्छदाः ।

पञ्चनिम्बम् (ध. नि. ७.५५)

निम्बस्य पञ्चाङ्गम्, यथोक्तं—'निम्बस्य पत्रं त्वक्पुष्पफलमूलैः समन्वितम् । पञ्चनिम्बमिति ख्यातं नामतः शास्त्रकोविदैः ॥' इति ।

पञ्च पञ्चमूलानि (च. चि. १.१.४१)

१. विदारिगन्धाद्यम् (लघु पञ्चमूलम्) ।
२. बिल्वाद्यम् (महत् पञ्चमूलम्) ।
३. पुनर्नवाद्यम् (मध्यमं पञ्चमूलम्) ।
४. जीवकाद्यम्(जीवनं पञ्चमूलम्) ।
५. शराद्यम् (तृणपञ्चमूलम्) ।

पञ्चपर्णिका (रा. नि. ३०)

गोरक्षी ।

पञ्चबृहती (क. का. ४.३७)

पञ्चबृहतीगणः शाकप्रकरणे, यथा—'व्याघ्री चित्रलता बृहत्यमलिनादर्कोऽप्यधोमानिनीत्येताः पञ्च बृहत्यः' इति । न स्पष्टम् ।

पञ्चभृङ्गम् (ध. नि. ७.१६)

'देवदाली शमी भृङ्गा निर्गुण्डी शणकस्तथा । रोगान्ते स्नानपानार्थं पञ्चभृङ्गमिति स्मृतम् ॥' इति । 'निर्गुण्डी सतमालकः' इति शालिग्रामनिघण्टौ, पृ. ८३९) ।

पञ्चमूलद्वयम् (सु. उ. ३६.५)

दशमूलम् ।

पञ्चमूली (च. चि. ३.२३४)

वातपित्तोत्कटे स्वल्पा, वातकफोल्वणे च महतीति व्यवस्था । (द्र. -पञ्च पञ्चमूलानि)

पञ्चमूल्यौ द्वे (च. चि. ७.६५)

दशमूलमिति, यथोक्तं—'उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम् ' इति (भा. नि. ३.४९) ।

पञ्चरत्नकगणः (र. चू. ८.४६)

'पाटलेन्दीवरी चैव मन्त्रसिंहासनी तथा । निशाचरी च कङ्कालखेचरी पञ्चरत्नकम् ॥' इति ।

पञ्चराजिफलः (रा. नि. ३.७४)

पटोलः । फले पञ्च रेखाः भवन्ति ।

पञ्चलवणी (गणः) (क. का. ४.३६)

'कुक्कुट्या समसूरपत्रलवणीयुग् मर्मणी राष्ट्रिका । पञ्चैते लवणीगणा जलनिधेस्तीरं सदा संश्रिताः ॥' इति । शाकप्रकरणे ।

पञ्चवल्कम् (च. चि. १४.२१४)

पञ्चवल्कलम् ।

पञ्चवल्कलम् (म. नि. ५.८)

'न्यग्रोधोदुम्बराश्वत्थपारीशप्लक्षपादपाः । पञ्चैते क्षीरिणः प्रोक्तास्तेषां त्वक् पञ्चवल्कलम् ॥' इति ।

पञ्चवल्ली (क. का. ४.३८)

'तिक्ता बिम्बलता च या कटुकिका मार्जारपादी पटोलात्यन्तोत्तमकारवेल्लिसहिता पञ्चैव वल्ल्यः स्मृताः' इति ।

पञ्चशिरीषः (च. चि. २३.२१८)

शिरीषपञ्चाङ्गम्,
यथा—'शिरीषफलमूलत्वक्पुष्पपत्रैः समैर्धृतैः । श्रेष्ठः पञ्चशिरीषोऽयं विषाणां प्रवरो वधे ॥' इति ।

पञ्चशैरीषम् (ध. नि. ७.५७)

पञ्चशिरीषः ।

पञ्चसार्पकम् (ध. नि. ७.५९)

पञ्चशिरीषः ।

पञ्चसिद्धौषधिः (ध. नि. ७.६१)

'तैलकन्दः सुधाकन्दः क्रोडकन्दो रुदन्तिका । सर्पनेत्रयुताः पञ्च सिद्धौषधिसंज्ञकाः ॥' इति ।

पञ्चसुगन्धिकम् (ध. नि. ७.४२)

कङ्कोलकं पूगफलं लवङ्गकुसुमानि च । जातीफलानि कर्पूरमेतत् पञ्चसुगन्धिकम् ॥' इति ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पञ्चसूरणम् (ध. नि. ७.६०)

अत्यम्लपर्णीकाण्डीरमालाकन्दद्विसूरणैः। प्रोक्तो भवति योगोऽयं पञ्चसूरणसंज्ञकः॥' इति।

पञ्चस्नेहः (स. यो. ३.१०६)

एरण्डतैलम्, निम्बतैलम्, गोघृतम्, नालिकेरतैलम्, पूवस्तेण्णम्।

पञ्चाङ्गम् (ध. नि. ७.५८)

त्वक्पत्रफलमूलानि पुष्पं चैकस्य शाखिनः। पञ्चाङ्गमिति बोद्धव्यं प्राज्ञैरेकत्र मिश्रितम्॥' इति।

पञ्चाङ्गुलः (ध. नि. १.२९५)

एरण्डः, पञ्चाङ्गुलवत् पत्रत्वात्।

पञ्चाङ्गुली (अ. नि. २७६)

लिङ्गबीजा (लिङ्गिनी)।
'पचगुरिया' इति लोके।
Bryonopsis laciniosa (Linn) Naud.

पञ्चाम्लम् (च. चि. २२.३५)

पञ्चाम्लं 'कोलाम्लं चुक्रिकाम्लं च मातुलुङ्गाम्लवेतसम्। चतुरम्लमिति प्रोक्तं, पञ्चाम्लं तु सदाडिमम्' इति वचनाज्ज्ञेयम्। (चक्र.)
पुनः 'कोलदाडिमवृक्षाम्लचुक्रीकाचुक्रिकारसः। पञ्चाम्लको मुखालेपः' इति मदात्ययप्रकरणे (च. चि. २४.१५१); भावप्रकाशनिघण्टौ 'अम्लवेतस-वृक्षाम्लबृहज्जम्बीरनिम्बुकैः। चतुरम्लं हि, पञ्चाम्लं बीजपूरयुतैर्भवेत्॥' इति।

पट्टिकालोध्रः (भा. नि. १.२१५)

लोध्रभेदः।

पटीरम् (भा. प्र. चि. २१.१६)

चन्दनम्।

कमलम्।

सहस्रमूलिका (शा. नि. १०, पृ. ६५२)

शाकविशेषः।

सहस्रवीर्या (ध. नि. १.२९३)

१. महाशतावरी।

२. श्वेतदूर्वा। (ध. नि. ४.१४४)

सहस्रवेधि (रा. नि. ६.६०)

हिङ्गु।

सहस्रवेधी (रा. नि. ६.१४८)

अम्लवेतसः।

सहस्रसुमम् (सि. भे. ४.२२९)

झण्डूविशेषः, 'हजारा' इति प्रसिद्धः।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सहा (सु. चि. २३.१२)
१. मुद्गपर्णी ।
२. दण्डोत्पला । (सि. नि. १४)

सहाचरः (च. चि. २८.१४४)
सैरेयकः ।

सहाद्वयम् (सु .सू. ४६.४६)
मुद्गपर्णी - माषपर्ण्यौ ।

सहासारः (आ. वि. ३.१३, पृ. ४५६)
कुमारीसारः ।

सहे (सु. चि. २.३९)
मुद्गपर्णी - माषपर्ण्यौ ।

साकुन्दः (सो. नि. १.४४५)
साकुरुण्डः ।

साकुरुण्डः (रा. नि. ६.१६)
साकुरुण्डो ग्रन्थिफलो विकटो वस्त्रभूषणः ।
कुरुण्डः कर्बुरफलः सकुरुण्डश्च सप्तधा ॥' इति ।
मांई ।
Gallof Tamarix troupii Hole.

सागरैरण्डः (स. यो. २.१०)
द्रवन्ती ।

सागरोद्भूतः (सो. नि. ७.६५८)
तुवरकः ।

साजडः (शा. नि. ६, पृ. ५३१)
असना, सैन । Laurel.
Terminalia alata Heyne ex Roth.

सातला (ध. नि. १.२३८)
सप्तला ।

साबररोध्रः (सु. सू ३८.४६)
शाबरलोध्रः ।

साबरलोध्रः (सु. सू. ३८.१४)
श्वेतस्थूलत्वक् । (ड०)
शाबरलोध्रः ।

सारः (श. च. १.३४९)
मज्जा वृक्षकाण्डस्य ।
Heart-wood.

सारणी (ध. नि. १.२८९)
प्रसारणी ।

सारतैलम् (सु. चि. २०.१८)
शिंशपागुरुसरलदेवदार्वादितैलम् । (ड०)

सारदारु (अ. चि. १०.७९)
सारदारुभिः शमीखदिरादिभिः । (अ. द.)

सारपाकम् (सु. क. २.५)
फलविषम् ।

सारसा (सि. भे. ४.४७७)
उशब्बा ।

सारामुखः (अ. सू. ६.१)
शालिविशेषः, कृष्णशूक इत्यरुणः ।

साराम्लम् (म. नि. ६.८३)
अम्लफलविशेषः ।

सारिवः (अ. सू. ६.२)
शालिविशेषः ।

सारिवा (प्रि. नि. २.३०)
'सारिवा दाडिमीतुल्यश्वेतरेखाङ्कितच्छदा । दुग्धगर्भा शृंगनिभतूलान्वितफला सिता ॥' इति ।
कपूरी, अनन्तमूल ।
Hemidesmus indicus R.Br.
जम्बूपत्रा दुग्धगर्भा वल्ली स्वनामप्रसिद्धेति डल्हणः । (सु. सू. ३८.४)

सारिवाख्यः (च. सू. २७.९)
सारिवः, शालिविशेषः ।

सारिवाद्वयम् (च. चि. १४.१६०)
श्वेतसारिवा कृष्णसारिवा च । सारिवोत्पलसारिवा चेति डल्हणः । (सु. उ. ३९.२३०)

सालः (रा. नि. २.१७)
१. वृक्षः ।
२. शङ्कु (शालः) (ड., सु. सू. ३८.८)

सालिमो मैसरः (सि. भे. २.१०४)
सालम मिश्री ।
Orchis latifolia Linn.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सावरः (सु. चि. २२.९७)
शाबरलोध्रः ।

सावरकरोध्रः (सु. उ. १८.१०१)
शाबरलोध्रः ।

सिंहः (सु. चि. ९.२७)
रक्तशोभाञ्जनः । (ड०)

सिंहपुच्छिका (रा. नि. ४.११७)
पृश्निपर्णी ।

सिंहपुच्छी (च. द. २६.७५)
पृश्निपर्णीभेदः, सा च अलाबुपत्रसदृशदीर्घपत्रा काटवासिंहपुच्छीति ख्याता' (शि.) ।

सिंहमुखी (ध. नि. १.२३)
वासा ।

सिंहली (वै. म. ३.८)
पिप्पली ।

सिंहलोमी (अ. सं. उ. ४०.५६)
'सुरसा च सुपत्रा च. बहुपत्री च तक्रला' इति । (इ०)

सिंहवल्लिका (कै. नि. १.१२)
१. वासा ।
२. रसौषधिविशेषः भूपाटल्यादि वर्गे पठितः । (र. चू. ८.४५)

सिंहस्कन्दी (अ. सं. उ. २.५३)
ओषधिविशेषः, बालशोषे परिषेचनार्थं प्रयुक्तः, यथा हिं—सिंहस्कन्दीसिंहवल्लीकरमर्दीत्रिकण्टकैः । भङ्गैः क्वाथः कुमाराणां शुष्यतां परिषेचनम् ॥' इति ।

सिंहास्यः (अ. नि. १०६)
वासकः, सिंहमुखवद् विवृतपुष्पत्वात् ।

सिंहास्या (कै. नि. १.१३)
वासा ।

सिंहिका (ध । नि. १.९३)
बृहती ।

सिंहिकाद्वयम् (भा. प्र. चि. १.८४५)
कण्टकारी बृहती च ।

सिंही (सु. उ. ३९.२१५)
१. बृहत्कण्टकारिका । (ड०)
२. बृहतीविशेषः (कै. नि. १.५७)

सिकटी (च. द. ५४.५)
ओषधिविशेषः मसूरिकायां प्रयुक्तः ।

सिगृडी (रा. नि. ४.३१)
बल्य ओषधिविशेषः यथा हि—'सिगृडी मतिदा प्रोक्ता बल्या पङ्गुत्वहारिणी । दृषत्पत्री च वातघ्नी गुच्छपुष्पी च सप्तधा ॥' इति ।

सिञ्जती (अ. सं. सू. ७.१८२)
काश्मीरेषु वृक्षबदरी । (इ.)

सिञ्जितिका (सु. सू. ४६.१३९)
सिञ्जितिकाफलं तद्(बदर)भेद एवातिमधुरो मुष्टिप्रमाण उत्तरापथजः । (ड०)

सितकर्णिकः (सु. उ. ४५.२०)
श्वेतकर्णिकारः । (ड०)

सितगन्धिनी (र. चू. ७.४)
रसौषधिविशेषः ।

सितगिरिः (च. चि. २३.९५)
श्वेतापराजिता । (चक्र.)

सिततिलः (सु. सू ४६.४०)
श्वेततिलः ।

सितनागः (आ. वि. ३, पृ. ६२५)
ओषधिविशेषः, यथा— 'क्षतघ्नः सितनागः स्याद् भग्नामयनिकृन्तनः' इति ।

सितपलाशः (रा. नि. १०.२७६)
श्वेतपुष्पः पलाशभेदः यथा हि— 'किंशुकैर्गुणसाम्येऽपि सितो विज्ञानदः स्मृतः' इति ।

सितपाटलिका (रा. नि. ९.१५२)
काष्ठपाटला ।

सितमरिचम् (च. चि. २३.१९२)
श्वेतमरिचम् । शोभाञ्जनकबीजमिति चक्रः ।

सितसारिवः (सु. उ. ४७.४१)
श्वेतसारिवा ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सितसिन्धुवारः (सु. क. ५.६६)
श्वेतनिर्गुण्डी । (ड०)

सितसूर्यावर्तः (च. द. ५.४०)
जामातृसूर्यावर्तः इति ख्यातः (नि.) ।
सफेद हुलहुल ।
Gynandropsis gynandra (Linn) Briquet.

सिताङ्कोलः (र. चू. ८.१९)
व्याघ्रिकादिगणे पठितो रसौषधिविशेषः ।

सिताबः (द्र. गु. वि. २, पृ. ६०९)
सिताब, सुद्दाब ।
Ruta graveolens Linn.

सितालुकम् (द्र. गु. वि. ३, पृ. २२०)
सकरकन्द, अलुआ ।
Ipomoea batatas (Linn) Lam.

सितेषुपुंखिका (वै. म. १८.२३)
श्वेतशरपुंखा ।

सितैरण्डः (अ. उ. १३.५४)
श्वेत एरण्डः ।

सिद्धः (सो. नि. ७.६७७)
सिद्धेश्वरः, सिध्रक इत्यर्थः । (द्र. — का. सं., पृ. ३२२)
सीधा ।

सिद्धकः (सु. क. ३.९)
सिध्रकः ।

सिद्धमूली (भा. प्र. चि. ७२.२९)
भंगा ।

सिद्धवृक्षः (प. र. ६३४)
सिध्रकः ।

सिद्धार्थः (ध. नि. ४.४२)
गौरसर्षपः ।
Yellow mustard.

सिद्धार्थयुग्मम् (अ. हृ. उ. ५.१८)
श्वेतकृष्णभेदात् । (शि.)

सिद्धेश्वरः (सो. नि. १.६७७)
सिध्रकः ।

सिध्रेकः (अ. सं. उ. ३९.७०)
सीधा ।
Lagerstroemia indica Linn.

सिन्दुकः (ध. नि. ४.८१)
सिन्दुवारः ।

सिन्दुवारः (सु. क. ४५.१६)
श्वेतनिर्गुण्डी ।

सिन्दुवारिकः (अ. हृ. उ. ३७.७५)
सिन्दुवारः ।

सिन्दूरी (रा. नि. १०.१९)

सिन्धुवारः (च. सू. ४.११)
सिन्दुवारः ।

सिन्धुवारिका (च. चि. २३.७९)
सिन्दुवारः ।

सिन्धुवारितः (अ. हृ. सू. ७.२५)
सिन्दुवारः ।

सिम्बितिका (च. सू. २७.१४२)
सिञ्चितिका ।

सियलीद्वोपरः (शि., च. द. १०.१९)
तगरपादिकाया अभावे ग्राह्यः ।
चांदमाला ।
Limnanthemum cristatum Griseb.

सिल्हकः (ध. नि. ३.२२)
शिलारस ।
Liquidamber orientalis Miller.

सीताफलम् (यो. र., पृ. १३)
शरीफा ।
Annona squamosa Linn.

सीहुण्डः (नि. शे. १.५०)
स्नुही ।

सुकण्टका (रा. नि. ५.१२)
गृहकन्या ।

सुक्कडिचन्दनम् (ध. नि. ३.६)
चन्दनविशेषः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सुखदर्शनः (आ. वि. ३.६, पृ. ४२७)
सुदर्शना ।

सुखाह्वः (क. का. १३.८७)
ओषधिविशेषः, अण्डवृद्धौ लेपे प्रयुक्तः ।

सुगन्धः (सु. क. २.५)
मूलविषम् ।

सुगन्धकः (च. सू. २७.९)
१. शालिविशेषः, देवशालिरिति डल्हणः । (सु. सू. २०.५)
२. ओषधिविशेषः सुरसादिगणे पठितः । (सु. सू. ३८.१८) 'सुगन्धको द्रोणपुष्पः, अन्ये तु सुगन्धको बृहत् सुगन्धतृणम्' इति डल्हणः ।

सुगन्धगणः (अ. प्र. ४.१८-२२)
कर्पूराद्य एकाङ्क्यन्तः सुगन्धिद्रव्याणां गणः ।

सुगन्धतृणम् (रा. नि. ८. ४४)
गन्धतृणम् ।

सुगन्धबालकम् (प्रि. नि. ३.३७)
तगरम् ।

सुगन्धा (ध. नि. ४.१०३)
१. नाकुली ।
२. कदलीविशेषः । (कै. नि. १.२९१)

सुगन्धामलकम् (ध. नि. ७.४०)
सर्वौषधिकसंयुक्ताः शुष्काश्चामलकत्वचः ।
सुगन्धामलकं ह्येतन्निर्दिशन्ति विचक्षणाः ॥' इति ।

सुगन्धिः (च. द. ६०.५६)
अगुर्वादिः (शि.) ।

सुगन्धिकः (अ.ह. सू. ६.१)
शालिविशेषः ।

सुगन्धिका (सु. चि. १७.८)
उत्पलसारिवा । (ड०)

सुगन्धित्रिफला (ध. नि. ७.५)
यथा—'जातीफलं तथैला च लवङ्गफलमेव च ।
सुगन्धित्रिफला प्रोक्ता तृतीयं तु फलत्रिकम् ॥' इति ।

सुघासः (अ. प्र. ९.८५)
सुगन्धगणे पठितः । गन्धतृणः ।

सुतश्रेणी (रा. नि. ४.१७)
द्रवन्ती ।

सुतिक्तिडी (ध. नि. ५.३३)
अम्लिका ।

सुतुङ्गः (ध. नि. ५.७४)
नारिकेलः ।

सुदर्शना (म. पा. १.३१६)
'सुदर्शना सोमवल्ली चक्राङ्का मधुपर्णिका' इति ।
'त्रिशुरीति ख्यातं, जीवपत्रेति च ख्यातम्' इति शिवदासः (च.द. ६४.६८)

सुधा (रा. नि. ८.३५५)
१. स्नुही ।
२. अमृता । (भा. प्र. चि. १.६६१)

सुधामूली (शा. नि., पृ. ९१०)
सालिमो मैसरः ।
सालम मिश्री ।

सुधालता (भा. प्र. चि. १.६६३)
गुडूची ।

सुधावासः (ड., सु. सू. ४६.२१६)
त्रपुसम्, तेवसा इति लोके ।

सुधास्रवा (रा. नि. ५.१५)
रुदन्ती ।

सुनन्दाख्या (अ. सं. सू. ८.७३)
रास्ना । (इ.)

सुनालम् (ध. नि. ३.८६)
लामज्जकम् ।

सुनिषण्णकः (सु. सू. ४६.२६२)
चतुर्दलः, तल्लक्षणं कथ्यते—'चांगेरीसदृशैः पत्रैः सुनिषण्णश्चतुर्दलः । शाको जलान्विते देशे चतुष्पत्रीति कथ्यते ॥ (ड०)
सुशनी शाक, चौपतिया ।
Marsilea minuta Linn.

सुनिषण्णच्छदा (कै. नि. १.६९७)
चाङ्गेरी ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सुपार्श्वः (ध. नि. ५.८१)
प्लक्षः ।

सुप्रसरा (ध. नि. १.२८९)
प्रसारणी ।

सुमम् (रा. नि. २.२५)
कुसुमम् ।

सुमनः (रा. नि. २.२५)
१. पुष्पम् ।
२. जाती । (सु. सू. ३७.१२)

सुमना (ध. नि. ५.१३७)
जाती ।

सुमुखः (सु. सू. ३८.१८)
राजिका, अन्ये तु वनबर्बरिका 'सउहा' इति नाम्ना जेजीभुक्तौ प्रसिद्धा । (ड०)

सुरकाष्ठम् (सु. उ. ११.६)
देवदारु ।

सुरङ्गकम् (ध. नि. ३.६)
पत्तङ्गम् ।

सुरङ्गा (रा. नि. ३.३५)
कैवर्तिका ।

सुरङ्गी (ड०, सु०सू० ३८.४५)
सुरपुन्नागः ।

सुरज्ञानः (द्र. गु. वि. २, पृ. ८०९)
Colchicum luteum Baker.

सुरतरुः (अ. चि. १९.४१)
देवदारुः ।

सुरदारु (च. सू. ३.८)
देवदारु ।

सुरदाली (रा. मा. २९.३३)
देवदाली ।

सुरद्रुमः (सु. चि. ३७.१६)
देवदारुः ।

सुरपर्णम् (रा. नि. १०.५०)
गन्धपत्रक ओषधिविशेषः ।

सुरपर्णिका (ड. सु. सू. ३८.२४)
सुरपर्णिका सुगन्धिपुष्पा दक्षिणापथे 'सुरपति' (सुरङ्गी) नाम्ना प्रतीता ।
सुरपुन्नागः । (रा. नि. १०.१०)

सुरपुन्नागः (रा. नि. १०.१०)
सुरंगी, लाल नागकेशर ।
Mammea longifolia Planch & Triana.

सुरप्रियम् (आ. वि. ३.११, पृ. ४५०)
कक्कोलम् (शीतलचीनी) ।
'एकं सुरप्रियफलं मेहमागन्तुजं हरेत्' इति भैषज्यरत्नावल्यामौपसर्गिकमेहाधिकारे ।

सुरभिः (ध. नि. ३.१३५)
शल्लकी ।

सुरभिपत्रा (ध. नि. ५.८३)
जम्बूः ।

सुरभिपाटलप्रसवा (षो. हृ. ३.१९)
पाटला ।

सुरभी (ध. नि. ४.५०)
तुलसी ।

सुरवारुणी (अ. चि. १९.८१)
इन्द्रवारुणी ।

सुरसः (च. सू. ३.८)
सुरसा (तुलसी) ।

सुरसयुगम् (अ. हृ. सू. १५.३०)
तुलसीद्वयं गौरकृष्णभेदेन । (अ. द.)

सुरसा (च. सू. ४.१६)
तुलसी, श्वासहरमहाकषाये पठिता ।
Ocimum sanctum Linn.

सुरसादिगणः (सु. सू. ३८.१८-१९)
सुरसाद्यो विषमुष्टिकान्तः श्वासकासादिषु प्रयोज्यः ।

सुरसाद्वयम् (सु. सू. ३८.१८)
सुरसे द्वे श्वेतकृष्णकुसुमे । (ड०), तुलसीद्वयमित्यर्थः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सुरसी (सु. सू. ३८.१८)
कपित्थसदृशपत्रा 'बिल्वनासी' इति लोके प्रसिद्धा। (ड०)
Limonia crenulata Roxb.

सुरा (सु. उ. ६२.३०)
इन्द्रसुरा, इन्द्रवारुणीति यावत्।

सुराख्यम् (सु. उ. ४१.४८)
देवदारु।

सुराला (अ. सू. १५.४)
सर्जरसः।

सुराष्ट्रकाः (ध. नि. ६.१०५)
कुलत्थाः।

सुराह्वम् (ध. नि. १.७६)
देवदारु।

सुराह्वयम् (अ. हृ. चि. ११.२५)
देवदारु।

सुराह्वा (च. चि. ६.२६)
इन्द्रवारुणी।

सुरेन्द्रकन्दः (सु. सू. ४६.३०५)
वज्रकन्दः। (ड०)

सुरेन्द्रवल्ली (ग. नि. १.३.२९५)
इन्द्रवारुणी।

सुलभा (सि. भे. २.१४५)
सुरसा।

सुवर्चला (सु. सू. ३७.१२)
१. सूर्यावर्तः, 'सौञ्चली' इति लोके।
२. तिलपर्णी, हुलहुल इति लोके।

सुवर्चिका (अ. उ. ३५.३९)
दूषीविषारियोगे प्रयुक्त ओषधिविशेषः।

सुवर्णः (च. चि. ७.७७)
आरग्वधः।

सुवर्णकदली (रा. नि. ११.११४)
कदलीविशेषः।

सुवर्णक्षीरी (सु. सू. ३९.४)
१. अनन्तासदृशपत्रा 'हियावलि' इति लोके। (ड०)
Euphorbi thomsoniana Boiss.
२. शृगालकण्टकः (सेयाल कांटा)।
Argemone mexicana Linn.

सुवर्णतृणम् (स. यो. ३.५४)

सुवर्णदुग्धा (अ. चि. १९.८१)
सुवर्णक्षीरी।

सुवर्णपुष्पी (शा. सं. ३.११.४०)
लाङ्गली। 'सुवर्णपुष्पी सोनीशब्दवाच्यो विटपविशेषः' इत्याढमल्लः।

सुवर्णशकला (अ. सं. चि. २२.२०)

सुवर्णहलिः (चक्र. च. सू. ४.११)
आरग्वधः।

सुवर्णालुः (श्रीकण्ठ; वृ. मा. १.९९)
आरग्वधः।

सुवर्णाहलिः (नि. च. द. ४८.७४-८२)
व्याधिघातः (आरग्वधः)।

सुवहा (च. सू ४.९)
१. त्रिवृत्। (चक्र.)
२. गन्धनाकुली। (ध. नि. ४.१०५)
३. शेफालिकाविशेषः। (रा. नि. ४.१२१)
४. हंसपादी। (रा. नि. ५.१६६)
५. रास्ना। (भा. नि. १.१६५)

सुव्रता (ध. नि. १.६१)
शटी।

सुषवी (कै. नि. १.५९४)
१. जलकारवल्ली।
२. उपकुञ्चिका। (ध. नि. २.५९)
३. कारवेल्लकः। (ड., सु. सू. ३८.६)

सुषेणः (म. नि. ७.५४)
सुनिषण्णकः।

सुषेणम् (ध. नि. ५.१०२)
करमर्दकम्।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सुषेणी (ध. नि. १. २४३)
श्यामा त्रिवत् ।
सूकरी (अ. सं. उ. ९.२१)
वाराही ।
सूक्ष्म कृष्णजीरकम् (शि., च. द. ४.६७)
कारविः ।
सूक्ष्मपत्रः (म. नि. ७.५६)
शाकविशेषः ।
सूक्ष्मपत्रा (रा. नि. ४.४३८)
शतावरी ।
सूक्ष्मपुष्पा (रा. नि. ४.३००)
शणपुष्पीविशेषः ।
सूक्ष्मैला (च. सू. ४.११)
एला ।
सूचिकापुष्पः (ध. नि. ५)
केतकी ।
सूचिपत्रः (ध. नि. १.१५५)
शितिवारः ।
सूचिपत्रकः (सु. सू. ४५.१४९)
इक्षुविशेषः ।
सूनम् (रा. नि. २.२५)
पुष्पम् ।
सूपधूपनम् (ध. नि. २.३६)
हिङ्गु ।
सूपश्रेष्ठाः (ध. नि. ६.८०)
मुद्गाः ।
सूरणः (सु. सू. ४६.३०६)
सूरन, ओल, जमीकन्द ।
Amorphophallus campanulatus Blume ex Decne.
सूर्पपर्णी (च. चि. १९.५०)
मुद्गपर्णी माषपर्णी च । (चक्र०)
सूर्यकान्ता (च. चि. १-४.७)
आदित्यपर्णी, दिव्यौषधिविशेषः, यथा हि— आदित्यपर्णी नामौषधिर्या 'सूर्यकान्ता' इति विज्ञायते सुवर्णक्षीरा सूर्यमण्डलाकारपुष्पा च' इति ।
सूर्यतरुः (रा. मा. २.४)
अर्कः ।
सूर्यभक्ता (ध. नि. ४.९८)
सुवर्चला ।
सूर्यभक्तिका (चक्र. च. सू. २७.९९)
सुवर्चला ।
सूर्यमुखी (शा. नि. १९, पृ. ८००)
सूरजमुखी ।
Helianthus annuus Linn.
सूर्यवल्ली (सु. क. २.४५)
१. पटोलसदृशपत्रा (वल्ली), यस्याः पत्ररसेनाक्तं मांसं स्विन्नमिव भवति ।
२. अर्कः । (इ., अ. सं. उ. ४०.५२)
सूर्यानुवर्तिनी (अ. र. ४.५१)
ब्रह्मसुवर्चला ।
सूर्यावर्तः (च. द. ५७.४७)
तिलपर्णी ।
सूर्याह्वयः (ध. नि. ४.१३)
अर्कः ।
सूषा (कै. नि. १. ६८२)
कासमर्दिका ।
सेफन्दः (ड., सु. सू. ३८.१६)
अपराजिता ।
सेवम् (म. नि. ६.५६)
फलविशेषः ।
सेव । Apple.
Malus pumila Mill.
सेवंती (अ. प्र. ४.३६)
गुलाबविशेषः ।
सेव्यम् (च.चि. ६.५०)
उशीरम् ।
सेहुण्डः (रा. नि. ८.३५५)
स्नुही ।
सैंहलम् (ध. नि. २.५०)
त्वक् ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सैंहली (रा. नि. ६.११९)
पिप्पलीविशेषः ।

सैरीयकः (सु. सू. ३८.७३)
सैरेयकः ।

सैरेयः (च. सू. १४.३२)
सैरेयकः ।

सैरेयकः (सु. चि. ३.६१)
कटसैरया, पियावासा ।
Barleria prionitis Linn.

सैरेयकद्वयम् (सु. सू. ३८.१०)
रक्तपुष्पनीलपुष्पकण्टशेलुआद्वयम् । (ड०)

सैरेयकत्रयम् (शा. सं. २.२.१३१)
पीतरक्तनीलपुष्पभेदात् ।

सैर्यकः (अ. हृ. सू. १५.१७)
सैरेयकः ।

सैर्यकयुग्मम् (अ. हृ. सू. १५.२१)
सैरेयकद्वयम् ।

सोभाञ्जनकः (अ. हृ. चि. १९.८६)
शोभाञ्जनः ।

सोमः (सु. सू. ३७.२)
१. दिव्यौषधिविशेषः, यथा—'सोमो नामौषधिराजः पञ्चदशपर्वा स सोम इव हीयते वर्धते च' इति ।
२. टुटगंठा (Ephedra gerardiana Wall).
३. सोमराजी । (सि. भे. ४.११६८)

सोमकला (र. चू. ६.९)
दिव्यौषधिविशेषः, यथा— 'इयं सोमकला नाम वल्ली परमदुर्लभा । अनया बद्धसूतेन्द्रो लक्षवेधी प्रजायते ॥' इति ।

सोमकल्पः (प्रि. नि. ३.१२९)
सोमः (टुटगंठा) ।

सोमत्वक् (अ. हृ. उ. ३५.४६)
सोमवल्कः ।

सोमपर्णी (अ. सं. चि. २१.१४)
उच्चटा (ड०), यथा निघण्टौ—'उच्चटा सोमपर्णी च प्रचला तलला तथा' इति ।

सोमराजी (ध. नि. १.१६५)
बाकुची ।

सोमवल्कः (च. सू. ४.३३)
श्वेतखदिरः (कदरः), कट्फलो वा ।

सोमवल्कलः (कै. नि. १.८२५)
श्वेतखदिरः ।

सोमवल्लिका (र. चू. ८.२१)
रक्तस्नुह्यादिगणे पठितो रसौषधिविशेषः ।

सोमवल्ली (रा. नि. ३.२९)
१. सोमलता ।
Sarcostemma brevistigma W. & A.
२. दिव्यौषधिविशेषः, यथा— 'पञ्चाङ्गयुक्पञ्चदशच्छदाढ्या सर्पाकृतिः शोणितपर्वदेशा । सा सोमवल्ली रसबन्धकर्म करोति एका दिवसोपनीता ॥' इति (र०चू० ६.६) । इयं चरकोक्तः सोम एव प्रतीयते ।

सोमवृक्षः (सु. चि. ११.७)
१. कट्फलः ।
२. दिव्यौषधिविशेषः । (र. चू. ६.७)

सोमसरला (सु. सू. ३७.२४)
सोमवल्ली ।

सोमा (सु. क. १.३७)
सोमवल्ली ।

सोहला (अ. सं. उ. १६.६४)
अपराजिता (इ.)—यथा 'सोहला दधिशमी ज्ञेया ज्ञेया सैवापराजिता' इति ।

सौगन्धिकम् (रा. नि. १०.२४८)
१. नीलोत्पलम् ।
२. गन्धतृणं गन्धको वा । (चक्र. च. सू. ३.१०)

सौगन्धी (हा. १.१५.२)
शालिभेदः ।

सौभाञ्जनः (अ. हृ. चि. १५.८७)
शोभाञ्जनः ।

सौभाञ्जनकः (अ. हृ. चि. ३.१३६)
शोभाञ्जनकः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सौमनस्यायनी (च. वि. ८.१३५)
यूथिका ।

सौम्या (रा. नि. ३.३१)
सोमवल्ली ।

सौरः (ध. नि. २.४२)
तुम्बुरुः ।

सौरभः (ध. नि. २.४२)
तुम्बुरुः ।

सौरभम् (रा. नि. २.२७)
परिमलः ।

सौरभ्यम् (रा. नि. २.२७)
परिमलः ।

सौराष्ट्रिकः (ध. नि. १.१००)
विषभेदः । 'सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते' इति ।

सौरीयकम् (सु. क. २.५)
स्थावरविषविशेषः ।

सौवीरम् (सु. सू ४६.१३९)
महत्तममामपक्वावस्थासु मधुरं मरुदेशजम् । (ड०)
बदरभेदः ।

स्कन्धजः (ध. नि. ५.७६)
वटः । स्कन्धाज्जायन्ते फलानीत्यतः ।

स्तबकः (रा. नि. २.२७)
पुष्पगुच्छः ।

स्तम्बः (रा. नि. २.३१)
गुल्मः ।

स्त्रीनिरीक्षणदोहदः (नि. शे. १.७)
तिलकः ।

स्त्रीपादाहतिदोहदः (नि. शे. १.३)
अशोकः ।

स्थपनी (अ. सं. सू. १६.२७)
पाठा ।

स्थलकमलम् (कै. नि. १.१४३६)
पुष्पविशेषः ।

स्थलकुम्भिका (ड., सु. चि. १७.२७)
कुम्भीकः । 'श्लक्ष्णत्वक्को रोमशः कुम्भीनामा वृक्षः यस्य त्वग् वस्त्राकारा भवति (ड०, सु. सू. ३८.४५); दाडिमाकारफला स्थलकुम्भी । (ड०, सु. सू. ३.१०)

स्थलपद्मम् (च. द. ३९.१९)
१. माणकन्दः ।
२. गुलाबम् । (सि भे. ४.१३६)

स्थलपद्मिनी (र. चू. ६.१०)
दिव्यौषधिविशेषः, तल्लक्षणं यथा— 'या पद्मिनीरूपधरा स्थलस्था पुष्पेण वर्णेन रसायनी च । बध्नाति सूतं वरबीजयुक्तं निर्दिश्यते सा स्थलपद्मिनीति ॥' इति ।

स्थलप्रसारिणी (र. चू. ७.२)
रसौषधिविशेषः ।

स्थलशृङ्गाटः (वै. म. ७.३)
गोक्षुरः ।

स्थलशृङ्गाटकः (रा. नि. ३.१३२)
गोक्षुरः ।

स्थविरम् (अ. हृ. चि. ३.१३५)
शैलेयम् । (अ. द.)

स्थापनी (अ. नि. ३५)
पाठा ।

स्थिरा (ध. नि. १.८७)
शालपर्णी ।

स्थिरादिगणः (चि. क. ५१)
पित्तवातघ्नो गणः, यथा— स्थिरापृथक्पर्णिपुनर्नवाभिस्त्रिकण्टकैरण्डजटोच्चटाभिः । ।विदारिकानागबलावरीभिरयं गणः पित्तसमीरघ्नः ॥' इति ।

स्थिरादिपञ्चमूलम् (च. चि. ८.१३३)
लघुपञ्चमूलम् ।

स्थिरादिपञ्चमूली (च. सि. ९.८)
लघुपञ्चमूलम् ।

स्थिरे (सु. क. ६.९)
शालपर्णीपृश्निपर्ण्यौ ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्थूलकन्दः (सु. सू. ४६.३०६)
ग्राम्यकन्दः । (ड०)

स्थूलकाकादनी (अ. चि. १७.२७)
ओषधिविशेषः, काकादनीभेदः ।

स्थूलकृष्णजीरकः (शि., च. द. ४.६७)
उपकुञ्चिका ।

स्थूलजीरकः (ध. नि. २.५९)
उपकुञ्चिका ।

स्थूलदला (रा. नि. ५.१२)
गृहकन्या ।

स्थूलपत्रा (प्रि. नि. ३.१७)
पर्णयवानी ।

स्थूलबदरी (चक्र., च.सू. २५.४९)
कुवलम् ।

स्थूलबब्बूलिका (शा. सं. २.१.१२)
बब्बूलभेदः ।

स्थूलबृहती (कै. नि. १.५९)
बृहतीविशेषः ।

स्थूलभण्टाकी (ध. नि. १.९३)
बृहती ।

स्थूलमध्यः (अ. नि. ३३३)
यवः ।

स्थूलमरिचम् (रा. नि. १२.६९)
कङ्कोलम् ।

स्थूलश्यामाकः (ड., सु. सू. ४६.२१)
उष्ट्रश्यामाकः, श्यामाकभेदः ।

स्थूलैरण्डः (रा. नि. ८.४४९)
एरण्डविशेषः ।

स्थूलैला (ध. नि. २.४६)
बृहदेला ।

स्थौणेयकम् (च. चि. ३.२६७)
थुनेर ।
Taxus baccata Linn.

स्नुक् (ध. नि. १. २३५)
स्नुही ।

स्नुही (च. सू. १.११४)
सेंहुड, थूहर ।
Euphorbia neriifolia Linn.

स्नेहफलाख्यम् (अ. द., सू. ६.१२०)
अक्षोडम् ।

स्पर्शरोदनिका (ड., सु. चि. ९.७)
समङ्गा (लज्जालुः) ।

स्पर्शसंकोचपर्णिका (ध. नि. ४.१०९)
समङ्गा (लज्जालुः) ।

स्पृक्का (सु. सू. ३८.२४)
कुटिलपुष्पा सुगन्धिद्रव्यमौत्तरापथिकम् । (ड०)
असबरग ।
Delphinium zalil Aitch. & Hemsl.

स्पृष्टरोदिका (अ. सं. उ. २.३९)
लज्जालुका । (इ०)

स्फटिकः (ध. नि. ३.३१)
१. कर्पूरः ।
२. रसविशेषः । (रा. नि. १४.५४)

स्फुटकः (च. द. ६४.१३)
ओषधिविशेषः, बालानामनामकरोगे हितः ।

स्फूर्जकः (सु. चि. ५.१८)
१. फणिज्जकाकारः प्रायशः पारियात्रे भवति । (ड०)
फोग । Calligonum polygonoides Linn.
२. तिन्दुकः । (ध. नि. ५.४०)

स्फूर्जातकम् (अ. सं. चि. २३.१७)
स्फूर्जकः । काकतिन्दुकमितीन्दुः ।

स्फूर्दनः (सो. नि. १.६७४)
स्फूर्जकः ।

स्फोटहेतुः (अ. चि. २०.११)
भल्लातकः ।

स्फोट्याभुजंगमः (स. यो. १.५०४)
Scindapsus officinalis Schott.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्यन्दनः (रा. नि. ९.२४)
तिनिशः ।

स्याराटम् (अ. द. सू. ६.१२०)
अभिषुकम् ।

स्योनाकः (अ. हृ. उ. ५.१६)
श्योनाकः ।

स्रंसि (ध. नि. ३.३९)
पूगम् ।

स्रस्तरी (सो. नि. २.३१८)
गुणसङ्ग्रहे पठित ओषधिविशेषः, यथा—'स्रस्तरी सर्वदोषघ्नी रुच्याग्निदीपनी परम् । कटुपाकरसा हृद्या पथ्यातीसारिणां तु सा ॥' इति ।

स्रावकम् (श. च. १.१६१)
मरिचम् ।

स्राविका (आ. वि. ३.१३, पृ. ४५७)
अन्नामयः ।

स्राविणी (च. द. २३.७५)
वातरक्ताधिकारे बृहद्गुडूचीतैले पठिता ।

स्रुग्दारुः (प.र. ३४०)
विकङ्कतः ।

स्रुवतरुः (कै. नि. १.४०४)
विकङ्कतः ।

स्रुववृक्षः (अ. सू. १५.१७)
विकङ्कतः ।

स्रुवावृक्षः (भा. नि. ५.८६)
विकङ्कतः ।

स्वगुप्ता (च. चि. ११.४५)
कपिकच्छूः ।

स्वयंगुप्ता (च. चि. १.१.५८)
कपिकच्छूः ।

स्वयंप्रभः (सु. चि. २९.६)
सोमभेदः ।

स्वरालुः (श. च. १.१५८)
वचा ।

स्वर्णक्षीरिणी (च. सू. ४.९)
स्वर्णक्षीरी ।

स्वर्णक्षीरी (ध. नि. १.२४२)
सुवर्णक्षीरी ।

स्वर्णगन्धा (रा. मा. ५.२१)
ओषधिविशेषः मुखलेपे प्रयुक्तः ।

स्वर्णजीवन्ती (शा. नि. ३, पृ. २१४)
जीवन्तीविशेषः ।

स्वर्णः (रा. मा. ५.२३)
आरग्वधः ।

स्वर्णधुस्तूरः (भै. र. ६.९)
पीतबीजो धत्तूरः ।

स्वर्णपत्री (प्रि. नि. ३.६२)
सनाय ।
Cassia angustifolia Vahl.

स्वर्णपुष्पः (रा. नि. ९.३३४)
आरग्वधः ।

स्वर्णभूमिकम् (कै. नि. १.१३३५)
वराङ्गम् । स्वर्णभूमौ द्वीपविशेषे जातम् ।

स्वर्णयूथिका (च. सि. १०.३१)
यूथिकाभेदः स्वर्णपुष्पः ।

स्वर्णवल्ली (भा. नि. ३.१४८)
सोनबेल ।

स्वर्णसुमः (षो. हृ. ३.२९)
आरग्वधः ।

स्वर्णुली (रा. नि. ४.३०)
यथा—'स्वर्णुली हेमपुष्पी स्यात् स्वर्णपुष्पध्वजा तथा' इति ।

स्वल्पहपुषा (शा. नि. २., पृ. ११७)
हपुषाभेदः ।

स्वस्तिकः (हृ. दी. ९४)
सुनिषण्णकः ।

स्वादुकण्टकः (च. वि. ८.१३५)
विकङ्कतः । (ध. नि. ५.४३)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्वादुकन्दा (ध. नि. १.१४७)
विदारी ।

स्वादुतुण्डिका (रा. नि. ७.३०४)
मधुरबिम्बी ।

स्वादुत्रिफला (ध. नि. ७.३)
द्राक्षाखर्जूरकाश्मर्यफलानीति फलत्रयम् । सैव स्वादुर्द्वितीया तु त्रिफला त्रैफला स्मृता ॥' इति ।

स्वादुपटोली (रा. नि. ७.७७)
पटोलविशेषः ।

स्वादुपत्रफला (ध. नि. १.५१)
पटोलविशेषः ।

स्वादुमज्जः (ध. नि. ५.६०)
अक्षोटः ।

स्वादुमस्तका (ध. नि. ५.५३)
खर्जूरी ।

स्वादुवर्गः (अ. ह्. चि. ७.२१)
मधुरवर्गो जीवनीयः ।

स्वाद्वीफलम् (सि. भै. ४.३०३)
छुहाडा ।

ह

हंसपदी (च. चि. २३.२२०)
हंसपादी ।

हंसपादिका (र.चू. ८.१६)
रसौषधिविशेषः, व्याघ्रिकादिगणे पठितः ।

हंसपादी (सु. सू. ३८.४)
मधुस्रवा हंसपदाकारपत्रा पीतपुष्पा जलयुक्तदेशजाता 'हंसपाई' इति लोके प्रसिद्धा (ड०) । हंसराज ।
Adiantum lunulatum Burm.

हंसहेली (अ. प्र. ८.१)
वशीकरणे प्रयुक्त ओषधिविशेषः ।

हंसाह्वया (सु चि. १८.४७)
हंसपादी ।

हट्टविलासिनी (श. च. १.२३५)
हट्टमापणं वर्णोत्कर्षेण विलासयति विशेषेण शोभयतीति । हरिद्रा ।

हनूमन्ती (र. चू. ८.१५)
व्याघ्रिकादिगणोक्तो रसौषधिविशेषः ।

हयपुच्छिका (रा. नि. ३.१७०)
हयस्याश्वस्य पुच्छमिव रोमशानि पर्णान्यस्या इति । माषपर्णी ।

हयमारः (ध. नि. ४.१)
हयमश्वं मारयति विषत्वादिति । करवीरः ।

हया (भै. र., पृ. ३७२)
अश्वगन्धा ।

हयारिः (सो. नि. २.३८८)
करवीरः, अश्वमारकत्वात् । यथोक्तं— 'हयारिर्व्रणकुष्ठार्शःशोफत्वग्दोषरक्तनुत्' इति गुणसङ्ग्रहे ।

हरमलम् (द्र. गु. वि. २, पृ. ६०७)
हरमल ।
Paganum harmala Linn.

हरशृङ्गारः (प्रि. नि. १.१९०)
शेफाली । हरसिंगार । 'कुङ्कुमाभानि वृन्तानि धवलं सुमनोदलम् । अतुल्यमस्ति सौन्दर्यं फुल्ले शेफालिकासुमे ॥' इति ।

हरिंगरी (स. यो. २.४८)
हरितमञ्जरी ।

हरिक्रान्तिः (स. यो. १.२८९)
विष्णुक्रान्ता ।

हरिचन्दनम् (श. च. १.२२५)
पीतसारम्, चन्दनविशेषः (रा. नि. १२.१९) । कालीयकम् (ध. नि. ३.८) । सोढलनिघण्टौ यथा—'नारायणप्रिये पीतं पीताभं हरिचन्दनम् । कालीयं पीतकाष्ठञ्च' इति ।

हरितमञ्जरी (वै. म. १६.७२)
कुप्पी, आमाभाजी ।
Acalypha indica Linn.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

हरितशाकः (ध. नि. ४.३९)
शिग्रुः ।

हरिद्रापत्रकन्दका (ध. नि. १.६५)
शटीविशेषः ।

हरिद्रुः (रा. नि. ९.२६)
हलदू ।
Adina cordifolia Benth & Hook .f.
अस्य वर्णनं यथा—'हरिद्रुः पीतदारुः स्यात् पीतकाष्ठश्च पीतकः । कदम्बकः सुपुष्पश्च सुराह्वः पीतकद्रुमः ॥' इति ।
हरिः पिङ्गः पीतो वा द्रुरस्येति रामाश्रमी ।

हरिपर्णम् (ध. नि. ४.३३)
मूलकम् । भस्मार्कचूर्णे हरिपर्णकन्दस्य प्रयोगः । (ग. नि. १.३.२९६)

हरिमञ्जरी (स. यो. २.१५२)
हरितमञ्जरी ।

हरिमन्थः (ध. नि. ६.१०१)
हरीणामश्वानां कृते मन्थे प्रयुज्यमानः । चणकः ।
सुश्रुतेऽपि—'स्वादुपाकरसं शाकं दुर्जरं हरिमन्थजम्' इति (सु. सू. ४६.२७७)

हरिवालुकम् (ध. नि. ३.७६)
एलवालुकम् ।

हरिवृक्षः (सु. चि. ११.१०)
इन्द्रवृक्षः, कुटजः ।

हरीतकी (च. सू. १३.९२)
हरति मलान् दोषांश्चेति ।
हरड़, हर्रे ।
Terminalia chebula Retz.

हरेणुः (च. सू. २७.२८)
१. वर्तुलकलायः (चक्र.), स्वल्पवर्तुल इति मदनविनोदे (१०.३९), डल्हणे च (सु. सू. ४६.२७) ।
२. ओषधिविशेषः । (च. सू. ३.५)

हरेणुका (सु. सू. ३८.२४)
एलादिगणे पठितो गन्धद्रव्यविशेषः । वाग्भटेनैलायुग्मेऽन्तर्भावितत्वात् स्थूलैला; डल्हणस्तु रेणुकेति । अष्टाङ्गनिघण्टौ च—'भद्रैला बृहदेला तु स्थूलैला त्रिपुटोद्भवा । सुहेला च सुषेणी च रेणुका कान्तनामिका ॥' इति ।

हलदिका (ध. नि. १.५५)
हरिद्रा ।

हलिनी (ध. नि. ४.९)
हलाकारमूलत्वात्, कलिकारी ।

हस्तजोडिः (शा. नि. १०, पृ. ७१०)
हत्थाजोड़ी ।
Selaginella involvens Spring.

हस्तिकन्दः (रा. नि. ७.३५)
हस्तिकर्णपलाशः ।

हस्तिकर्कोटकम् (मा. द्र. २२.३१)
बृहत्फलं कर्कोटकम्, यथोक्तं—'हस्तिकर्कोटकं तद्वद् गुणैस्तत्तु बृहत्फलम्' इति ।

हस्तिकर्णः (सु. सू. ३९.९)
गजकर्णाकारैकपत्रः 'भूपलाश' इति लोके । (ड०)
हस्तिकर्णपलाशः ।

हस्तिकर्णपलाशः (च. द. ६६.१९)
हस्तिकर्णवत् पत्राण्यस्येति ।
हथकन ।
Leea macrophylla Roxb.

हस्तिकारवी (रा. नि. ६.१५०)
अजमोदा ।

हस्तिकोलम् (कै. नि. १. ३५७)
बृहद्बदरम्, यथोक्तं — 'हस्तिकोलं हिमं स्वादु पित्तघ्नं तुवरं गुरु । संग्राहि रोचनं स्निग्धं विबन्धाध्मानपुष्टिदम् ॥' इति ।

हस्तिकोली (कै. नि. १.३५३)
सिञ्चितिका, बदरविशेषः । हस्तिकोलिः घोण्टेति निश्चलः (च. द. ४३.६) ।

हस्तिदन्तकम् (ध. नि. ४.३३)
गजदन्ताकृतिकन्दत्वात्, मूलकम् ।

हस्तिदन्तफला (ध. नि. १.१७६)
गजदन्ताकृतिफलत्वात्, उर्वारुः कर्कटीत्यर्थः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

हस्तिदन्ती (च. सू. १.७७)
मूलिन्योषधिर्विरेचनी । नागदन्ती ।

हस्तिपर्णिनी (ध. नि. १.१७५)
१. त्रपुसम् ।
२. मोरटः । (चक्र., च.सू. १.८४)

हस्तिपिप्पली (च. वि. ८.१४२)
गजपिप्पली ।

हस्तिमयूरिका (ध. नि. २.९८)
अजमोदा ।

हस्तिशुण्डा (श. च. १.९८)
हस्तिशुण्डाकारपुष्पमञ्जरीत्वात् । हस्तिशुण्डी ।

हस्तिशुण्डी (रा. नि. ५.२०)
द्र. - हस्तिशुण्डा ।
Heliotropium indicum Linn.

हस्तिश्यामाकः (च. सू. २७.१७)
श्यामाकभेदः ।

हस्त्यालुकम् (सु. सू. ४६.२९८)
आलुकविशेषः । 'हस्त्यालुकं महत् काष्ठालुकमित्येके' इति डल्हणः ।

हायनकः (सू. सु. २१.२३)
घोटकपुच्छः, स च. शालिविशेषः । (ड०)

हायनाः (च. सू. २७.१२)
शालिविशेषाः ।

हारहूरा (भा. प्र. चि. १.६४७)
द्राक्षा ।

हारिद्रः (ध. नि. ७.१११)
विषभेदः, यथा—'हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः' इति ।

हारिद्रकः (म. पा. ५.५८)
हरिद्रुः, यथा—'हारिद्रकः पीतवर्णः श्रीमान् गैरद्रुमो वरः' इति ।

हालाहलम् (च. चि. २३.१३)
मूलजविषविशेषः ।

हिंस्रा (सो. नि. १.६८०)
गृधनखी ।
हैंस, काला कड़ा ।
Capparis sepiaria Linn.

हिङ्गु (च. सू. ४.१८)
हींग ।
Ferula foetida Regel.

हिङ्गुनिर्यासः (च. सू. ४.९)
१. हिङ्गु ।
२. निम्बः; हिङ्गुवन्निर्यासोऽस्येति (प. र., ७४) ।

हिङ्गुपत्रिका (च. चि. ९.६६)
हिङ्गुपत्री ।

हिङ्गुपत्री (ध. नि. २.३८)
बाष्पिका ।

हिङ्गुपर्णी (च. चि. ९.५७)
हिङ्गुपत्री ।

हिङ्गुशिवाटिका (च. चि. १५.१०९)
नाडीहिङ्गु । (ध. नि. २.४०)

हिज्जलः (भा. नि. ३.१३८)
समुद्रफलम्, निचुलः; उक्तं हि—'जलेवतसवद् वेद्यो हिज्जलोऽयं विषापहः' इति ।

हिज्जुलः (रा. नि. ८.७०)
हिज्जलः ।

हिन्तालः (रा. नि. ९.९७)
तालविशेषः ।
हितल ।
Phoenix paludosa Roxb.

हिमः (ध. नि. ३.३१)
कर्पूरः ।

हिमम् (सु. उ. ४२.७१)
चन्दनम् ।

हिमकर्पूरः (कै. नि. १.१२८४)
कपूरविशेषः, यथा— 'वृष्यश्च धवलः शीतः कर्पूरो हिमसंज्ञकः' इति ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

हिमवालुकः (ध. नि. ३.३१)
कर्पूरः ।

हिमावती (ध. नि. १.२४०)
काञ्चनक्षीरी ।

हिमावली (रा. नि. ६.१८)
कङ्कुष्ठः, यथोक्तं—'हिमावली च हृद्धात्री कुष्ठघ्नो रङ्गकुष्ठकः । अङ्गारग्रन्थिको ग्रन्थी ग्रन्थिलो वसुसंज्ञकः ॥' इति ।

हिमोद्भवा (रा. नि. ६.८७)
शटी ।

हिरण्यः (कै. नि. १.१४१०)
सुवर्णवर्णः गुग्गुलुविशेषः ।

हिरवी (स. यो. २.२०)
कङ्कुष्ठः ।

हिरण्यपुष्पी (सु. शा. १०.११)
कलिकारिका । (ड०)

हिरिवेरिका (स. यो. १.१४४)
ह्रीबेरम् ।

हिलमोचिका (मा. द्र. २२.५२)
यथा—'भेदनी कफपित्तघ्नी कुष्ठघ्नी हिलमोचिका' इति ।
हेलञ्ज, हेञ्च ।
Enhydra fluctuans Lour.

हिलमोची (कै. नि. १.१११०)
हिलमोचिका, यथा—'हिलमोची शङ्खधरा जलब्राह्मी प्रकीर्तिता' इति ।

हिस्फित्थः (ड., सु. चि. ६.८)
मेथिकाभेदः, अश्वबला ।

हीरिणी (र. चू. ७.५)
रसौषधिविशेषः ।

हुतभुक् (सु. उ. ४२.२९)
चित्रकः ।

हुताशः (सु. उ. ४१.४७)
चित्रकः ।

हुताशनः (सु. चि. ३७.८)
चित्रकः ।

हुलहुलः (ड., सु. सू. ३९.९)
तिलपर्णी ।

हुलहुलिका (चक्र., च. सू. २७.९७)
तिलपर्णिका ।

हृत्पत्री (द्र. गु. वि. २, पृ. २०३)
Digitalis purpurea Linn.

हृद्धात्री (रा. नि. ६.१८)
हिमावली ।

हृद्रोगवैरी (श. च. १.५५)
अर्जुनः ।

हेम (च. सू. ३.२८)
१. नागकेशरम् ।
२. धत्तूरः ।
३. सुवर्णम् ।

हेमक्षीरी (च. चि. २५.५२)
स्वर्णक्षीरी, कङ्कुष्ठमिति चक्रः ।

हेमदण्डिका (र. चू. ८.३४)
रसबन्धने प्रयुक्त ओषधिविशेषः ।

हेमदुग्धः (ध. नि. ५.८६)
उदुम्बरः ।

हेमदुग्धा (च. क. १२.२३)
स्वर्णक्षीरी । (ध. नि. १.२४०)

हेमपुष्पम् (अ. नि. ६२)
नागकेशरम् ।

हेमली (र. चू. ८.१३)
व्याघ्रिकादिगणोक्तो रसौषधिविशेषः ।

हेमवल्लरिका (र. चू. ८.२५)
रक्तस्नुह्यादिगणे पठितो रसौषधिविशेषः ।

हेमवल्ली (र. चू. ८.४०)
१. रसौषधिविशेषः, तल्लक्षणं यथा—'ताम्बूलीपत्रवत्पत्रा स्वर्णवर्णपयस्विनी । फलपुष्पादिहीना च हेमवल्लीति सा मता ॥' इति ।
२. स्वर्णजीवन्ती । (रा. नि. ३.१४)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

हेमा (रा. नि. ३.१३)
स्वर्णजीवन्ती ।

हेमाङ्गः (सु. चि. २५.३९)
आरग्वधः ।

हेमाह्वा (ध. नि. १.२४२)
स्वर्णक्षीरी ।

हेपूरम् (स. यो. १.४६२)

हेरम्बः (शा. नि., पृ. ९२७)
यथा—'हेरम्बः खरपत्रः स्यात् कण्टकी दन्तधावनः' इति । हेरंब - वज्रदन्ती ।

हेलञ्ची (श. च. १.२९१)
हिलमोचिका ।

हैमः (ध. नि. १.३३)
किराततिक्तः; हिमवत्प्रदेशे जातत्वात् ।

हैमवतः (प्रि. नि. ३.७)
कृष्णजीरः, हिमवत्प्रदेशसंभूतत्वात् ।

हैमवता गन्धाः (सु. चि. ४.२९)
उत्तरापथसंभूताः; ते पुनः कस्तूरीशटीकुष्ठमांसी-सरलदेवदारुमुरादयः । (ड०)
हिमालयभूता अगुरुकुष्ठक्षेमकादयः । (चक्र., च. चि. २८.१६५)

हैमवती (अ. नि. १९७)
१. स्वर्णक्षीरी ।
२. श्वेतवचा । (ध. नि. २.६)
३. हरीतकी । (ध. नि. १.२०५)

होग्गलः (चक्र. च. वि. ८.१३५)
पोटगलः ।

ह्रस्वगवेधुका (ध. नि. १.२८४)
नागबला ।

ह्रस्वतिन्दुकम् (स. यो. ५.१८)

ह्रस्वपञ्चमूलम् (अ. ह्र. सू. ६.१६८)
लघु पञ्चमूलम्, यथा—
'ह्रस्वं बृहत्यंशुमतीद्वयगोक्षुरकैः स्मृतम्' इति । अत्र बृहतीद्वयं बृहती कण्टकारी च, अंशुमतीद्वयञ्च शालपर्णीपृश्निपर्ण्यौ । (द्र. - च. चि. १७.९६)

ह्रस्वपञ्चमूली (च. सि. १२.१६(२))
लघुपञ्चमूलम् ।

ह्रस्वशिग्रुकः (सु. उ. २६.२९)

ह्रीबेरम् (ध. नि. १.४७)
बालकम् ।

ह्लादा (ध. नि. ३.१३५)
शल्लकी ।

काण्डमाद्यमिदं नाम्नां पर्यायाणाञ्च सर्वतः ।
साभिज्ञानन्तु द्रव्याणां सार्थकं पूर्णतामगात् ॥

इति प्रियव्रतशर्मकृते द्रव्यगुणकोषे द्रव्यकाण्डं प्रथमम् ॥१ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

द्वितीयं गुणकाण्डं सकर्मकम्

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust



Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अ

अकण्ठ्यः (च. सू. २५.४०)

कण्ठाय हितः कण्ठ्यः, न कण्ठ्यः अकण्ठ्यः, कण्ठाय अहितः स्वरभेदजनकत्वेनेत्यर्थः ।

'आमं कपित्थमकण्ठ्यानाम्' इति चरकः ।

गले के लिए अहितकर ।

Unwholesome to throat.

अक्लेदि (च. सू. ६.४०)

क्लेदरहितम्, अनार्द्रमित्यर्थः ।

आर्द्रतारहित ।

Free from humidity and moisture.

अक्षिसंमीलनम् (च. सू. २६.४३ (२)

अक्षिणी निमीलयतीति । अम्लरसस्य कर्म ।

आँख झँपना ।

Eye blinking.

अक्ष्युपघातकरः (च. वि. १.१७)

अक्ष्णोरुपघातं क्रियानाशं करोतीति, यथोक्तं — क्षारोऽतिप्रयुक्तः केशाक्षिहृदयपुंस्त्वोपघातकरः संपद्यते ।

दृष्टिनाशक ।

Destryoing eye (vision).

अगदः (च. चि. २३.२३२)

१. विषप्रतीकारः, अन्ये विषगरवैरोधिकसंप्रयोगो गदः, गदस्याभावोऽगदः । (ड., सु. सू. १.७)

विषघ्न औषध । Anti-poison.

२. औषधम् (अ. को. २.६.५०) । Drug.

अग्निः (च. सि. १.१७)

अग्निदीप्तिरिति यावत्, सम्यग्विरिक्तलक्षणे ।

अग्निदीप्ति ।

Stimulating digestion and appetite.

अग्निकृत् (च. सि. १.२७)

अग्निदीप्तिकरः ।

अग्निदीपन ।

Stimulating digestion and appetite.

अग्निजननः (च. सू. २७.२५४)

अग्निं जनयतीति, यथोक्तं — 'लाजमण्डोऽग्निजननः' इति । नष्टाग्नेरभिव्यञ्जकोऽग्निजननः, अग्निदीपनस्तु मन्दाग्नेरिति भेदः । ग्रहणीरोगेऽपि 'क्षारोऽग्निजननो वरः' इति (च. चि. १५.१८३), पेया स्वेदाग्निजननी' (च. सू. २७.२५०) इति च ।

अग्निव्यञ्जक ।

Manifesting digestive fire.

अग्निजित् (च. सू. २७.१५९)

अग्निसादनम् । उक्तं हि — श्लेष्मलं गुरु विष्टभि चाङ्कोटफलमग्निजित्' इति ।

अग्निमान्द्यकर ।

Depressing digestive fire.

अग्निदीपनः (च. चि. ८.१२४)

अग्निं दीपयतीति अग्निदीपनः वह्निसंधुक्षणः । यवाग्वोऽग्निदीपना अभिहिताः, चरके यथा—

'ताश्च भेषजसंयोगाल्लघुत्वाच्चाग्निदीपनाः' (च. चि. ३.१५१) इति । मद्यमपि अग्निदीपनम् (च. चि. २४.११९) ।

(द्र०-दीपनः)

अग्नि का दीपन ।

Stimulating digestive fire.

अग्निप्रसाधकः (सु. चि. १२.१८)

अग्निं प्रकर्षेण साधयति दीपयतीति । अग्निदीपनः ।

अग्निदीपन ।

अग्निबलप्रदः (च. सू. २५.५०)

अग्नये बलं प्रददातीति, मान्द्यमपहृत्य तैक्ष्ण्यमापादयतीति भावः यथा प्रवरासवाः ।

अग्निबलवर्धक ।

Strengthening digestive fire.

अग्निबलवृद्धिः (च. चि. १४.२४७)

अग्निबलं पाचनशक्तिः, तस्य वृद्धिरिति । यथोक्तमर्शोरोगचिकित्सोपसंहारे — 'यद् वायोरानुलोम्या यदग्निबलवृद्धये । अन्नपानौषधद्रव्यं तत् सेव्यं नित्यमर्शसैः ॥' इति ।

अग्निबल की वृद्धि ।

Promoting strength of digestive fire.

अग्निमार्दवकरः

अग्नेस्तैक्ष्ण्यं निराकृत्य मदिवं जनयति यथोक्तं चरके — 'फलानां तैलयोनीनामुल्कुञ्चाश्च सशर्कराः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मार्दवं जनयन्त्यग्नेः स्निग्धाः मांसरसास्तथा ॥' इति। (च. चि. १५.२२७)

अग्नि को मृदु बनाने वाला।

Making the digestive fire mild.

अग्निवर्धनः (च. चि. ११.९०)

क्षीणमग्निं वर्धयतीति, धान्यादिषाडवो यक्ष्मिणामग्निवर्धनः प्रोक्तः। मेध्यरसायनान्यपि अग्निवर्धनानि (च. चि. १.३.३१)। 'वातघ्नेषूत्तमं बल्यं त्वच्यं मेधाग्निवर्धनम्' इति च तैलगुणे (च. सू. २७.२८७)।

अग्निवर्धक।

Promoting digestive fire.

अग्निविवर्धनाः (च. सू. २७.६९)

अग्निं विशेषेण वर्धयन्ति यथा लावाः, घृतमप्यग्निविवर्धनम् (च. सू. २७.२३१); ग्रहणीदोषे पिप्पल्यादिचूर्णमग्निविवृद्ध्यर्थं पिबेदिति चरकः।

(च. चि. १५.१०६-७)

अग्नि का विशेष रूप से वर्धक।

Specifically promoting digestive fire.

अग्निवृद्धिकरम् (सु. सू. ४५.१०३)

अग्निदीपनम्।

अग्नि को दीप्त करने वाला।

अग्निवैषम्यकरः (च. सू. २५.४०)

जाठराग्नेः वैषम्यं जनयतीति। विषमाशनमग्नि-वैषम्यकराणामग्र्यमुक्तम् इति। अग्निवैषम्यलिङ्गन्तु — 'कदाचित् पच्यते सम्यक् कदाचिन्न विपच्यते' इति, ततु वातप्राधान्यात्।

अग्नि को विषम करने वाला।

Making digestive fire irregular.

अग्निसंदीपनम् (च. चि. १४.११८)

अग्निं सम्यग् दीपयतीति।

अग्निदीपनम्।

अग्नि को सुचारु रूप से दीप्त करने वाला।

अग्निसंधुक्षणः (च. सू. २५.४०)

अग्निदीपनः। अग्निं संधुक्षयति व्यजनेनेव प्रज्वालयति इत्यर्थः। उक्तञ्च— यथाग्न्यभ्यवहारोऽग्निसंधुक्षणानामग्र्यः इति। तथा च 'कषायाः सर्व एवैते सर्पिषा सह योजिताः। प्रयोज्या ज्वरशान्त्यर्थमग्निसंधुक्षणाः शिवाः' इति।

(च. चि. ३.२१८)

अग्निदीपन।

Stimulating digestive fire as if by fanning.

अग्निसमम् (च. चि. १.२.१७)

कर्मणि अग्निसमं यथा भल्लातकफलम्। 'भल्लातकास्थ्यग्निसमं तन्मांसं स्वादु शीतलम्' इति च (च. सू. २७.१६५), अग्नेः साम्यं तीक्ष्णोष्णतया, दाहस्फोटकर्तृतयेति चक्रः।

अग्नि के समान।

Fire-like (hot and sharp)

अग्निसादनम् (सु. सू. ४५.१२०)

अग्निमान्द्यकरम्। (ड०)

अग्नि को मन्द करने वाला।

Depressing digestive fire.

अग्निहिततमाः (च. सू. २७.६४)

अग्निदीपकत्वेन सर्वाधिको हितः, यथोक्तं — 'दर्शनश्रोत्रमेधाग्निवयोवर्णस्वरायुषाम्। बर्ही हिततम' इति।

अग्नि के लिए उत्तम हितकर।

Most beneficial for digestive fire.

अङ्गमर्दप्रशमनः (च. सू. ४.८)

अङ्गमर्दं प्रशमयतीति। यथा— 'विदारिगन्धापृश्निपर्णीबृहतीकण्टकारिकैरण्ड-काकोलीचन्दनोशीरैलामधुकानीति दशेमान्यङ्ग-मर्दप्रशमनानि भवन्ति' इति। अङ्गमर्द आमाद् वातवृद्धेर्धातुक्षयाच्च भवतीत्युपरिनिर्दिष्टानि द्रव्याणि हेतुनिरासेन हित- कराणि भवन्ति।

अङ्गमर्द का शमन करने वाला।

Pacifying bodyache.

अङ्गवर्धनः (च. चि. १.१.७०)

देहस्य अङ्गप्रत्यङ्गानां वृद्धिं समुदीरयतीति, यथोक्तं चरकेण च्यवनप्राशगुणे— 'क्षीणक्षतानां वृद्धानां बालानां चाङ्गवर्धनः' इति। महापैशाचिकघृते च 'बालानां चाङ्गवर्धनम्' इति। (च. चि. ९.४८)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शरीरवृद्धि को प्रेरित करने वाला।

Promoting body-growth.

अङ्गस्थिरीकरणम् (सु. चि. २४.५२)

दुर्बलनान्यङ्गानि स्थिराणि दृढानि करोतीति, यथोक्तं– 'उद्वर्तनं वातहरं कफमेदोविलापनम्। स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्॥' इति। अत्रोद्वर्तनं गात्रमर्दनमित्ति डल्हणः।

शरीर को दृढ बनाने वाला।

Stabilising the body parts.

अचक्षुष्या (च. सू. २७.३२)

चक्षुषे अहिता। यथोक्तं – 'शिम्बी रूक्षा कषाया च कोष्ठे वातप्रकोपिनी। न च वृष्या न चक्षुष्या विष्टभ्य च विपच्यते॥' इति।

नेत्रों के लिए अहितकर।

Unwholsome to eyes.

अच्छम् (च. नि. ४.९)

प्रसन्नम्, निराविलमित्यर्थः।

स्वच्छ।

Clear, non-turbid.

अतिबलघ्नम् (च. सि. ११.९)

बलमतिशयेन हन्ति यथा कृतवेधनवर्णने चरकः–'कटुकं चातिबलघ्नमित्यपि।' इति

बल का अतिशय नाश करने वाला।

Excessively destroying strength.

अतिमूत्रलम् (च. सू. २७.१११)

अतिशयेन मूत्रं लाति प्रवर्त्तयतीति यथा त्रपुसम्। उक्तञ्च– 'मुखप्रियं च रूक्षं च मूत्रलं त्रपुसं त्वति।' इति।

अतिशय मूत्रल।

Excessively diuretic.

अतिमृदुः (च. सू. १४.६)

अतिशयेन मृदुः मार्दवापन्नः।

अतिशय मृदु।

Too mild or soft.

अतिरूक्षः (च. सू. ६.५)

अतिशयेन रूक्षः रौक्ष्यापन्नः।

अतिशय रूक्ष।

Too rough.

अतिरोचनम् (च. चि. २४.१७९)

अन्ने रुचिमतिशयेन जनयतीति, यथा– 'गोधूमान्नयवान्नानां मांसानां चाति रोचनम्' इति मदात्यये अष्टाङ्गलवणप्रसङ्गे।

अतिशय रुचि उत्पन्न करने वाला।

Excessively relishing.

अतीसारनिबर्हणाः (च. चि. ८.१२४)

अतीसारनाशनः।

अतीसार का निवारक।

Checking diarrhoea.

अतृप्तिकरम् (च. वि. २.७)

न तृप्तिकरमिति। हीनमात्र आहारराशिः अतृप्तिकरो भवति।

तृप्ति को न करने वाला।

Not causing contentment.

अत्यग्निनाशनम् (च. सू. २७.१३४)

अत्यग्निः अग्नेस्तैक्ष्ण्यातिशयो भस्मकहेतुः, तं नाशयतीति अत्यग्निशमन इत्यर्थः यथा पारावतफलम्। आविकञ्च मांसमत्यग्निनाशनम् (च. चि. १५.२२२); पुनश्च 'नारीस्तन्येन संयुक्तां पिबेदौदुम्बरीं त्वचम्। ताभ्यां वा पायसं सिद्धमद्यादत्यग्निशान्तये॥' इति

(च. चि. १५.२३०)

अत्यग्नि को शान्त करने वाला।

Pacifying excessively intense digestive fire.

अत्यभिष्यन्दि (सु. सू. ४५.७२)

अतिशयेनाभिष्यन्दकरम्, महाभिष्यन्दीत्यर्थः।

(द्र०-महाभिष्यन्दि)

महाभिष्यन्दि।

अतिशय अभिष्यन्दी।

अत्यम्लम् (सु. सू. ४५. ६५)

अतिशयेनाम्लम्, यथा 'दधि तु मधुरमम्लमत्यम्लञ्चेति' रसभेदेन त्रिविधं दधि।

अतिशय अम्ल।

Too sour.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अत्युष्णः (च. सू. १४.६)

अतिशयेनोष्णः।

अत्यन्त उष्ण।

Too hot.

अदाहिनः (सु. सू. ४६.३९३)

ईषद्दाहिनः। (ड०)

थोड़ी जलन उत्पन्न करने वाला।

Causing seight burning sensation.

अधःकफानुलोमनम् (अ. हृ. सू. ६.१४६)

अधोमार्गेण कफमनुलोमयतीति, यथा 'ऊर्ध्वाधःकफवातानुलोमनं दीपनं बिडम्' इति। हेमाद्रिस्त्र स्पष्टीकरोति— 'ऊर्ध्वाधःशब्दौ कफवाताभ्यां प्रत्येकं संबध्येते न तु यथासंख्येन' इति, विस्तरस्तु तत्रैव द्रष्टव्य.।

कफ को निम्नमार्ग से प्रेरित करने वाला।

Expelling kapha by downward passage.

अधः शोधनम् (सु. चि. २.८६)

विरेचनास्थापने। (ड०)

अधः गुदमार्गेण शोधयतीति, विरेचनास्थापने। (ड०)

निम्न मार्ग से मलो का निर्हरण करने वाला।

Purifying (evacuating) by downward passage such as purgation and enema.

अधःसंशोधनम् (च०चि० ३.२२७)

विरेचनम्। अधोमार्गेण मलं निर्हत्य शरीरं संशोधयतीति।

निम्न मार्ग से मल को निकाल कर शरीर को शुद्ध करने वाला।

Purifying from downward passage (Purgative).

अधःस्रंसी (च. सू. २६.४३ (३)

विष्यन्दनशीलः इति चक्रः। अधोगमनशीलः विरेचनोपगत्वेनोपयोगी। (द्र०-अवस्रंसि)

आर्द्रता का शोषण कर नीचे की ओर जाने वाला।

Moving down on absorbing moisture.

अधोगामि (अ. हृ. सू. ९.११)

अधो गन्तु शीलं यस्य तत्, त्रिवृदादि विरेचनद्रव्यम्, यथोक्तं — 'अधोगामि च भूयिष्ठं भूमितोय-गुणाधिकम्' इति।

नीचे जाने वाला।

Moving downwards.

अधोभागम् (च. क. १.४)

अधो गुदेन दोषनिर्हरणं भजते इति अधोभागम्। (चक्र०)

अधोभागहरं विरेचनमित्यर्थः (ड., सु. सू. ४०.५)। अधोभागैरिति विरेचनद्रव्यैः (चक्र., च. चि. १७.१३५), त्रिवृदादीनि विरेचनद्रव्याणि (चक्र., च. चि. २५.१००)।

निम्न मार्ग (गुदा) से दोषों को निकालने वाला (विरेचन)।

Evacuating from downward passage (purgative).

अधोभागदोषहरम् (सु. सू. ४५.११४)

अधोभागेन विरेचनेन दोषान् पुरीषपित्तादीन् हरतीति। एरण्डतैलस्य कर्म।

निम्नमार्ग से दोषों को निकालने वाला (विरेचन)।

Eliminating impurities from downward passage (purgative).

अधोभागहराणि (सु. सू. ३९.४)

विरेचनानि (ड०), अधोमार्गेण मलान् निर्हरन्तीति।

निम्नमार्ग (गुदा) से मलों को बाहर निकालने वाला (विरेचन)।

Eliminating impurities from downward passage (purgative).

अधोमार्गप्रवर्तनम् (च. सू. २७.१०९)

अधोभागहरम्, उक्तञ्च—

'तिलवेतसशाकं च शाकं पञ्चाङ्गुलस्य च।

वातलं कटुतिक्ताम्लमधोमार्गप्रवर्तनम्॥' इति।

मलों को निम्नमार्ग में प्रवृत्त करने वाला (विरेचन)।

Purgative.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अधोवातानुलोमनम् (अ.हृ. सू. ६.१४६;७.४५)

वातमधोऽनुलोमयतीति, यथा– 'ऊर्ध्वाधः कफवातानुलोमनं दीपनं बिडम्' इति ।

अपान वायु को नीचे की ओर ले जाने वाला ।

Expelling flatus (Carminative).

अधोवातानुलोम्यकरम्

अपानवायोरनुलोमनम्, यथा बिडलवणम् । (च. सू. २७.३०२)

अपान वायु का अनुलोमन ।

Carminative.

अधोहराः (च. चि. ५.१७६)

अधोहरा अधोभागहरा विरेचना इत्यर्थः ।

विरेचन ।

Purgative.

अनतिगुरु (च. वि. १.१८)

अल्पगुरु ।

Slightly heavy.

अनतिस्निग्धम् (च. वि. १.१८)

अल्पस्निग्धम् ।

Slightly unctuous.

अनभिष्यन्दि (सु. सू. ४५.९६)

१. अत्रेषदर्थे नञ्, तेन अल्पाभिष्यन्दीत्यर्थः, एतेन दोषधातुमलस्रोतसां मन्दक्लेदप्राप्तिजननम् । (ड०)

अल्प अभिष्यन्दी ।

२. अस्निग्धम् । (चक्र., च. सू. २१.५०)

अल्प स्निग्ध

अनलदार्ढ्यम् (च. चि. १४.८३)

अनलस्य अग्नेः दार्ढ्यं स्थैर्यम् ।

अग्नि की दृढता ।

Stability of digestive fire.

अनलदीपनः (च. चि. १५.९७)

अग्निदीपनः । (द्र०-दीपनः)

अग्निदीपन ।

अनलोत्तेजनम् (अ. हृ. चि. ७.७३)

अनलस्याग्नेः उत्तेजनमुद्दीपनम्, यथोक्तं मद्यगुणे — 'अनलोत्तेजनं रुच्यं शोकश्रमविनोदकम् । न चातः परमस्त्यन्यदारोग्लबलपुष्टिकृत् ॥' इति ।

अग्नि का उत्तेजक ।

Stimulant of digestive fire.

अनामयत्वम् (च. सि. १.१७)

आरोग्यम् ।

आरोग्य (रोगराहित्य अर्थात् स्वास्थ्य)

Disease-free state (Health).

अनामयत्वकरम् (च. चि. १.४.६)

आरोग्यकरम् ।

आरोग्यप्रद ।

Providing freedom from diseases (Health).

अनायुष्यम् (च. सू. २५.४०)

आयुष्यविपरीतं अनायुष्यम्, विपर्यये नञ्, आयुःक्षपणमित्यर्थः । हीनमात्रमाहारराशिमप्यनायुष्यमाचक्षते । (च. वि. २.७)

आयु को घटाने वाला ।

Decreasing life-span.

अनारोग्यकरम् (च. सू. २५.४०)

अनारोग्यं आरोग्याभावः, तं जनयतीति । एतेन शरीरं रोगैर्बहुभिराक्रान्तं भवति ।

आरोग्य (व्याधिक्षमत्व) का नाशक । (देखें मेरा लेख 'आरोग्य का रहस्य', सचित्र आयुर्वेद, जनवरी'९६)

Destroying immunity.

अनिलकर्षी (च. सि. १.२८)

अनिलं वायुमाकृष्य स्वमार्गे प्रवर्त्तयति । इदं निरूहवस्तेः कर्म ।

वायु को खींच कर अपने मार्ग में प्रवृत्त करना ।

Drawing vāyu to its own course.

अनिलकोपनी (च. क. ७.५)

अनिलं वातं कोपयतीति ।

वातकोपक ।

Aggravating vāta.

अनिलप्रकोपणी (सु. सू. ४५.१२६)

अनिलं वातं प्रकोपयतीति ।

वातप्रकोपक ।

Aggravating vāta.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अनिलरोगजित् (च. चि. २६.३०)

अनिलजान् वातजन्यान् रोगान् जयति शमयतीति ।

वातरोगशामक ।

Pacifying vātika disorders.

अनिलसूदनम् (च. चि. ३०.१०५)

वातहरम् ।

वातनाशन ।

Eliminating vāta.

अनिलापहम् (च. चि. २०.४६)

वातहरम् ।

वातनाशन ।

Eliminating vāta.

अनिलार्त्तिनुत् (च. चि. २८.१६५)

वातरुजापहम्, यथोक्तं — 'रास्नासहस्रनिर्यूहे तैलद्रोणं विपाचयेत् । गन्धैर्हैमवतैः पिष्टैरेलाद्यैश्चानिलार्त्तिनुत् ॥' इति ।

वातरोगनाशक ।

Eliminating vātika disorders.

अनुरसः (च. सू. २६.२८)

रसमनुगतोऽनुरसः; अव्यक्तो रसोऽप्रधानीभूत इत्यर्थः । यथोक्तं चरकेण—'व्यक्तः शुष्कस्य चादौ च रसो द्रव्यस्य लक्ष्यते । विपर्ययेणानुरसः' इति ।

अव्यक्त रस ।

Unmanifest taste.

अनुलोमनम् (च. चि. १७.८७)

अनु प्रकृतमार्गानुसारं दोषं मलं वा लोमयति गमयतीति, उक्तं हि — 'उदावर्ते तथाध्माने मातुलुङ्गाम्लवेतसैः । हिङ्गुपीलुबिडैश्चान्नं युक्तं स्यादनुलोमनम् ।' इति ।

दोष या मल को प्रकृत मार्ग में प्रेरित करना ।

Pushing the impurities to its natural course.

अनुलोमौषधम् (च. चि. २६.१६)

विरेचनौषधम् ।

विरेचन । Purgative.

अनुवासनम् (च. सू. १.९०, २.१४)

स्नेहवस्तिः । 'अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयत इत्यनुवासनः ।' (सु. चि. ३५.१८)

स्नेहवस्ति । unctuous enema.

अनुवासनोपगः (च. सू. ४.८)

अनुवासने उपगः सहायत्वेन गच्छतीति, अनेन अनुवासनस्य शक्तिः प्रकर्षं याति, यथोक्तं— 'रास्नासुरदारुबिल्वमदनशतपुष्पावृश्चीरपुनर्नवाश्वदंष्ट्रा- ग्निमन्थश्योनाका इति दशेमान्यनुवासनोपगानि भवन्ति' इति ।

अनुवासन में सहायक ।

Supporting unctuous enema.

अनुष्णम् (सु. सू. ४४.७०)

१. ईषदुष्णम् यथा बिभीतकम्, 'बिभीतकमनुष्णं तु' इति ।

अल्प उष्ण । Slightly hot.

२. उष्ण नहीं । Not hot.

अनेकता (च. सू. २६.३३)

सजातीयानां परस्परं पृथक्त्वम्, यथा माषाणां सजतीयत्वेऽप्यनेकत्वरूपं पृथक्त्वम्, यथा— 'पृथक्त्वं स्यादसंयोगो वैलक्षण्यमनेकता' इति ।

Variation.

अनेकविधकल्पना (च. सू. ९.७)

नानाप्रकारस्वरसाद्युपयुक्तकल्पनायोग्यत्वम् ।

अनेकविधकल्पना हि व्याधिस्वभावानुसारं व्याधितप्रकृत्यनुसारञ्च प्रयुज्यमाना हितकरी भवति ।

भेषजगुणः ।

Various Pharmaceutical forms.

अनोजस्यम् (च. वि. २.७)

ओजस्यविपरीतम्, ओजःक्षपणमित्यर्थः ।

हीनमात्राहारस्य दोषः ।

Depleting ojas.

अन्तरग्निसंधुक्षणम् (च. चि १.२.३)

अन्तरग्नेः जाठर-भौतिक-धात्वग्नित्रयस्य संधुक्षणं संदीपनम् । रसायनकर्म ।

आभ्यन्तर अग्नि का दीपन ।

Fanning of internal fire.

अन्तर्व्रणशोधनम् (सु. सू. ४४.६३)

अन्तर्व्रणं शोधयतीति ।

हरीतकीकर्म ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

आभ्यन्तर व्रण का शोधक ।
Purifier of internal wound.

अन्नद्रव्यरुचिकरम् (च. सू. २५.४०)
अन्नेन संयुक्तं सदन्ने रुचिं करोतीत्यर्थः (चक्रः) । लवणं अन्नद्रव्यरुचिकरं प्रोक्तम् । (च. वि. १.१८)
आहार में रुचि उत्पन्न करने वाला ।
Promoting relish.

अन्नद्वेषः (सु. क. २.८)
भक्तद्वेषोऽरुचिविशेषः, यथोद्धृतं वृद्धभोजवचनं मधुकोषे—'चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वाऽपि भोजनम् । द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥' इति ।
अरुचिविशेष ।
Aversion to food.

अन्नपानप्रकांक्षाकरम् (च. चि. ३.१५८)
अन्नपानयोः आहरणेच्छां रुचिं च जनयतीति, यथा—'तदस्य मुखवैशद्यं प्रकांक्षां चान्नपानयोः । धत्ते रसविशेषाणामभिज्ञत्वं करोति यत् ॥' इति । ज्वरे दन्तधावनस्य कर्म ।
अन्न-पान की इच्छा उत्पन्न करने वाला ।
Causing desire for food and drinks.

अन्नसंघातभेदनम् (च. सू. २७.३२५)
अन्नसंघातं भक्तपिण्डं भिनत्ति विश्लेषयतीति । अनुपानस्य कर्म । आहारपिण्ड को तोड़ना ।
Disintegrating the mass of food.

अपकर्षणः (सु. चि. ५.४१)
१. लेखनः, पुराणगुग्गुलोः कर्म, यथोक्तं—'स नवो बृंहणो वृष्यः पुराणस्त्वपकर्षण' इति ।
कृश करने वाला । Reducing body weight.
२. अपकर्षणम् (च. वि. ७.१४) — हस्तादिभिः संशोधनैश्च दूरीकरणं निर्हरणमिति, यथा—'अपकर्षणमेवादौ क्रिमीणां भेषजं मतम्' इति ।
बाहर निकालना । Extraction

अपतर्पणम् (च. सू. २३.२६)
अप अपाक्रियते देहतर्पणमनेनेति, सन्तर्पणविपरीतम्, यथोक्तं— 'उक्तं सन्तर्पणोत्थानामपतर्पणमौषधम्' इति ।
देहतर्पण को दूर करना । सन्तर्पण के विपरीत ।
Desaturation.

अपत्यम् (च. सू. १६.१८)
न पतन्ति पितरोऽनेनेति (रामाश्रमी), सन्तानम् ।
सन्तान । Progeny

अपत्यजननम् (च. चि. २८.१४३)
सन्तानोत्पादने सहायम् ।
सन्तानोत्पत्ति में सहायक ।
Providing fertility.

अपत्यप्रदः (सु. चि. २६.३९)
अपत्यं सन्ततिः (ङ०), तत् प्रददातीति, वाजीकरणमपत्यप्रदम्, यथोक्तं—'एते वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः । सेव्या विशुद्धोपचितदेहैः कालाद्यपेक्षया ॥' इति
अपत्यजननम् ।

अपत्यसंतानकरम् (च. चि. १.१.९)
अपत्यसंतानः अपत्यपरम्परा, तेन पुत्रपौत्रकरमित्यर्थः । वाजीकरणजनिताच्छुक्राज्जातः पुत्रः पुत्रजननसमर्थो भवतीत्यर्थः (चक्रः) । वाजीकरणगुणः ।
सन्तान-परम्परा को बढ़ाने वाला ।
Promoting generation of progeny.

अपथ्यम् (च. सू. २५.४५)
पथ्यविपरीतम्, मनःशरीराहितमित्यर्थः । तत्र नियतमपि तु मात्रादिगुणान्तरानुसारं लक्षणीयम् ।
शरीर और मन के लिए अहितकर ।
Unwholesome to body and mind.

अपरत्वम् (च. सू. २६.२९)
अवरत्वम्, यथा मरुरारोग्यदेशानां परः, अनूपश्चापरः अवरः इत्यर्थः । (द्र०-परत्वम्)
अपेक्षाकृत निम्न श्रेणी का ।
Relatively inferior.

अपराप्रपातनम् (च. १४.८.४१)
अपरां प्रपातयति गर्भाशयात् पूर्णतो बहिष्करोतीति ।
अपरा को गिराने वाला ।
Expelling placenta.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अपस्मारनाशनम् (च. चि. ९.६६)

अपस्मारहरम् ।

अपस्मारनाशक । Anti-epilepsy.

अपस्मारनुत् (च. चि. १०.२५)

अपस्मारनाशनम् ।

अपस्मारविमोक्षः (च चि. १०.१६)

अपस्मारनाशनम् ।

अपस्मारहरम् (अ. हृ. उ. ७.२९)

अपस्मारं हरति नाशयतीति ।

अपस्मारनाशनम् ।

अपस्मारहृत् (च. चि. १०.२६)

अपस्मारनाशनम् ।

अपस्मारापहः (च. चि. ९.७२)

अपस्मारनाशनः ।

अपिच्छिलम् (च. सू. २२.१४)

पैच्छिल्यरहितम्, पिच्छिलविपरीतमित्यर्थः ।

पिच्छिल का विपरीत । Non-slimy.

अप्रतीघातः (च. शा. १.२९)

अप्रतिहननमस्पर्शत्वमिति यावत् । (चक्रः)

आकाशस्य लिङ्गम् ।

प्रतीघात का अभाव । Non-resistance.

अबद्धमांसहरम् (च. चि. १.२.३)

मांसपेशीनां शैथिल्यं दूरीकरोतीति, रसायनगुणे चरकः ।

मांसपेशियों की शिथिलता को दूर करने वाला ।

Eliminating slackness of muscles.

अबलम् (च. सू. २१.३६)

बलाभावो दौर्बल्यं वा, यथोक्तं—'निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम् । वृषता क्लीबता ज्ञानमज्ञानं जीवितं न च ॥' इति ।

दौर्बल्य । Debility

अब्दोषहरम् (च. चि. १३.९३)

शरीरस्थस्य अब्धातोः दोषं विकृतिं हरति नाशयतीति, यथोक्तं—'अपां दोषहराण्यादौ प्रदद्यादुदकोदरे ।' इति ।

शरीरस्थ अब् धातु के विकार को दूर करना ।

Eliminating morbidity of body-fluid.

अभिनवम् (च. सू. २७.३०९)

प्रत्यग्रम्, यथा हि धान्यप्रसङ्गे चरकः—'पुराणं प्रायशो रूक्षं प्रायेणाभिनवं गुरु' इति ।

ताजा । Fresh

अभिष्यन्दकरम् (च. सू. २५.४०)

अभिष्यन्दि यथा—'मन्दकं दधि अभिष्यन्दकराणाम् (अग्र्यम्)' इति चरकः । (द्र०-अभिष्यन्दि)

अभिष्यन्द करने वाला ।

अभिष्यन्दजरणः (सु. चि. २४.८७)

अभिष्यन्दं जरतीति । अग्नेः कर्म ।

अभिष्यन्द का पाचन करने वाला ।

Digesting abhiṣyanda.

अभिष्यन्दापहः (च. सू. २६.४२ (४)

अभिष्यन्दमपहन्तीति, कटुरसः तैक्ष्ण्यादुष्णत्वाच्च अभिष्यन्दं हन्ति ।

अभिष्यन्दनाशक । Eliminating abhiṣyanda.

अभिष्यन्दापहरणः (सु. चि. १२.१९)

अभिष्यन्दं मूत्रनिःस्यन्दपहरतीति । अत्र लोहारिष्टगुणेष्वभिष्यन्दशब्देन मूत्रनिःस्यन्दोऽभिधीयते इति डल्हणः ।

मूत्रसंग्रहणीय ।

मूत्रस्राव कम करने वाला

Anti-diuretic.

अभिष्यन्दि (च. सू. २७.८४)

अभितः क्लेदस्यन्दनात् स्रोतोरोधं करोतीति यथा प्रियनिघण्टौ—'विष्यन्दनाच्च पैच्छिल्याद् रुद्ध्वा स्रोतांसि गौरवम् । कुरुते तदभिष्यन्दि मन्दकञ्च यथा दधि ॥' इति । शार्ङ्गधरेऽपि—'पैच्छिल्याद् गौरवाद् द्रव्यं रुद्ध्वा रसवहाः सिराः । धत्ते यद् गौरवं तत् स्यादभिष्यन्दि यथा दधि ॥' इति

'अभिष्यन्दि दोषधातुमलस्रोतसां क्लेदप्राप्ति-जननम्' इति डल्हणः (सु. चि. ५.१७) ।

Causing obstruction in channels due to increased mucus secretion.

अभ्यासः (च. सू. २६.३०)

'भावाभ्यसनमभ्यासः'— 'भावस्य षष्टिकादे-र्व्यायामादेश्चाभ्यसनमभ्यासः । यं लोकाः

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शीलनसततक्रियाभ्यामभिदधति सोऽभ्यासः' (चक्र०)। पौनःपुन्येन करणमिति यावत्।

निरन्तर सेवन करना।

Repetition, practice, constant use.

अम्लः (च. सू. १.६५)

१. षड्सानामन्यतमः जलाग्निभूयिष्ठः। 'अमति रुजति शरीरम्, लुनाति छिनत्ति धातुमिति चाम्लः'— 'अम रोगे' 'लूञ् छेदने' धातो निष्पिन्नः।

खट्टा। Sour.

२. अम्लरसविशिष्टोऽप्यम्लः यथा अम्लवेतसः ('अम्लोऽम्लवेतसो भीमो रसाम्लो वरवेतसः' इति धन्वन्तरिनिघण्टौ)।

अम्लवेतस।

अम्लपित्तजननः (च. सू. २५.४०)

अम्लपित्तं जनयतीति। यथोक्तं— कुलत्थः अम्लपित्तजननानाम् (अग्र्यम्),

अम्लपित्त उत्पन्न करने वाला।

Causing amlapitta (acid gastrits or hyper-acidity).

अम्लपित्तनुत् (च. सू. २७.२५)

अम्लपित्तहरः, यथा 'राजमाषः सरो रुच्यः कफशुक्राम्लपित्तनुत्' इति।

अम्लपित्तनाशन।

Eliminating hyper-acidity.

अम्लविदाहि (च. चि. २४.११२)

अम्लं च तद् विदाहि विदाहजनकं चेति यथा शुक्त-मद्यादिकम्।

खट्टा और जलन उत्पन्न करने वाला।

Sour causing burning in gastric region.

अम्लीभूतम् (सु. सू. ४५.४२)

न अम्लमनम्लं, अनम्लमम्लं भूतमिति अम्लीभूतम्, यथा—'न च पर्युषितं देयं कदाचित् वारि जानता। अम्लीभूतं कफोत्क्लेदि न हितं तत् पिपासवे॥' इति।

जो खट्टा हो गया।

Which turned to sour.

अरुचिघ्नम् (च. चि. १४.१४४)

अरुचिं हन्तीति, अरुचिनाशनमित्यर्थः।

अरुचिनाशनम्।

अरुचिनाशक।

अरुचिनाशनम् (च. सू. २७.१३४)

अरुचिं नाशयतीति, यथा पारावतफलं नवनीतञ्च, आसवाश्चाप्यरुचिनाशनाः (च. सू. २५.५०)।

अरुचिनाशक।

Alleviating anorexia.

अरुचिप्रशमनाः (च. चि. ३.२००)

अरुचिं प्रकर्षेण शमयन्तीति।

अरुचिशामक।

Pacifying anorexia.

अरुचिप्रतिबाधकः (च. चि. ८.१२४)

अरुचिं प्रतिबाधन्ते इति, अरुचिशमना इत्यर्थः।

अरुचिशामकः।

अरूक्षाः (च. सू. ६.७)

रूक्षविपरीताः, स्निग्धा इत्यर्थः।

रूक्षविपरीत (स्निग्ध)।

Non-rough (unctuous).

अरोचकनाशनम् (च. चि. २६.२१३)

अरुचिनाशनम्। अरोचकस्य लक्षणं मधुकोषोद्धृते वृद्धभोजवचने यथा—'प्रक्षिप्तं तु मुखे वान्नं जन्तोर्न स्वदते मुहुः। अरोचकः स विज्ञेयः' इति।

अरुचिनाशनम्।

अर्तिघ्नः (च. चि. २६.८१, २९.१२२, १३२)

अर्तिं पीडां हन्तीति, वेदनाशमन इत्यर्थः।

पीड़ा को शान्त करने वाला।

Analgesic.

अर्तिविस्मरणम् (च. ८.३१)

अर्तिं विस्मारयन्ति रुजानुभूतिं श्लथयति अपगमयति वा यथा मद्यम्।

पीड़ा को भुला देने वाला।

Blocking the feeling of pain.

अर्तिशमनाः (च. चि. १४.५८)

अर्तिं पीडां शमयन्तीति, रुजापहा इत्यर्थः।

पीडाशामक।

Relieving pain.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अर्दितनाशनम् (च. सू. २६.२३०)

अर्दितं नाशयतीति ।

अर्दित को नष्ट करने वाला ।

Alleviating facial paralysis.

अर्दितापहम् (च. चि. २६.१६४)

अर्दिताख्यं वातव्याधिमपहन्ति नाशयतीति ।

अर्दितनाशनम् ।

अर्शोघ्नः (च. सू. ४.८)

अर्शांसि हन्ति नाशयतीति । यथा—'कुटजबिल्वचित्रकनागरातिविषाभयाधन्वयासकदारु- हरिद्रावचाचव्यानीति दशेमान्यर्शोघ्नानि भवन्ति' इति ।

अर्श को नष्ट करने वाला ।

Anti-haemorrhoid.

अर्शोनुत् (च. चि. १६.१०५)

अर्शोघ्नः ।

अर्शोहरम् (च. चि. १४.७६)

अर्शांसि हरतीति, अर्शोघ्नमित्यर्थः ।

अर्शोघ्नम् ।

अर्शः प्रशमनः (च. सू. २५.४०)

अर्शोविकारं प्रशमयतीति । यथोक्तं—'तक्राभ्यासो ग्रहणीदोषशोथार्शोघृतव्यापत्प्रशमनानाम् (अग्र्यम्)' इति ।

अर्श को शान्त करने वाला ।

Pacifying piles.

अर्शः शमनम् (सु. चि. ६.१३)

अर्शः शमयतीति ।

अर्शः प्रशमनम् ।

अर्शः शातनम् (सु. चि. १.१२)

अर्शांसि शीर्यन्ते विशीर्यन्ते अनेनेति ।

अर्श को गला देने वाला ।

Destroying haemorrhoids as if by cutting.

अलक्ष्मीघ्नम् (च. सू. ५.९५, चि. १७.२४)

अलक्ष्मीः शरीरकान्तिक्षयः, तां हन्तीति । कान्तिं जनयतीत्यर्थः ।

Removing ugliness.

अलक्ष्म्यावहम् (च. वि. २.७)

अलक्ष्मीं शरीरकान्तिक्षयं करोतीति । हीनमात्राहारस्य कर्म ।

Causing ugliness.

अल्पमारुताः (च. सू. २७.१०)

कोष्ठे वातमल्पं जनयन्तीति ।

शालिगुणः ।

Producing little wind.

अल्पवर्चसः (सु. सू. ४६.५)

अल्पं वर्चः पुरीषं येभ्य इत्यल्पवर्चसः, यथोक्तं शालिगुणे—'मधुरा वीर्यतः शीता लघुपाका बलावहाः । पित्तघ्नाल्पानिलकफाः स्निग्धा वद्धाल्पवर्चसः ॥' इति ।

Producing little stool.

अल्पवीर्याः (सु. सू. ६.११)

अल्पशक्तयः (ड०) । ओषधिविशेषणम् ।

Having little potency.

अवकाशकरः (च. सू. २६.४३ (३)

स्रोतःशोधनः ।

Making space by clearing channels.

अवधमनम् (च. सू. २७.४)

विलेखनम् । अवधमयति विलिखतीत्यर्थः । यथोक्तं चक्रेण— अवधमयतीति विलिखतीत्यर्थः, अनेकार्थत्वाद् धातूनां, वचनं हि 'लेखनः शीतरसिकः' इति, तथा हारीतेऽप्युक्तं—'शीधुरवधमयति वाम्वग्निप्रबोधनात्' इति ।

शरीर को कृश करना ।

Slimming.

अवबोधनम् (च. सू. २४.४७)

संज्ञाप्रबोधनम्, संज्ञास्थापनमिति यावत् ।

पुनः चेतनावस्था में लाना ।

Resuscitation.

अवष्टम्भनम् (च. सू. ५.१०२)

संधारकम्, बलप्रदमिति चक्रः । यथोक्तं—'अवष्टम्भनमायुष्यं भयघ्नं दण्डधारणम्' इति ।

Supporting, Strengthening.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अवसादनम् (सु. चि. १.८३)

उन्नतव्रणस्य निम्नत्वकरणम्।

अव अधः सादयति गमयतीति।

उठे हुए व्रण को नीचा करना।

Depressing (elevated wound).

अवस्रंसि (च. सू. २७.१९२)

अधोगमनशीलम्, यथोक्तं—'विबन्धघ्नमवस्रंसि दीपनं चाम्लकाङ्क्षिकम्' इति। स्रंसनमित्यर्थः।

नीचे जाने वाला।

Down moving.

अविकारि (च. सि. ६.१६)

यद् विकारं न करोति।

हानिरहित।

Safe, harmless, non-toxic.

अविदाहि (च. सू. २७.३००)

न विदाहि अविदाहि यद् विदाहं न जनयतीत्यर्थः।

विदाह न करने वाला।

That which does not cause burning.

अविषादकरम् (च. वि. ८.९४)

१. शरीरमनसोरग्लानिकरम्। (चक्रः)

२. विषादकरं विषम् (विषादजननत्वाच्च विषमित्यभिधीयते), तद्विपरीतं विषाक्तता-रहितमित्यर्थः।

विषाक्तताहित।

Non-toxic.

अविष्यन्दी (सु. सू. ११.१६)

न विष्यन्दी अविष्यन्दी, योऽवचारितो न प्रसर्पति (ड०)। अन्यतमः क्षारगुणः।

नहीं फैलने वाला।

Non-spreading.

अवृष्यम् (च. सू. २५.४०)

वृष्यविपरीतमवृष्यम्, शुक्रक्षपणमित्यर्थः; यथोक्तं—'नात्यर्थमुष्णं मरिचमवृष्यं लघु रोचनम्' इति।

वृष्य के विपरीत (शुक्रक्षयकर)।

Non-aphrodisiac.

अव्यक्तरसम् (सु. सू. ४५.२०)

न व्यक्तो स्पष्टतया गृह्यमाणो रसो यस्य तत्, गुणवत्तोयस्यान्यतमलक्षणं, यथोक्तं सुश्रुतेन—'निर्गन्धमव्यक्तरसं तृष्णाघ्नं शुचि शीतलम्' इत्यादि। अनुरसेऽपि 'रसस्याव्यक्तीभावः यथा चरके'—'अव्यक्तीभावस्तु खलु रसानां प्रकृतौ भवत्यनुरसेऽनुरससमन्विते वा द्रव्ये' इति। (च. सू. २६.९)

जिसका रस व्यक्त न हो।

Having unmanifest rasa.

अश्मनाशनः (सु. सू. ३८.२१)

अश्मरीनाशनः।

अश्मरी को नष्ट करने वाला।

Destroying calculus.

अश्मभित् (च. चि. २६.६६)

अश्मानं भिनत्तीति, अश्मरीभेदीति चक्रः।

पथरी को तोड़ने वाला।

Disintegrating calculus.

अश्मभेदनम् (अ. हृ. चि. ११.२१)

अश्मरीभेदनम्। (अ. द.)

अश्मरी को तोड़ने वाला।

अश्मरीपातनम् (च. चि. २६.५९)

अश्मरीं पातयति भित्त्वा मूत्रमार्गाद् बहिः निःसारयतीति।

अश्मरी को तोड़कर बाहर निकालने वाला।

Expelling calculus after breaking it.

अश्मरीभेदनम् (च. चि. २६.५९)

अश्मरीं भिनत्ति विदीर्य खण्डशः करोतीति।

अश्मरी को तोड़ने वाला।

Breaking calculus.

अश्रुनिवारणः (च. चि. २६.२३१)

नेत्रे प्रवृद्धं अश्रुस्रावं शमयतीति।

अतिशय अश्रुस्राव को रोकने वाला।

Checking excessive lachrymal secretion.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अष्ठीलनुत् (सु. सू. ४६.२२०)

अष्ठीला मूत्राष्ठीला, न पुनरनिलाष्ठीला (ड०), तामपनयतीति।

अष्ठीलानाशक।

Removing enlarged prostate.

असंयोगः (च. सू. २६.३३)

सर्वथाऽसंयुज्यमानयोः मेरुहिमाचलयोरिव पृथक्त्वम्, उक्तञ्च—'पृथक्त्वं स्यादसंयोगो वैलक्षण्यमनेकता' इति।

जो परस्पर मिलें नहीं।

Non-conjunction (spatial separation).

असरम् (च. सू. २२.३२)

सरति गच्छतीति सरम्, न सरमसरम्, स्थिरमित्यर्थः (चक्रः)। स्तम्भनस्यान्यतमलक्षणम्, यथोक्तं— 'द्रवं तन्वसरं यावच्छीतीकरणमौषधम्' इत्यादि।

जो गतिशील न हो।

Non-moving.

असुखम् (च. सू. ११.३०)

सुखविपरीतम् दुःखमित्यर्थः, आयुषो विशेषणम् यथोक्तं—'हिताहितं सुखं दुखमायुः' पुनश्च 'सुखमायुरुच्यते, असुखमतो विपर्ययेण' इति।

सुख के विपरीत (दुःख)।

Unhappy.

असृक्दोषघ्नम् (च. सू. २७.१४८)

असृजः रक्तस्य दोषं हन्तीति, यथोक्तं—'रसासृङ्मांसमेदोजान् दोषान् हन्ति बिभीतकम्' इति।

रक्तविकारनाशक।

Eliminating blood disorders.

असृग्दोषनाशनम् (च. चि. २९.१२०)

रक्तदोषापहम्।

रक्तविकारनाशक।

असृग्दोषापहा (च. चि. २६.२०२)

असृजः रक्तस्य दोषमपहन्तीति, रक्तविकार-नाशिनीत्यर्थः, यथोक्तम्—

'स्वरसः क्वथितो दार्व्या घनीभूतो रसक्रिया। सक्षौद्रा मुखरोगासृग्दोषनाडीव्रणापहा॥' इति।

रक्तविकारनाशक।

असृक्प्रसादनः (सु. सू. ४५.१६१)

असृजं रक्तं प्रसादयति स्वच्छीकरोतीति रक्तशोधन इत्यर्थः, यथोक्तं— 'पित्तघ्नो मधुरः शुद्धो (गुडः) वातघ्नोऽसृक्प्रसादनः' इति।

रक्तशोधक।

Blood-purifier.

अस्थिबलकृत् (च. सू. १३.१७)

अस्थ्नां बलं करोति वर्धयतीति, यथोक्तं—'मज्जा विशेषतोऽस्थ्नां च बलकृत् स्नेहने हितः' इति।

अस्थि के बल को बढ़ाने वाला।

Strengthening bones.

अस्थ्यभिवर्धनः (च. सू. २६.४३ (१))

अस्थिधातुमभिवर्धयतीति।

मधुररसकर्म।

अस्थि को बढ़ाने वाला।

Promoting growth of bones.

अस्रकृत् (सु. चि. २४.८६)

अस्रं रक्तस्रावं करोतीति, यथोक्तं—'आतपः पित्ततृष्णाग्निस्वेदमूर्च्छाभ्रमास्रकृत्' इति।

रक्तस्राव कराने वाला।

Causing haemorrhage.

अस्रघ्नः (अ. हृ. सू. ६.८३)

अस्रं रक्तस्रावं हन्ति रुणद्धीति, तण्डुलीयकर्म।

रक्तस्राव को रोकने वाला।

Haemostatic.

अस्रपित्तजित् (च. चि. ३०.९८)

रक्तपित्तशमनः।

रक्तपित्तशामक।

Pacifying raktapitta.

अस्वप्ननाशनः (च. सू. २५.५०)

अनिद्राहरः। प्रवरासवगुणः।

अनिद्रा को दूर करने वाला।

Eliminating loss of sleep (Hypnotic)

अहितम् (च. सू. २५.३३)

१. हितविपरीतम्, असुखकरमित्यर्थः। यथोक्तं— 'यदाहारजातमग्निवेश। समांश्चैव शरीरधातून्

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्रकृतौ स्थापयति विषमांश्च समीकरोतीत्येतद्धितं विद्धि, विपरीतं त्वहितमिति ।'

२. आयुषो विशेषणम् यथा 'हितमायुरुच्यते, अहितमतो विपर्ययेण' इति (च. सू. ३०.२४) ।

अहितकर । Unwholesome.

अहद्यम् (सु. सू. ४५.१९९)

१. अप्रियम् (ड०) । मद्यदोषः ।

अप्रिय । unpleasant.

२. हृदे हितं हृद्यं, तद्विपरीतमहृद्यम् ।

जो हृदय के लिए हितकर न हो ।

Non-cordial.

आ

आखुनुत् (च. चि. २३.१००)

मूषिकापहः ।

चूहों को नष्ट करने वाला ।

Rat-killer or rat-repellant.

आग्नेयम् (च. सू. ६.५)

१. अग्निगुणप्रधानम् (चक्रः) । आदानविशेषणम् ।

२. अग्निभूतघटितम्—यथा 'सौम्यं शुक्रमार्त्तवमाग्नेयम्' इति (सु. शा. ३.३) ।

अग्निप्रधान ।

Having predominance of agni.

आत्मगुणाः (चक्र. च. सू. १.४९)

(सार्था गुर्वादयो बुद्धिः प्रयत्नान्ताः इति) अनेन त्रिविधा अपि वैशेषिकाः सामान्या आत्मगुणाश्चोद्दिष्टाः ।' 'बुद्धिः प्रयत्नान्ताः'—बुद्धिर्ज्ञानम्, अनेन च स्मृतिचेतनाधृत्यहङ्काकारादीनां ग्रहणम्, प्रयत्नोऽन्ते येषां निर्देशे ते प्रयत्नान्ताः, एतेन चेच्छाद्वेषसुखदुःखप्रयत्नानां ग्रहणम् ।'

आत्मा के गुण ।

Qualities of soul.

आध्मानकरम् (अ. हृ. सू. ६. ८२)

आध्मानं वायुना सवेदनमुदरपूर्णत्वम्, तत् करोतीति, यथा—'करीरमाध्मानकरं कषायं स्वादु तिक्तकम्' इति ।

आध्मान करने वाला ।

Causing flatulence.

आध्मानकारकाः (सु. सू. ४६.३३)

आध्मानं कुर्वन्ति कोष्ठवातवृद्ध्या उदरमाध्मापयन्तीति, यथा— 'ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः' इति ।

आध्मानकर ।

आननसुत्वक्त्वकरः (सु. चि. २४.२६)

शिरोऽभ्यङ्गस्य कर्म, यथा — 'करोति शिरसस्तृप्तिं सुत्वक्कमपि चाननम्' इति ।

मुख की त्वचा को सुन्दर बनाने वाला ।

Making the face skin beautiful.

आनाहघ्नम् (च. चि. २६.२५)

आनाहं हन्तीति । आनाहः मलसञ्चयात् काठिन्यम्, तल्लक्षणं यथा—'आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन । प्रवर्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति' इति । (मा. नि.)

आनाह को नष्ट करने वाला ।

Alleviating hardness of bowels.

आनाहनाशनम् (च. चि. ८.१४४)

आनाहं नाशयतीति ।

आनाहनाशनी (सु. सू. ४५.१७८)

आनाहं नाशयतीति, यथा— 'प्रसन्ना कफवातार्शोविबन्धानाहनाशनी' इति ।

आनाहनाशक ।

आनाहप्रशमनम् (च. सू. २५.४०)

आनाहं प्रशमयतीति, यथा— 'पिप्पलीमूलं दीपनीयपाचनीयानाहप्रशमनानाम्' इति ।

आनाह को शान्त करने वाला ।

Pacifying the hardness of bowels.

आनाहभेदनम् (च. चि. १३.१४५)

आनाहं भिनत्तीति, यथोक्तं—'पीलुकल्कोपसिद्धं वा घृतमानाहभेदनम्' इति ।

आनाह को विदीर्ण करने वाला ।

Disintegrating the mass causing hardness of bowels.

आनाहभेदी (सु. सू ३८.३०)

आनाहं भेत्तुं शीलं यस्येति यथा—

'उक्तः श्यामादिरित्येष गणो गुल्मविषापहः ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

आनाहोदरविड्भेदी तथोदावर्तनाशनः ।' इति ।

आनाहभेदनः ।

अनाहविमोक्षणम् (च. चि. ५.७२)

आनाहं दूरीकरोतीति ।

आनाह को दूर करने वाला ।

Removing hardness of bowels.

आनाहहरम् (च. चि. ५.७०)

आनाहं हरतीति ।

आनाहनाशक ।

आनुलोमिकः (च. चि. ३.२०९)

अधोभागहरः, विरेचन इत्यर्थः ।

विरेचन । Purgative.

आनुलोमिकम् (च. क. १२.७०)

विरेचनमौषधम् (चक्रः) ।

विरेचन ।

आपातभद्रम् (च. वि. १.१८)

आपाते प्रयोगारम्भे भद्रं कल्याणकरम् (परिणामे सततप्रयोगे च दुःखावहम्) यथा लवणम् । पिप्पल्यश्चापि आपातभद्राः, यथोक्तं—'ताः (पिप्पल्यः) सद्यः शुभाशुभकारिण्यो भवन्ति, आपातभद्राः, प्रयोगसमसाद्गुण्यात्, दोषसञ्चयानुबन्धाः' इति ।

प्रारंभ में हितकर किन्तु परिणाम में दुःखद ।

Initially useful but harmful consequently and on constant use.

आपूर्णरसप्रमाणवीर्यम् (च. चि. १.२.४)

आ समन्तात् पूर्णो रसः प्रमाणं वीर्यञ्च यस्मिन्निति । रसायनप्रकरणे आमलकविशेषणम् ।

पूर्ण परिपक्व । Fully mature.

आपूर्णरसवीर्याणि (च. चि. १.१.३९)

आ समन्तात् पूर्णो रसः वीर्यञ्च येष्विति, तादृशानि आमलकादिफलानि प्रयोगार्थं ग्राह्याणि ।

पूर्ण परिपक्व ।

Fully mature with taste and potency.

आप्यायनः (सु. सू. ४६.३६१)

स्मृतिस्वरहीनज्वरक्षीणकृशाल्परेतसां स्वास्थ्यकरः । (ड०)

क्षीण धातुओं को पुनः प्राकृत स्थिति में लाने वाला ।

Replenishing deficient dhātus.

आमम् (च. सू. २७.३१७)

१. आममिति अपक्वं, फलदोषः, एतच्च बिल्वादीन् विहाय बोद्धव्यम् (चक्रः) । कच्चा । unripe.

२. आमः अपक्वरसः यथोक्तं—'ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् । दुष्टमामाशयगतं रसमामं प्रचक्षते ॥ अन्ये दोषेभ्य एवातिदुष्टेभ्योऽन्योन्यमूर्छनात् । कोद्रवेभ्यो विषस्येव वदन्त्यामस्य संभवम् ॥' इति ।

आमदोष । Āmadoṣa (immature rasa)

३. आमविषम्—विरुद्धाध्यशनाजीर्णाशनशीलिनः पुनरामदोषमामविषमित्याचक्षते भिषजः । (च. वि. २.१२)

विषसदृश आमदोष ।

Āmadoṣa as poison like food-poisoning.

आमजरणः (सु. चि. २४. ८७)

आमं जरयतीति । अग्निकर्म ।

आम का पाचन करने वाला ।

Digesting āma.

आमपाचनः (च. चि. १५.९८)

आमं पाचयतीति, यथा—'नागरातिविषामुस्तक्वाथः स्यादामपाचनः' इति ।

आम का पाचन ।

Digesting āma.

आमप्रदोषहेतुः (च. सू. २५.४०)

आमप्रदोषं करोतीति, यथोक्तं—'अतिमात्राशनमामप्रदोषहेतूनाम्' इति ।

आमप्रदोष का कारण ।

Cause of excessive morbidity of āma.

आमप्रशमनः

आमं पाचनेन प्रशमयतीति । अग्निः आमप्रशमनानाम् (अग्र्यः) । (च. सू. २५.४०)

आम को शान्त करने वाला ।

Pacifying āma.

आमयघ्नः (च. सि. १.५३)

आमयान् रोगान् हन्तीति ।

रोगनाशक ।

Alleviating diseases.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

आमविपाचनः (च. सि. १५.९७)

आमं विशेषेण पाचयतीति ।

आम का विशिष्ट पाचन ।

Specific digestive of āma.

आमविषोदीरणम् (च. सू. २६.८४)

आमविषमुदीरयति प्रेरयतीति, यथोक्तं वैरोधिकान्नप्रकरणे—'सर्वानेव मत्स्यान्न पयसा सहाभ्यवहरेद् विशेषतस्तु चिलचिमं, स हि महाभिष्यन्दित्वात् स्थूललक्षणतरानेतान् व्याधीनुपजनयत्यामविषमुदीरयति च' इति ।

आमविष को प्रेरित करने वाला ।

Aggravating āma poison.

आमशोषणम् (च. चि. २७.२५)

आमे द्रवांशस्य विशोषणम्, यथोक्तं—'तस्य संशमनं नित्यं क्षपणं शोषणं तथा । युक्त्यपेक्षी भिषक् कुर्यादधिकत्वात् कफामयोः ॥' इति । क्षपणं सर्वथोच्छेदनं, शोषणं द्रवभागविशोषणम्' इति चक्रः ।

आम में द्रवांश का शोषण ।

Absorption of liquid in āma.

आमहरः (अ. हृ. चि. १०.८)

आमघ्नः, आमपाचनः इत्यर्थः ।

आम को नष्ट करने वाला ।

Alleviating āma.

आमातिसारघ्नः (च. चि. १९.१०३)

आमातिसारं हन्तीति । अग्निमुद्दीप्य आमं पाचयित्वा अतिसारं निवर्तयतीति यावत्, यथा शालपर्ण्यादिगणः, उक्तञ्च—'वातश्लेष्महरो ह्येष गणो दीपनपाचनः । ग्राही बल्यो रोचनश्च तस्माच्छस्तोऽतिसारिणाम्' इति ।

(च. चि. १९.२६-२९)

आमातिसार का नाशक ।

Checking diarrhoea caused by āma.

आमाशयशोधनम् (च. चि. २०.३४)

कफवृद्धौ वमनेनामाशयशोधनम् ।

अन्यत्र (च. चि. २६.१०३) आमाशयशोधनं विरेचनमिति चक्रः ।

आमाशय का शोधन ।

Cleansing stomach.

आयुःप्रकर्षकृत् (च. चि. १.३.२३)

आयुः प्रकर्षं दीर्घायुष्यं करोतीति । रसायनकर्म ।

दीर्घायु करने वाला ।

Providing longevity.

आयुःप्रदम् (च. चि. ९.४१)

आयुष्यम् ।

दीर्घायु करने वाला ।

Providing longevity.

आयुष्करः (च. सू. २७.३१४, चि. ११.९२)

आयुष्यः ।

आयुःप्रद ।

आयुर्वृद्धिकृत् (च. सि. १.५३)

दीर्घायुःप्रदः, पञ्चकर्मप्रयोगगुणः, यथोक्तं—'इत्यातुरस्वस्थसुखः प्रयोगो बलायुषोर्वृद्धि-कृदामयघ्नः' इति ।

आयु को बढ़ाने वाला ।

Promoting life-span.

आयुर्हिततमः (च. सू. २७.६४)

आयुष्यतमः ।

आयु के लिए उत्तम हितकर ।

Most benefecial for life-span.

आयुर्ह्रासकरम् (च. सू. २५.४०)

आयुःक्षपणम्, यथोक्तं— 'अनशनमायुषो ह्रासकराणाम्' इति ।

आयु को घटाने वाला ।

Causing decrease in life-span.

आयुष्करी (सु. सू. ६.१५)

आयुः शरीरेन्द्रियसत्त्वात्ममनसां संयोगः (ड०), तत्करी दीर्घायुःप्रदेत्यर्थः ।

दीर्घायु करने वाली ।

Providing longevity.

आयुष्यः (च. सू. २६.४३ (१))

आयुषे हितः । आयुष्यस्तु आयुःप्रकर्षकारित्वेन । (चक्रः) मधुररसस्य कर्म ।

आयु के लिए हितकर (दीर्घायु करने वाला) ।

Benefecial for life-span (providing longevity)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

आरोग्यम् (च. इ. ६.२३-२४)

१. आरोग्यहेतुः व्याधिक्षमत्वम् आरोग्यं हीयत इति अत्रोक्तरोगव्यतिरिक्तरोगवृद्ध्या आरोग्यहानिर्बोध्या। (चक्र.)

रोगक्षमता। Immunity

२. रोगाभावः रोगविनाश इति यावत् (च. चि. १९.७७)।

रोग का अभाव (स्वास्थ्य)।

Absence of disease (Health).

आरोग्यकरः (च. चि. ११.९२)

व्याधिक्षमत्ववृद्धिपूर्वकं रोगाभावं स्वास्थ्यं करोतीति। रसायनगुणः।

रोगक्षमता को बढ़ाते हुए रोगरहित (स्वस्थ) बनाने वाला।

That which provides disease-free condition (health) by promoting immunity.

आरोग्यदम् (च. चि. २९.१०२)

आरोग्यं रोगाभावं ददातीति, रोगं विनाशयतीत्यर्थः।

आरोग्य प्रदान करने वाला।

Health-providing.

आर्त्तवशुद्धिकरणम् (सु. शा. २.१६)

आर्तवस्य शुद्धिः दोषानपाकृत्य तत्प्राकृतत्वं क्रियतेऽनेनेति।

आर्तव को शुद्ध करने वाला।

Making menses normal.

आर्द्रा (च. सू. २७.२९७)

रसपूर्णा, प्रत्यग्रा। पिप्पल्या विशेषणम्।

ताजी। Fresh.

आलस्यापहरम् (च. चि. १.२.३)

आलस्यं दूरीकृत्य स्फूर्तिं जनयति। रसायनकर्म।

आलस्य को दूर कर स्फूर्ति देने वाला।

Providing energy by removing idleness.

आशयलाघवम् (च. सि. १.४१)

पुरीषमूत्राशयादीनां लाघवम्।

आशयों (कोष्ठ) का लाघव।

Lightness in viscera.

आशुकारी (सु. सू. ४६.५२४)

आशु शीघ्रं प्रसृत्य कर्म कर्तुं शीलं यस्य सः, यथोक्तं 'आशुकारी तथाशुत्वाद्धावत्यम्भसि तैलवत्' इति।

शीघ्र कर्म करने वाला।

Immediately acting.

आशुदोषहरणम् (च. क. ७.९)

शीघ्रं दोषं निर्हरतीति।

दोष को शीघ्र निकालने वाला।

Eliminating impurity immediately.

आशुबलाभिवर्धनम् (च. चि. ११.३६)

शीघ्रं बलमभिवर्धयतीति।

शीघ्र बल को बढ़ाने वाला।

Promoting strength instantaneously.

आशुरोहणम् (सु. चि. १.८६)

व्रणानां शीघ्रं रोहणम्, यथोक्तं— 'मृदुत्वमाशुरोहं च गाढो बन्धः करोति हि।' इति।

व्रण को शीघ्र भरने वाला।

Immediately wound-healing.

आशुव्यवायिताकरम् (च. सू. २७.३२५)

आहृतद्रव्यं शीघ्रं शरीरे व्यापयति प्रसारयतीत्यर्थः। अनुपानकर्म।

द्रव्य को शीघ्र शोषण एवं संवहन कराने वाला।

Helping absorption and circulation of drug.

आश्वङ्गाभिवर्धनम् (च. सि. ११.३६)

शीघ्रमङ्गानि अभिवर्धयतीति, यथोक्तं—'न चान्यदाश्वङ्गबलाधिवर्धनं निरुहवस्तेः शिशुवृद्धयोः परम्' इति। अंगों की शीघ्र वृद्धि करने वाला।

Promoting growth of organs immediately.

आश्वासकरम् (च. सू. २५.४०)

आश्वासयतीति, यथोक्तं— 'उदकमाश्वासकराणाम्' इति।

चित्त को आश्वस्त करने वाला।

Assuring.

आस्थापनम् (च. सू. १.८४)

निरूहो वस्तिः। 'स दोषनिर्हरणाच्छरीरनीरोहणाद्वा निरूहः, वयः स्थापनादायुः स्थापनाद् वा आस्थापनम्'। (सु. चि. ३५.१८)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

निरूहवस्ति ।

Non-unctions enema.

आस्थापनोपगः (च. सू. ४.८)

आस्थापनमुप सहायत्वेन गच्छतीति। आस्थापनोपगो महाकषायो यथा चरके— 'त्रिवृद्बिल्वपिप्पलीकुष्ठसर्षपवचावत्सकफल-शतपुष्पामधुकमदनफलानीति दशेमान्यास्थापनोपगानि भवन्ति ।' इति ।

निरूहवस्ति में सहायक ।

Supporting non-unctuous enema.

आस्यदौर्गन्ध्यनाशनम् (च. चि. २६.२१३)

आस्यस्य मुखस्य दौर्गन्ध्यं नाशयतीति ।

मुखदुर्गन्धनाशक ।

Removing foul smell of mouth.

आस्यरोगनुत् (च. चि. २६.१९६)

मुखरोगापहः ।

मुखरोगनाशक ।

Alleviating diseases of mouth.

आस्यविशोधनम् (सु. सू. ४६.५७)

आस्यं मुखं विशोधयतीति । भव्यकर्म ।

मुखशोधनम् ।

Mouth-cleansing.

आस्यास्रावणः (च. सू. २६.४२ (२), (३)

मुखे लालास्रावं प्रेरयति स्रावाधिक्यं करोतीत्यर्थः यथा अम्ललवणारसौ ।

लालास्राव बढ़ाने वाला ।

Stimulating salivary secretion.

इ

इच्छा (च. शा. १.७२)

अनुकूलात्मिका प्रवृत्तिः, आत्मगुणः ।

इच्छा । Desire

इन्द्रियदृढीकरणः (च. सू. २६.४३ (२)

इन्द्रियेषु दार्ढ्यं स्थैर्यं जनयतीति । अम्लरसकर्म ।

इन्द्रियों में दृढता करने वाला ।

Producing stability in organs.

इन्द्रियदौर्बल्यम् (सु. सू. २०.१९)

इन्द्रियाधिष्ठानदौर्बल्यमिन्द्रियशक्तिदौर्बल्यं वा । (ड०)

इन्द्रियों में दुर्बलता ।

Weakness in sense-organs.

इन्द्रियप्रसादः (च. सू. १६.१८)

इन्द्रियाणां स्वेष्वर्थेषु स्वाभाविकी प्रवृत्तिरक्षोभश्चेति । इन्द्रियप्रसादः स्वस्थलक्षणं, यथोक्तं सुश्रुते— 'प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ।' इति ।

इन्द्रियों की प्राकृत स्थिति ।

Normal functioning of sense organs.

इन्द्रियप्रसादकरः (च. सू. २७.३)

इन्द्रियाणां प्रसादं करोतीति, यथोक्तं— 'तत् (अन्नपानं) शरीरधातुव्यूहबलवर्णेन्द्रियप्रसादकरं यथोक्तमुपसेव्यमानम्' इति ।

इन्द्रियों का प्रसादजनक ।

Promoting normal functioning of sensory and motor organs.

इन्द्रियबलकरः (च. सू. २७.३१४)

इन्द्रियेषु बलमाधत्ते इति, उक्तं हि—'सर्वरोगप्रशमनं यथास्वं विहितं रसम्। विद्यात् स्वर्यं बलकरं वयोबुद्धीन्द्रियायुषाम् ।' इति । मांसरसकर्म ।

इन्द्रियों के लिए बलप्रद ।

Strengthening organs sensory as well as motor.

इन्द्रियबलप्रदा (च. चि. १.१.३०)

इन्द्रियबलकरी । हरीतकीकर्म ।

इन्द्रियों के लिए बलप्रद ।

इन्द्रियबोधनम् (सु. सू. ४५. १७९)

इन्द्रियपाटवकरम् । (ड०)

मद्यकर्म ।

इन्द्रियों को जाग्रत करना ।

Stimulating sense organs.

इन्द्रियसंतर्पणः (सु. चि. २४.२६)

इन्द्रियाणि सम्यक् तर्पयतीति ।

इन्द्रियों का संतर्पण करने वाला ।

Saturating sense organs.

इन्द्रियसंप्रसादः (च. सि. १.१७)

इन्द्रियाणां सम्यक् प्रसादः नैर्मल्यम्, प्राकृतस्थितिरिति यावत् ।

इन्द्रियों की प्रसन्नता (स्वास्थ्य) ।

Normal state of sense organs.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इन्द्रियस्फुटीकरणम् (च. सू. २६.४३ (४)

इन्द्रियाणां स्फुटत्वं प्रव्यक्तत्वं प्रवृत्तिवैशद्यं करोतीति। कटुरसकर्म।

इन्द्रियों में स्पष्टता लाने वाला।

Producing clarity in sense organs.

इन्द्रियाच्छ्यम् (च. सि १.५१)

इन्द्रियप्रसादः।

इन्द्रियों की स्वच्छता।

Clarity of sense organs.

इन्द्रियोपघातकरम् (च. वि. २.७)

इन्द्रियाणामुपघातं नाशं करोतीति। हीनमात्राहारस्य कर्म।

इन्द्रियों को नष्ट करने वाला।

Causing loss of function of sense organs.

इन्द्रियोपरोधनः (च. सू. २६.४३ (३)

इन्द्रियाणि उपरुणद्धि तेषां स्वार्थप्रवृत्तिं बाधते इति। लवणरसकर्म।

इन्द्रियों के कार्य में बाधा डालना।

Causing obstruction in function of sense organs.

उ

उत्क्लेदि (च. सू. २७.३०३)

प्रकृष्टतया क्लेदजननम्। 'आर्द्रीभावकारि, अन्ये प्रकोपयति श्लेष्मपित्तादीन् इत्याहुः' इति डल्हणः। औद्भिदलवणकर्म।

अधिक क्लेद उत्पन्न करने वाला या कफ-पित्त आदि को प्रकुपित करने वाला।

Causing excessive humidity or aggravating kapha, pitta etc.

उत्क्लेशजननम् (सु. सू. ४६.१२८)

उत् ऊर्ध्वगत्या क्लेशः हृदयादीनामुपतापोऽरतिरित्युत्क्लेशः हल्लासः, उत्क्लेशः थूत्करणमिति डल्हणः, तं जनयतीति।

हल्लास उत्पन्न करने वाला।

Causing nausea.

उत्क्लेशनः (सु. चि. ३८.९३)

उत्कर्षेण क्लेशयति श्लेष्मादीन् संवर्ध्य प्रेरयतीति। हुल्लासजनक इत्यर्थः।

हल्लासजनक।

उत्तमाङ्गशोधनम् (अ. हृ. सू. १५.४)

मूर्धविरेचनम्। (अ.द.)

शिरोविरेचन।

Head-evacuation.

उत्तरवातिकानि (च. सू. १४.४४)

उत्तरवाते प्रधानवाते वातश्लेष्मणि हितानि (चक्र०), यथा—'करमर्दं सबदरं कुलत्थाः शुष्कमूलकम्। श्वदंष्ट्रा वेणुपर्णी च साश्वगन्धा शतावरी। ऋष्यप्रोक्ता गुडूची च मधुकं शिग्रुरेव च। यवान्यारग्वधश्चैव यच्चान्यत् किञ्चिदीदृशम्॥ सर्वमेतद् विजानीयाद् भिषगुत्तरवातिकम्।' इति। तन्त्रान्तराच्चक्रः (च. चि. ८.७३)

वात की प्रधानता में हितकर।

Useful in prodominace of vāta.

उत्थापनम् (च. चि. २८.९६)

पुष्टिजननम्। (चक्रः)

शरीर को उठाना अर्थात् पुष्ट करना।

Elevating (developing) the body.

उत्सवामोदकारकम् (च. चि. २४.६५)

उत्सवः औत्सुक्यं विषयाभिलाष इति यावत्, आमोदो हर्षः (चक्रः), तौ करोतीति। मद्यगुणः।

उत्तेजक एवं हर्षदायक।

Stimulating and exhilarating.

उत्सादनम् (सु. चि. १.८२)

निम्नव्रणस्योन्नतिकारणम् (ड०), निम्नव्रणोत्थापनमिति चक्रः (च. चि. २५.४२)।

निम्न व्रण को ऊपर उठाना।

Elevating depressed wound.

उत्साहजननम् (च. सू. २७.८१)

उत्साहं जनयतीति।

स्फूर्तिप्रदम्।

उत्साहप्रद।

Energy-providing.

उदरनुत् (च. चि. १३.१३८)

उदररोगापहः।

उदररोगनाशक।

Alleviating abdominal enlargements.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

उदरभेदी (सु. सू. ३८.३०)

उदररोगं भिनत्ति मलसञ्चयापहरणेन निवारयतीति।

उदररोग (के कारणभूत मलसंचय) को विदीर्ण करना।

Eliminating abdonimal enlargements by breaking accumulated faecal mass.

उदराध्मानकरः (च. सू. २६.४३)

कोष्ठे वातं विवर्ध्योदरमाध्मापयतीति। कषायरसकर्म।

उदर में आध्मान करने वाला।

Causing tympanitis.

उदर्दप्रशमनः (च. सू. ४.८)

उददों वरटीदष्टाकारः शोथः, तत्प्रशमन उदर्दप्रशमनः, न पुनरिह महारोगाध्याये पठितो वातविकारो गृह्यते, तिन्दुकादीनामुदर्दप्रशमनानां वातं प्रत्यननुकूलत्वात्। (चक्रः)। उदर्दप्रशमनो महाकषायो यथा— 'तिन्दुकप्रियालबदरखदिरकदरसप्तपर्णाश्वकर्णार्जुनासनारिमेदा इति दशेमान्युदर्दप्रशमनानि भवन्ति' इति।

उदर्दशामक।

Pacifying allergic rashes.

उदर्दापहः (च. सू. २६.४३ (४)

उदर्दप्रशमनः। कटुरसकर्म।

उदर्दशामक।

उदर्याग्न्युदीरणम् (च. वि. ३.४०)

जाठराग्निसंधुक्षणम्। उष्णोदकस्य कर्म।

जठराग्निदीपन।

Stimulating digestive fire.

उदावर्तकरम् (च. वि. २.७)

उदूर्ध्वं वातस्यावर्तः गतिः उदावर्त्तः, तं करोतीति। हीनमात्राहारस्य दोषः।

उदावर्त करने वाला।

Causing udāvarta (upward movement of vāyu).

उदावर्तजननाः (अ. हृ. चि. १.९६)

उदावर्तकराः।

उदावर्तजनक।

उदावर्तनुत् (च. चि. २८.९०)

उदावर्त्तहरम्।

उदावर्तनाशक।

Alleviating udāvarta.

उदावर्तहरम् (च. सू. २३.३७)

उदावर्त्तमपनयतीति। यथोक्तं—'फाणितं सक्तवः सर्पिर्दधिमण्डोऽम्लकाञ्जिकम्। तर्पणं मूत्रकृच्छ्रघ्नमुदावर्तहरं पिबेत्॥' इति। 'समघृतसक्तुप्राशाभ्यासो वृष्योदावर्तहराणाम्' इति च (च.सू. २५.४०)।

उदावर्तनाशक।

उद्गारशोधि (च. सू. २७.३०१)

उद्गारं शोधयति निर्हरति आमाशयगतवातस्यानुलोमनेनेति, यथा सौवर्चलम्, उक्तं हि— 'सौवर्चलं विबन्धघ्नं हृद्यमुद्गारशोधि च इति। कृष्णजीरश्चाप्युद्गारशोधनः प्रोक्तः, यथा भावप्रकाशनिघण्टौ— 'कृष्णजीरः सुगन्धिश्च तथैवोद्गारशोधनः' इति।

उद्गारशोधक।

Normalises eructations by carmination.

उद्वेपनप्रशमनः (च. सू. २५.४०)

उद्वेपनं कम्पनं शीताधिक्यात् तत् प्रशमयतीति, यथाऽग्निः।

कम्पशामक।

Checking rigour.

उद्वेष्टनम् (सु. क. २.७)

अंगमोटनम् (ड०)।

अंगों में ऐंठन।

Cramps in body parts.

उन्मादनाशनः (च. चि. ९.३४)

उद्गता दोषा उन्मार्गमागता मदयन्ति मनोबुद्धिसंज्ञाज्ञानस्मृतिभक्तिशीलचेष्टाचारविभ्रमं जनयन्तीत्युन्मादः, तं नाशयतीति।

उन्मादनाशक।

Alleviating insanity.

उन्मादनुत् (च. चि. १०.२५)

उन्मादहरम्, यथोक्तं— 'ब्राह्मीरसवचाकुष्ठशङ्खपुष्पीभिरेव च। पुराणं घृतमुन्मादालक्ष्म्यपस्मारपापनुत्॥' इति।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

उन्मादनाशक ।

उन्मादापहः (च. चि. ९.७२)

उन्मादनाशनः ।

उन्मादनाशक ।

उपक्लेदनम् (च. वि. १.१८)

आर्द्रीकरणं, यथा लवणम् ।

आर्द्र करने वाला ।

Moistening.

उपक्लेदकराणि (च. सू. २६.११)

उपक्लेदमार्द्रतां कुर्वन्तीति, आप्यद्रव्याणि ।

आर्द्र करने वाले ।

उपक्लेदि (च. वि. १.१८)

उपक्लेदयितुमार्द्रीकर्तुं शीलं यस्य तत्, लवणविशेषणम् ।

क्लेदन ।

उपचयः (च. सू. २१.३३)

बृहत्त्वम्, यथोक्तं— 'हत्वातिकार्श्यमाधत्ते नृणामुपचयं परम्' इति ।

शरीर की पुष्टि ।

Development, increase in body weight.

उपचयकरम् (सु. सू. ४१.४ (१))

उपचयो बृंहणम् (ड०), तत्करम् ।

पार्थिवद्रव्यकर्म ।

उपचय करने वाला (बृंहण) ।

Increasing body weight.

उपचयक्षयकरः (च. वि. २.७)

उपचयः शरीरवृद्धिः, तस्य क्षपणः ह्रासकः ।

हीनमात्राहारस्य विशेषणम् ।

शरीर वृद्धि का ह्रास करने वाला ।

Diminishing body development.

उपचयवर्धनाः (च. सू. १.८७)

शरीरवृद्धेः प्रेरकाः, यथा 'स्नेहना जीवना वर्ण्या बलोपचयवर्धनाः । स्नेहाः ' इति ।

उपचय को बढ़ाने वाला ।

Promoting body development.

उपचयापहः (च. सू. २६.४२ (४)

उपचयं देहवृद्धिमपहन्तीति, शरीरवृद्धेर्बाधक इत्यर्थः ।

देहवृद्धि का निरोधक ।

Checking body development.

उपरोपणः (सु. चि. १.६८)

उप सहायत्वेन (व्रणं) रोपयतीति, रोपणोपग इत्यर्थः ।

व्रणरोपण में सहायक ।

Supporting wound-healing.

उपलेपनुत् (च. चि. २६.२१३)

उपलेपः श्लेष्मणा, तं हरतीति ।

उपलेपनाशक ।

Removing stickiness.

उपशमनीयः (च. सू. २६.८)

बृंहणशमनः, इति चक्रः ।

शामक ।

Pacifying.

उपशोषणः (च. सू. २६.४३ (५)

उपशोषयत्यार्द्रधातुमलानिति, यथोक्तं तिक्तरस-विवरणे— 'क्लेदमेदोवसामज्जलसीकापूयस्वेद-मूत्रपुरीषपित्तश्लेष्मोपशोषणः' इति । 'कुटजत्वक् श्लेष्मपित्तरक्तसांग्राहिकोपशोषणानाम्' इति च ।

(च. सू. २५.४०)

आर्द्रताशोषक ।

Moisture-absorbing, absorbent.

उपस्तम्भः (च. सू. ११.३५)

धारयति शरीरमिति, यथोक्तं—'त्रयः उपस्तम्भा इति आहारः स्वप्नो ब्रह्मचर्यम्' इति ।

शरीरधारक ।

Supporting body.

उपस्तम्भनम् (च. सि. २०.४६)

१. उपस्तभ्नाति रुणद्धि छर्दिवेगानिति । उपस्तम्भनं छर्दीनां पवनस्य वा । (चक्र.)

रोधक ।

Checking (vomiting or flatus).

२. धारयति शरीरबलमित्ति यथा 'त्रय उपस्तम्भाः शरीरस्य' इति । धारक ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

उभयतोभागम् (सु. सू. ४१.६)

उभयतोभागहरम्।

वमन-विरेचन।

Eliminating impurities both upwards and downwards. (emetic-purgative).

उभयतोभागदोषहरम् (सु. सू. ४५.१२२)

उभयतोभागदोषहरे वमनेन विरेचनेन चेत्यर्थः। (ड०)

उभयतोभागहरम्।

उभयतोभागहराणि (सु. सू. ३९.५)

वमनानि विरेचनानि चेत्यर्थः। (ड०)

उभयतोभागहर।

उभयभाक् (च. सू. १५.७)

उभयतोभागहरम्, वमनं विरेचनञ्चेति।

उभयतोभागहर।

उभयभागम् (सु. सू. ४०.५)

उभयतोभागहरम्, वमनं विरेचनञ्चेत्यर्थः।

उभयतोभागहर।

उभयशोधनम् (अ. हृ. उ. ९.३१)

ऊर्ध्वधःशोधनम् (अ.द.), यथोक्तं—'सप्तलारससिद्धाज्यं भोज्यं चोभयशोधनम्, इति।

उभयतोभागहर।

उरगनुत् (च. चि. २३.१००)

सर्पनाशकः।

सर्पनाशक। Destroying snakes.

उरोलाघवम् (च. सि. १.५१)

उरसो वक्षसो लाघवं सञ्चितश्लेष्मनिर्हरणात्। सम्यक्शिरोविरेचनलक्षणम्।

छाती में हल्कापन।

Lightness in chest.

उरोविशुद्धिः (च. चि. १८.१६७)

दोषावरुद्धवक्षसो दोषनिर्हरणाद् विशुद्धिः। कासहरभेषजस्य कर्म।

वक्ष का विशोधन।

Purification of chest.

उरःपरिदहनः (च. सू. २६.४३ (२)

आहृते सति वक्षःप्रदेशे परितो दाहमुत्पादयतीति, यथाऽम्लो रसः।

छाती में जलन।

Burning in chest.

उल्लेखनम् (च. चि. २१.४४)

१. उल्लेखनं वमनम्। (चक्रः)

वमन। Vomiting.

२. लङ्घनम्। (च. चि. ६.२५)

शरीर को हल्का करना। Lightening.

उष्णः (च. शा. ६.१०)

१. उष्णत्वापादको धातुगुणः अग्निसमवायी।

उष्ण गुण। Hot property.

२. उष्णम्—स्पर्शे वीर्ये वा (च) उष्ण द्रव्यम्।

स्पर्श या (और) वीर्य में उष्ण द्रव्य।

Substance hot in touch or (and) uṣṇa in potency.

उष्णवीर्यम् (च. सू. १४.३७)

प्रयोगे उष्णत्वापादकं, पित्तवृद्धिकरं वातश्लेष्मप्रशमनञ्च, यथा चित्रकः।

उष्णवीर्य। Usṇa vīrya.

उष्णसंस्पर्शम् (अ. हृ. चि. १.१३५)

स्पर्शत उष्णम्, यथा पिण्डस्वेदः, तगरादि द्रव्यं स्पर्शतो वीर्यतश्चोभयथोष्णम्।

स्पर्श में उष्ण।

Hot in touch.

उष्णसुगन्धि (चक्र., च. सू. १४.५२)

उष्णवीर्यं सुगन्धि च यथा कुष्ठादि।

उष्ण एवं सुगन्धित।

Hot as well as aromatic.

ऊ

ऊरुग्रहापहः (च. चि. २७.३३)

ऊरुग्रहं ऊरुस्तम्भमपहन्तीति, ऊरुस्तम्भनाशन इत्यर्थः।

ऊरुस्तम्भनाशक।

Alleviating ūrustambha.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ऊरुस्तम्भनिवारणः (च. चि. २७.५७)

ऊरुस्तम्भापनयनः ।

ऊरुस्तम्भनाशक ।

ऊरुस्तम्भविनाशनाः (च चि. २७.२८)

ऊरुस्तम्भहराः ।

ऊरुस्तम्भनाशक ।

ऊर्जस्करम् (च. चि. १.१.४)

ऊर्जः प्रशस्तशक्तिकत्वं करोतीति ।

ऊर्ध्वकफानुलोमनम् (अ. हृ. सू. ६.१४६)

ऊर्ध्वमार्गेण कफस्यानुलोमनं निर्हरणार्थं प्रेरणम् ।

ऊर्ध्वमार्ग से कफ को प्रेरित करना ।

Pushing kapha by upward passage.

ऊर्ध्वगदापहम् (च. चि. २६.१७५)

ऊर्ध्वजत्रुगतरोगहरम् ।

ऊर्ध्वजत्रुगतरोगों का नाशक ।

Alleviating supraclavicular diseases.

ऊर्ध्वगमम् (अ. हृ. सू. ९.११)

ऊर्ध्वं गच्छतीति (अ.द.), वमनम्, यथोक्तं—'द्रव्यमूर्ध्वगमं तत्र प्रायोऽग्निपवनोत्कटम्' इति ।

वमन । Emetic.

ऊर्ध्वजत्रुगदापहम् (च. चि. २६.१६५)

ऊर्ध्वजत्रुगतरोगहरम् ।

ऊर्ध्वजत्रुगत रोगों का नाशक ।

ऊर्ध्वभागम् (च. चि. २५.३८)

ऊर्ध्वभागहरं विशोधनम्, वमनमित्यर्थः । 'ऊर्ध्वं मुखेन दोषनिर्हरणं भजत इत्यूर्ध्वभागम्' इति चक्रः (च. क. १.४)

वमन । Emetic.

ऊर्ध्वभागहराणि (सु. सू. ३९.३)

वमनकराणि । (ड०)

वमन । Emetic.

ऊर्ध्ववातघ्नम् (च. चि. २२.४०)

ऊर्ध्ववातः रोगविशेषो यस्मिन् आमाशयगत-वाताधिक्यादुद्वाराधिक्यं भवति, तद्धन्तीति । चक्रस्तु ऊर्ध्ववातः श्वास इति । उक्तं माधवेन— 'अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन वा । करोत्युद्वारबाहुल्यमूर्ध्ववातः स उच्यते ॥' इति ।

ऊर्ध्ववात का नाशक ।

Alleviating ūrdhvavāta (excessive belching).

ऊर्ध्ववातानुलोमनम् (अ. हृ. सू. ६.१४६)

ऊर्ध्वमामाशयगतवातस्यानुलोमनमुद्गारैः बहिः प्रेरणम्, यथोक्तं—'ऊर्ध्वाधःकफवातानुलोमनं दीपनं बिडम्' इति ।

आमाशयगत वात को ऊपर की ओर प्रेरित करना ।

Carminative.

ऊर्ध्ववातानुलोम्यकरम् (च. सू. २७.३०२)

ऊर्ध्वं वातानुलोमनमुद्गारविशोधनेन ।

ऊर्ध्ववातानुलोमन ।

ऊर्ध्वं शोधनम् (सु. चि. २.८६)

वमनशिरोविरेचने । (ड०)

ऊर्ध्वमार्गों से शोधन (वमन और शिरोविरेचन) ।

Purification by upward passages e.g. emesis and head-evacuation.

ऊर्ध्वसंशोधनम् (च. चि. ३.२२७)

वमनम् ।

वमन । Purification by upward passage.

ऊर्ध्वसमीरणघ्नम् (च. चि. २६.२०)

ऊर्ध्ववातहरम् । (द्र०-ऊर्ध्ववातघ्नम्)

ऊर्ध्ववातहर ।

ऊर्ध्वहरम् (च. सू. १५.७)

वमनम् ।

वमन ।

ऊर्ध्वानुलोमनम् (अ. हृ. सू. ६.१४६)

ऊर्ध्वमार्गेण कफस्य वातस्य च निर्गमनार्थं प्रेरणम् ।

ऊर्ध्वमार्ग से दोषों का अनुलोमन ।

Pushing doṣas (kapha and vāta) through upward passage.

ऊर्ध्वानुलोमिकम् (च. सू. २६.६९)

युगपदुभयभागहरं, किं वा ऊर्ध्वहरं तथाऽनुलोमहरं च । (चक्रः)

वमन - विरेचन ।

Emetic-purgative.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ऊर्ध्वौषधम् (च. चि. २५.१६)

वमनद्रव्यम् ।

वमन । Emetic.

ऊषणः (अ. हृ. सू. १.१४)

कटुकः, यथा मरिचादिः (अ. द.) ।

कटु । Pungent.

ओ

ओकसात्म्यम् (च. सू. ६.४९)

'उपशेते यदौचित्यादोकसात्म्यं, तदुच्यते' इति । औचित्यात् अभ्यासात् (चक्र.), यथा हि चरकः—'सात्म्यं नाम तद् यत् सातत्येनोपसेव्यमानमुपशेते' इति । अत्र 'सात्म्यशब्देन ओकसात्म्यमुच्यते (चक्र०) ।

अभ्यास से हितकर ।

Suitable by practice.

ओजस्करम् (च. चि. १.३.२८)

ओजस्करी (सु. सू. ६.१५)

१. ओजोवर्धनम् । ओजः हृदयाश्रितं सप्तधातुस्नेहः (ड०), तत्करीति ।

ओजवर्धक । Promoting ojas.

२. उत्साहकरम् (च. सू. ५.९४)

शक्तिवर्धक । Engery-providing.

ओजस्यम् (च. सू. ३०.१४)

१. ओजसे हितं, ओजोरक्षकं वर्धकञ्चेति ।

ओज के लिए हितकर (रक्षक और वर्धक) ।

Wholesome for ojas (by preserving and promoting)

२. दीप्तिकरम् (च. सू. ५.९७)

'ओजो दीप्तौ बले' इत्यमरः ।

कान्तिवर्धक । Promoting lustre.

ओजोऽभिवर्धनः (च. सू. २६.४३ (१)

ओजः अभितो वर्धयतीति । मधुररसस्य कर्मपरको विशेषणः ।

ओज का वर्धक ।

Promoting ojas.

ओजोवर्धनम् (सु. चि. २४.६३)

शक्तिवर्धनम् । अनुलेपनकर्म ।

शक्तिवर्धक । Energy-providing.

ओजोविवर्धनम् (च. सू. २७.२३१)

ओजो विशेषेण वर्धयतीति, घृतविशेषणम् ।

ओज का विशेष रूप से वर्धक ।

Specifically promoting ojas.

औ

औष्ण्यम् (च. सू. २७.३०२)

उष्णस्य भाव औष्ण्यम् । यथोक्तं बिडगुणे—'तैक्ष्ण्यादौष्ण्याद् व्यवायित्वाद् दीपनं शूलनाशनम्' इत्यादि ।

उष्णता । Hotness.

क

कचान्तकृत् (सु. चि. १.१०८)

केशविनाशकारी । (ड०) यथोक्तं— 'आगारगोधिकापुच्छं रम्भाऽऽलं बीजमैङ्गुदम् । दग्ध्वा तद्भस्म तैलाम्बुसूर्यपक्वं कचान्तकृत् ॥' इति ।

केशनाशक । Depilatory.

कटुकः (च. सू. १.६५)

कटत्यावृणोति तैक्ष्ण्यान् मुखमिति कटुः, षड्रसानामन्यतमः, वाय्वग्निनिष्पन्नः ।

कडुवा । Pungent.

कटुविपाकम् (सु. .सू. ४५.१७)

विपाके कटु यथा पुराणं घृतम् ।

कटुविपाक । Pungent in vipāka.

कठिनः (च. शा. ६.१०)

मृदुविपरीतो गुणः ।

कड़ा । Hard.

कण्ठघ्नम् (च. सू. २७.१३६)

कण्ठं स्वरं हिनस्तीति, स्वरभेदं जनयतीत्यर्थः, यथा आमं कपित्थम्, यथोक्तं—'कपित्थमामं कण्ठघ्नं विषघ्नं ग्राहि वातलम्' इति ।

स्वरभेदजनक ।

Affecting throat (causing hoarseness of voice.)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कण्ठपरिदहनः (च. सू. २६.४३(४))

कण्ठे परितो दाहं जनयतीति, कटुरसस्याम्लरसस्य च कर्म ।

गले में जलन करने वाला ।

Causing burning in throat.

कण्ठं बध्नातीव (च. सू. २६.७९)

कण्ठदेशमवरुणद्धीव, कषायरसस्य लक्षणम् ।

गले में अवरोध करने वाला ।

Causing obstruction in throat as if constricted.

कण्ठरोगविनाशनाः (च. चि. २६.२०१)

कण्ठरोगान् विशेषेण नाशयन्तीति, यथा— 'कटुकातिविषापाठादार्वीमुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाशनाः ॥' इति ।

गले के रोगों का नाशक ।

Alleviating disorders of throat.

कण्ठ्यः (च. सू. ४.८)

१. कण्ठाय हितः स्वरभेदकासादिदोषपरिहरणेनेति, कण्ठ्यमहाकषाये यथोक्तं चरकेण— 'सारिवेक्षुमूलमधुकपिप्पलीद्राक्षाविदारीकैटर्यहंसपादीबृहतीकण्टकारिका इति दशेमानि कण्ठ्यानि भवन्ति' इति ।

गले के लिए हितकर । Benefecial for throat.

२. कण्ठे भवः । (सु. चि. २२.५९)

गले में होने वाला । located in throat.

कण्डूघ्नः (च. सू. ४.८)

कण्डूं हन्तीति, यथा कण्डूघ्नो महाकषायश्चरके— 'चन्दननलदकृतमालनक्तमालनिम्बकुटजसर्षपमधुकदारुहरिद्रामुस्तानीति दशेमानि कण्डूघ्नानि भवन्ति' इति ।

कण्डूनाशक । Anti-pruritic.

कण्डूशमनाः (च. चि. १४.५८)

कण्डूं शमयन्तीति ।

कण्डूशामक ।

Pacifying itching.

कण्डूहरम् (च. चि. ३०.१०४)

कण्डूघ्नम् ।

कण्डूनाशक ।

कफकासघ्नः (च. चि. १८.११७)

कफजकासं हन्तीति, यथोक्तं— 'कासमर्दाश्वविट्भृङ्गराजवार्ताकजो रसः । सक्षौद्रः कफकासघ्नः सुरसस्यासितस्य च ॥' इति ।

कफज कास का नाशक ।

Alleviating cough caused by kapha.

कफकासहरः (च. चि. १८.१२१)

कफजकासं हरतीति ।

कफज कास को दूर करने वाला ।

कफक्षपणम् (च. चि. २७.२५)

कफक्षयकारि । 'क्षपणं सर्वथोच्छेदेन' इति चक्रः । चरके यथोरुस्तम्भचिकित्सायाम्—' तस्य संशमनं नित्यं क्षपणं शोषणं तथा । युक्त्यपेक्षी भिषक् कुर्यादधिकत्वात् कफामयोः ॥' इति ।

कफनाशक ।

Eradicating kapha.

कफपित्तनिबर्हणम् (च. सि. ११.७)

कफपित्तहरम् । क्फपित्तनाशक ।

Alleviating kapha and pitta.

कफपित्तप्रशमनी (च. क. ७.५)

कफं पित्तञ्च प्रशमयतीति ।

कफपित्तशामक ।

Pacifying kapha and pitta.

कफपित्तहारि (च. सि. ११.८)

कफं पित्तञ्च हर्तुं शीलं यस्य ।

कफ और पित्त को निकालने वाला ।

Eliminating kapha and pitta.

कफपित्ताविरोधि (च. सू. २७.१५०)

कफपित्तयोः विरोधं प्रकोपं न करोतीति । यथाह चक्रः— 'दाडिमगुणे कफपित्ताविरोधीति अम्लदाडिमं पित्ताविरोधि, मधुरं तु कफाविरोधि, एवञ्च त्रिदोषहरत्वमस्योपपन्नम्' इति ।

कफ और पित्त का विरोधी नहीं ।

Non-antagonist to kapha and pitta.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कफमेदोनिवारणः (सु. सू. ३८.११)

कफं मेदश्च निवारयतीति, यथा—'वरुणादिर्गणो ह्येष कफमेदोनिवारणः' इति ।

कफ और मेद को दूर करने वाला ।

Eliminating kapha and medas.

कफमेदोविशोषणः (सु. सू. २०.२७)

कफं मेदश्च विशोषयतीति, यथा— 'पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः' इति ।

कफ और मेद को सुखाने वाला ।

Drying kapha and medas (fat).

कफलः (च. सू. २६.६१)

कफं लाति जनयतीति । मधुरविपाकस्य कर्म ।

कफवर्धक ।

Increasing kapha.

कफविच्छेदि (सु. उ. ३९.१०६)

कफं विशेषेण छेत्तुं पृथक्कर्त्तुं शीलं यस्येति, स्त्यानश्लेष्मणो विच्छेदकम् (ड०), यथा— 'दीपनं कफविच्छेदि पित्तवातानुलोमनम् । कफवातज्वरार्तेभ्यो हितमुष्णाम्बु तृट्छिदम् ॥' इति ।

गाढे कफ को निकालने वाला

Eliminiating thick sputum.

कफविलापनम् (सु. चि. २४.५१)

विलापनं द्रवीकरणम् । (ड०)

(गाढे) कफ को द्रव करने वाला ।

Liquifying (thick) sputum.

कफविवर्धनम् (च. सू. २७.२३१)

कफं विशेषेण वर्धयतीति । घृतकर्म । अत्र चक्रः—'यत्तु सुश्रुतटीकाकृतः सुश्रुतोक्तघृतगुणेषु 'त्रिदोषापकर्षणं' इति पठन्ति, तत् संस्कारेण कफहरणादिति ज्ञेयम् ।' इति ।

कफ का विशेष रूप से वर्धक ।

Specifically increasing kapha.

कफविशोषी (सु. सू. ४६.३७०)

कफं विशेषेण शोषयितुं शीलस्येति, यथा— 'पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ' इति ।

कफशोषक ।

Drying kapha.

कफविष्यन्दनः (च. सू. २६.४३(३))

कफं विष्यन्दयति द्रवीकरोतीति ।

लवणरसस्य कर्म ।

कफ को द्रव बनाने वाला ।

Liquifying kapha.

कफव्याधिनिसूदनम् (च. चि. १८.१२८)

कफजन्यरोगाणां नाशनम्, यथोक्तं—'कण्टकारीघृतं ह्येतत् कफव्याधिनिसूदनम्' इति ।

कफरोगनाशक ।

Alleviating kaphaja disorders.

कफहरी (च. चि. १८.१३२)

कफनाशिनी ।

कफनाशक ।

Eliminating kapha.

कफानुलोमनम् (च. सू. २३.३६)

कफमनुलोमयति स्वमार्गे गमयतीति, यथोक्तं— 'सक्तवो मदिरा क्षौद्रं शर्करा चेति तर्पणम् । पिबेन्मारुतविण्मूत्रकफपित्तानुलोमनम् ॥' इति ।

कफ का अनुलोमन (स्वमार्ग में प्रेरण) ।

Carrying kapha in its natural course.

कफामाशयशोधनम् (च. चि. २०.३४)

कफस्यामाशयस्य च शोधनम् (छर्द्याम्) किं वा, कफाशयस्यामाशयस्य च शोधनमिति ।

कफ (या कफाशय) और अमाशय का शोधन

Elimination of kapha and cleansing of stomach.

कफावृद्धिकरः (च. सि. १.९)

यः कफं न वर्धयतीति । विरेच्यातुरे प्रयोज्यः ।

कफ को न बढ़ाने वाला ।

non-aggravating for kapha.

कफोत्क्लेदविनाशनम् (च. सू. २७.१४९)

कफस्योत्क्लेदं प्रभूतद्रवतां विनाशयतीति ।

बिभीतककर्म ।

कफ की द्रवत्व-वृद्धि का नाशक ।

Alleviating excessive liquidity of kapha.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कफोत्क्लेदि (अ. ह. सू. ५.७६)

कफमुत्कर्षेण क्लेदयति अतिद्रवीकरोतीति। (हेमाद्रिः)

कफ के द्रवत्व को बढाने वाला।

Intensively liquifying for kapha.

करणम् (च. वि. १.२२.२)

१. करणं पुनः स्वाभाविकानां द्रव्याणामभिसंस्कारः।

संस्कार। Processing.

२. साधनम्, यथोक्तं— 'करणं पुनस्तद् यदुपकरणायोपकल्पते कर्तुः कार्याभिनिर्वृत्तौ प्रयतमानस्य' इति (च०वि०८.७०)

उपकरण। Instrument, means.

करणलघूनि (चक्र. च. सू. ५.५)

करणात् संस्कारात् भर्जनादेः लघुत्वं प्राप्तानि यथा लाजादीनि।

संस्कार द्वारा लघुताप्राप्त।

That which acquired lightness due to procesing.

कर्कशः (सु. सू. ४६.५२१)

१. 'कर्कशो विशदो' यथा— 'कर्कशो गुणः, विशदो यथेति अजीवनोऽश्लेषी च, तथाऽसन्धानकार्श्यकृच्च' (ड०)। अयं श्लक्ष्णविपरीतवेन पठितः, इत्थं खरकर्कशौ समानार्थकौ।

रुखडा। Rough.

२. स्वल्पकर्कोटकः। (चक्र., च. सू. २७.८७)

शाकविशेषः। A vegetable.

कर्णशूलघ्नम् (सु. चि. २४.२९)

कर्णशूलं हन्तीति, यथोक्तं— 'हनुमन्याशिरःकर्णशूलघ्नं कर्णपूरणम्' इति।

कर्णशूल का नाशक।

Alleviating earache.

कर्णशूलनिवारणम् (च. चि. २६.२२३)

कर्णशूलं निवारयतीति। यथोक्तं— 'हिङ्गुतुम्बुरुशुण्ठीभिस्तैलं तु सार्षपं पचेत्। एतद्धि पूरणं श्रेष्ठं कर्णशूलनिवारणम्।' इति।

कर्णशूलनाशक।

कर्णशूलप्रशमनम् (सु. सू. ४५.११२)

कर्णशूलं प्रशमयतीति।

कर्णशूलशामक।

Pacifying earache.

कर्णशूलनुत् (च. चि. २६.२२५)

कर्णशूलहरम्।

कर्णशूलनाशक।

कर्णिकापातनम् (च. चि. २३.२०३)

कीटलूतादंशयोर्या कर्णिका तस्याः पातनम् (निर्हरणम्)। (चक्र.)

दंशकर्णिका को बाहर निकालने वाला।

Expelling the stings.

कर्शनः (च. सू. २६.४३(४))

कृशं करोतीति। कटुरसस्य कर्म।

कृश करने वाला।

Emaciating.

कर्शनीयम् (च. सू. २५.४०)

कर्शने योग्यमिति। उक्तं चरके—'गवेधुकान्नं कर्शनीयानाम्' इति, 'गवेधुकानां भृष्टानां कर्शनीया समाक्षिका (यवागूः)' इति च।

कर्शन में प्रयोज्य।

Useful for emaciating.

कषायः (च. सू. १.६५)

१. 'कष हिंसायाम्'— कषति हिनस्ति कण्ठं धातूंश्चेति कषायः रसविशेषः। क्षितिवाय्वात्मकः।

कषाय रस। Astringent taste.

२. भेषजकल्पनाविशेषः— द्रव्याणां सत्त्वात्मकं रूपान्तरणम्।

कषायकल्पना। A pharmaceutical processing.

कष्टविभ्रमा (च. क.१०.३)

दुःखसाध्यविभ्रमजनिका। (चक्रः)

कठिन उपद्रव से युक्त

Having difficult complications.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

काचयापनम् (अ. हृ. उ. १३.८२)

काचं 'मोतियाबिन्द' इत्याख्यं नेत्ररोगं यापयति निरुपद्रवं गमयतीति, यथोक्तं– 'गुडः फेनोऽञ्जनं कृष्णा मरिचं कुङ्कुमाद् रजः। रसक्रियेयं सक्षौद्रा काचयापनमञ्जनम् ॥' इति।

काचरोग का यापन

Maintaining the case of cataract.

काठिन्यकरम् (च. चि. २५.४२)

मृदौ (व्रणे) काठिन्यं करोतीति।

कठिनता उत्पन्न करने वाला।

Producing hardness.

कामलानाशनः (च. चि. १४.१४३)

कामलां नाशयतीति, यथा–'सिद्धोऽयमभयारिष्टः कामलाश्वित्रनाशनः' इति।

कामलानाशक।

Alleviating jaundice.

कामलापहः (च. चि. १६.९९)

कामलामपहन्तीति, कामलाहर इत्यर्थः।

कामलानाशन।

कामलाहरम् (च. चि. १६.५३)

कामलां हरतीति, यथा– 'हरिद्रात्रिफला-निम्बबलामधुकसाधितम्। सक्षीरं माहिषं सर्पिः कामलाहरमुत्तमम् ॥' इति।

कामलानाशन।

कायविरेचनम् (च. चि. २६.२०४)

विरेचनम्, यथा 'मुखपाके सिराकर्म शिरःकाय-विरेचनम्' इति।

विरेचन। Purgative.

कायविशोधनम् (च. चि. १२.१००)

कायस्य विशोधनं विरेचनमिति यावत्।

विरेचन।

कायशिथिलीकरणः (च. सू. २६.४३(२))

कायं शरीरं शिथिलं करोतीति।

अम्लरसस्य कर्म।

शरीरशैथिल्यजनक।

Causing slackness in body.

कायाग्निवर्धनम् (च. सू. १६.१७)

कायाग्निः जठराग्निः, तं वर्धयतीति। संशोधनफलम्।

जठराग्निदीपन।

Stimulating digestive fire.

कार्श्यम् (च. सू. २१.३६)

कृशत्वम् (भारायामयोरल्पत्वम्)।

कृशता। Emaciation.

कार्श्यकृत् (सु. चि. १२.१८)

कृशीकरणः।

कृशताजनक।

Causing emaciation.

कासनिबर्हिणी (च. चि. १८.३१)

कासहरी।

कासनाशक। Anti-tussive.

कासविनाशनः (च. नि. १८.७५)

कासं विशेषण नाशयतीति।

कासनाशक।

कासश्वासनिबर्हणम् (च. चि. ८.९२)

कासं श्वासञ्च हरतीति, यथा– 'शिरःपार्श्वासशूलघ्नं कासश्वासनिर्बहणम्। प्रयुञ्ज्यमानं बहुशो घृतं चौत्तरभक्तिकम् ॥' इति।

कास और श्वास को दूर करने वाला।

Alleviating cough and dyspnoea.

कासश्वासापहः (च. चि. ८.१०२)

कासश्वासौ अपहन्तीति।

कास और श्वास का नाशक।

कासहन्ता (सु. सू. ४६.३७)

कासघ्नः।

कासनाशक। Anti-tussive.

कासहरः (च. सू. ४.८)

कासं हरतीति। यथोक्तं चरके– 'द्राक्षाभयामलक-पिप्पलीदुरालभाशृङ्गीकण्टकारिकावृश्चीरपुनर्नवा-तामलक्य इति दशेमानि कासहराणि भवन्ति' इति।

कासनाशक। Anti-tussive.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कासहा (अ. हृ. सू. ४.१५)

कासहरः ।

कासहर ।

कासापहः (च. चि. ८.९५)

कासमपहन्तीति, कासहर इत्यर्थः ।

कासहर ।

किलासघ्नः (च. सू. २७.१०६)

किलासं श्वित्रं हन्तीति । लशुनकर्म ।

श्वित्रनाशक ।

Alleviating vitiligo.

किलासहन्ता (च. चि. ७.१७१)

श्वित्रहरः ।

श्वित्रनाशन ।

कीटनुत् (च. चि. २३.१००)

कीटनाशनः ।

कीटनाशक । Insecticide.

कीटविषापहः (च. चि. २३.१९९)

कीटविषमपहन्तीति ।

कीटविष का नाशक ।

Counteracting insect-poisoning.

कीटव्रणापहाः (च. चि. २३.२०४)

कीटदंशजव्रणमपहन्तीति ।

कीटज व्रण का नाशक ।

Alleviating wound caused by insect-sting.

कुक्षितोदप्रमर्दनी (सु. सू. ४५.१७७)

कुक्षौ उदरे तोदः पीडा, तं प्रमर्दयति प्रशमयतीति ।

उदरशूलशामक ।

Anti-colic.

कुष्ठघ्नः (च. सू. ४.८)

कुष्ठं हन्तीति । यथोक्तं चरके– 'खदिराभयामलक-हरिद्रारुष्करसप्तपर्णारग्वधकरवीरविडङ्गजाती-प्रवाला इति दशेमानि कुष्ठघ्नानि भवन्ति' इति, 'यथा कुष्ठानि सर्वाणि हतः खदिरबीजकौ' (सु. चि. ६.१९) इति च ।

कुष्ठनाशक । Anti-leprotic.

कुष्ठनाशिनी (च. सू. २७.९०)

कुष्ठं नाशयतीति, यथोक्तं– 'त्रिदोषशमनी वृष्या काकमाची रसायनी । नात्युष्णशीतवीर्या च भेदिनी कुष्ठनाशिनी ॥' इति

कुष्ठघ्न ।

कुष्ठनिबर्हणम् (च. चि. ७.६६)

कुष्ठनाशनम् ।

कुष्ठघ्न ।

कुष्ठनुत् (च. सू. १.१०१)

कुष्ठघ्नम्, यथा–'गव्यं (मूत्रं) समधुरं किञ्चिद् दोषघ्नं क्रिमिकुष्ठनुत्' इति ।

कुष्ठघ्न ।

कुष्ठप्रगालनः (च. सू. २६.४३(३))

कुष्ठानि प्रगालयति, प्रकर्षेण भक्षणपूर्वकं स्रावयतीति 'गल अदने' 'गल स्रवणे' च धातोः' ।

लवणरसस्य कर्म ।

कुष्ठ को गलाना ।

Causing necrosis in leprotic part.

कुष्ठप्रबाधनम् (च. चि. ७.६१)

कुष्ठं प्रबाधते प्रकर्षेण तद्गतिमवरुणद्धीति, यथा–'दार्वी रसाञ्जनं वा गोमूत्रेण प्रबाधते कुष्ठम्' इति ।

कुष्ठ को रोकना ।

Checking advance of leprosy.

कुष्ठरोगकरः (सु. सू. ४६.११६)

कुष्ठरोगं करोति जनयतीति ।

कुष्ठजनक ।

Causing leprosy.

कुष्ठरोगविनिहन्ता (च. चि. ७.८१)

कुष्ठरोगस्य विशेषेण नाशकः ।

कुष्ठरोगनाशक ।

कुष्ठविकारनुत् (च. चि. ७.१५६)

कुष्ठरोगहरः ।

कुष्ठघ्न ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कुष्ठशमनम् (च. चि. ७.६०)

कुष्ठं शमयतीति, नापहन्ति, परं कष्टदलक्षणानि निवारयतीत्यर्थः ।

कुष्ठशामक ।

Pacifying (aggravated) leprosy.

कुष्ठसूदनः (च. चि. ७.९३)

कुष्ठघ्नः ।

कुष्ठनाशक ।

कुष्ठहा (च. चि. ७.१५९)

कुष्ठघ्नः, यथोक्तं—'कृमिनाशनं विडङ्गं विशिष्यते कुष्ठहा खदिरः' इति ।

कुष्ठघ्न

कुष्ठापहः (सु. चि. १३.३४)

कुष्ठमपहन्तीति, कुष्ठघ्नः ।

कुष्ठघ्न ।

कुष्ठोद्दालनम् (च. चि. ७.६१)

कुष्ठस्योद्दालनं प्रशमनमिति चक्रः ।

कुष्ठनाशक ।

Eradicating leprosy.

कृच्छ्ररुजापहम् (सु. उ. ५९.२५)

मूत्रकच्छ्रजनितां रुजां पीडामपहन्तीति ।

मूत्रकृच्छ्र की पीडा का शामक ।

Alleviating pain of dysuria.

कृमिघ्नः (च. सू. ४.८)

कृमीन् हन्तीति, यथा—'अक्षीवमरिचगण्डीर - केवुकविडङ्गनिर्गुण्डीकिणिहीश्वदंष्ट्रावृषपर्णिकाखु-पर्णिका इति दशेमानि कृमिघ्नानि भवन्ति' इति ।

क्रिमिनाशक । Anthelmintic.

कृमिघ्नी (च. सू. २.२३)

कृमिनाशिनी, यथा— 'विडङ्गपिप्पलीमूलशिग्रुभि-र्मरिचेन च । तक्रसिद्धा यवागूः स्यात् कृमिघ्नी ससुवर्चिका ।' इति ॥

कृमिनाशन ।

कृमिनाशनम् (च. चि. ७.१५९)

कृमीन् नाशयतीति, यथोक्तं— कृमिनाशनं विडङ्गं विशिष्यते कुष्ठहा खदिरः' इति ।

कृमिघ्न ।

कृमिनुत् (च. सू. १.१०१)

कृमिहरः, यथा—'गव्यं (मूत्रं) समधुरं किञ्चिद् दोषघ्नं कृमिकुष्ठनुत्' इति ।

कृमिनाशन ।

कृमिसूदनः (सु. सू. ३८.१९)

कृमिघ्न इत्यर्थः (ड०), यथा—'सुरसादिर्गणो ह्येष कफकृत् कृमिसूदनः इति ।

कृमिघ्न ।

कृष्णकर्म (सु. चि. १.९०)

कृष्णीकरणम् ।

काला करना । Balckening measure.

कृष्णीकरणः (च. चि. २५.११५)

(शुक्लान् व्रणान्) कृष्णीकरोतीति ।

काला करने वाला ।

Blackening agent.

केशघ्नम् (च. सू. २७.१६०)

केशान् हन्ति पातयतीति, यथोक्तं, 'गुरूष्णं मधुरं रूक्षं केशघ्नं च शमीफलम्' इति ।

केशनाशन । Depilatory.

केशकृष्णताकरः (सु. चि. २४.२५)

केशानां कृष्णतां करोतीति । शिरोऽभ्यङ्गगुणः ।

बालों को काला करने वाला ।

Blackening hairs.

केशदैर्घ्यकरः (सु. चि. २४.२५)

केशानां दैर्घ्यं करोतीति ।शिरोऽभ्यङ्गगुणः ।

बालों को लंबा करने वाला ।

Lengthening hairs.

केशबहुत्वकरः (सु. चि. २४.२५)

केशानां बहुत्वं करोतीति । शिरोऽभ्यङ्गगुणः ।

बालों को बढ़ाने वाला ।

Making hair profuse.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

केशबृंहणम् (च. चि. २६.२८०)

केशान् वर्धयतीति, यथोक्तं—'तिलाः सामलकाश्चैव किञ्जल्को मधुकं मधु। बृंहयेद् रञ्जयेच्चैतत् केशान् मूर्धप्रलेपनात्॥' इति। बृंहणे बहुत्वदैर्घ्ययोरुभयोः समावेशः।

केशवर्धक।

Promoting growth of hairs.

केशमार्दवकरः (सु. चि. २४.२५)

केशानां (पारुष्यमपाकृत्य) मदिवं करोतीति। शिरोऽभ्यङ्गगुणः।

केशों को मुलायम करने वाला।

Smoothening hairs.

केशरञ्जनम् (च. चि. २६.२८०)

केशान् रञ्जयति पलितमपाकृत्य प्राकृतकाष्ण्यमुत्पादयतीति।

बालों को काला करने वाला।

Dyeing (blackening) hairs.

केशस्निग्धताकरः (सु. चि. २४.२५)

केशानां स्निग्धतां करोतीति।शिरोऽभ्यङ्गगुणः।

बालों को चिकना करने वाला।

Making hairs unctuous.

केशोपघातकरः (च. वि. १.१७)

केशानुपहन्ति पातयतीति। क्षारातिप्रयोगस्य दोषः।

केशनाशक।

Causing falling of hairs.

केश्यः (च. सू. २६.४३(१))

केशेभ्यो हितः, वर्धनरञ्जनादिना तानुपकरोतीति। मधुररसस्य कर्म। मधुकं केश्यद्रव्येष्वग्र्यं प्रोक्तम्। (च. सू. २५.४०)

बालों के लिए हितकर।

Benefecial for hairs.

कोठविनाशनम् (च. सू. २७.२९०)

कोठं विनाशयतीति, यथा—'कटूष्णं सार्षपं तैलं रक्तपित्तप्रदूषणम्। कफशुक्रानिलहरं कण्डूकोठविनाशनम्॥' इति। कोठलक्षणं तु—'असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः। मण्डलानि सकण्डूनि रागवन्ति बहूनि च। उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते॥' इति।

Alleviating urticaria.

कोठापहम् (सु. चि. २४.५४)

कोठमपहन्तीति, यथा—'उद्धर्षणं तु विज्ञेयं कण्डूकोठानिलापहम्' इति।

कोठनाशक।

कोपनम् (अ. हृ. सू. १.१६)

यद् वातादीन् दोषान् रसादीन् धातून् मूत्रादीन् मलांश्च कोपयति (वर्धयति दूषयति च) तत् कोपनम्। (अ. द.)

कुपित करने वाला।

Agrravating factor.

कोष्ठवातप्रकोपिनी (च. सू. २७.३२)

कोष्ठे वातं वर्धयतीति, यथा—' शिम्बी रूक्षा कषाया च कोष्ठे वातप्रकोपिणी' इति।

कोष्ठवात (गैस) को बढ़ाने वाली।

wind-forming.

कोष्ठवातहरः (च. चि. १५.१०७)

कोष्ठगतवातं हरतीति।

कोष्ठवातशामक (गैस को रोकने वाला)।

Checking wind-formation.

कोष्ठविदाही (सु. सू. ४८.१०(२))

कोष्ठे विदाहं जनयतीति।अम्लरसस्य कर्म।

आमाशय आदि में जलन उत्पन्न करने वाला।

Causing burning in ahdomen.

कोष्ठविशुद्धिः (च. चि. १८.१६७)

कोष्ठस्योदरस्य विशुद्धिः मलशोधनं, विरेचनमित्यर्थः। उदरशोधन (विरेचन)।

Evacuation (Purgative).

कोष्ठविशोधनः (सु. उ. ४२.१४१)

विरेचनः।

विरेचन।

कोष्णः (सु. सू. ३७.८)

ईषदुष्णः।

अल्प उष्ण। Warm.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

क्रियासमर्थतमम् (च. क. १.७)
क्रियायामधिकतमं समर्थः ।
क्रिया में अधिकतम समर्थ ।
Most effective.

क्रियासामर्थ्यम् (च. क. १२.४५)
क्रियायां कर्मणि सामर्थ्यम् ।
कर्मसामर्थ्य ।
Effectivity.

क्लमहरम् (सु. सू. ४५.८१)
क्लमो ग्लानिः, तं हरतीति ।
ग्लानि को दूर करने वाला ।
Removing malaise.

क्लमापहरम् (च. चि. १.२.३)
क्लमपहरतीति ।क्लमो ग्लानिः ।
ग्लानिनाशक ।

क्लिन्नम् (च. सू. २७.३१७)
आर्द्रीभूतम्, 'क्लिदू आर्द्रीभावे' इति धातोः ।
आर्द्र । Moist.

क्लीबता (च. सू. २१.३६)
क्लैब्यं, पुंस्त्वोपघातः ।
नपुंसकता । Impotence.

क्लेदनः (च. सू. २६.४३(३))
आर्द्रीकरणः । लवणरसस्य कर्म ।
आर्द्र करने वाला ।
Moistening

क्लेदहरम् (च. चि. ३०.१०४)
क्लेदमार्द्रतां हरतीति ।
आर्द्रतानाशक ।
Removing moisture.

क्लेदाचूषणः (सु. सू. ४६. ५१७)
आर्द्रीभावविनाशकरः । (ड०)
आर्द्रताशोषक ।
Absorbing moisture.

क्लेदापहः (च. सू. २६.४३(४))
क्लेदमार्द्रतामपहन्तीति । कटुरसस्य कर्म ।
आर्द्रतानाशक ।

क्लेदी (च. सू. २७.३०६)
क्लेदयितुमार्द्रीकर्तुं शीलं यस्येति । क्षारस्य कर्म ।
आर्द्रताजनक ।
Moistening.

क्षणनम् (सु. सू. ११.४)
क्षणनात् त्वङ्मांसादिहिंसनात् (ड०) । क्षारकर्म ।
क्षत करने वाला ।
Injuring.

क्षतादिपाचनः (च. सू. २६.४३(२))
क्षतादीनि पाचयति तत्र पाकं करोतीति । अत्युपयुज्यमानस्याम्लरस्य दोषः ।
क्षत आदि को पकाने वाला ।
Suppurating wounds etc.

क्षतोष्मनिगूहः (सु. चि. १.१३०)
क्षतोष्मणो निग्रहः संरक्षणम्, यथोक्तं—'क्षतोष्मणो निग्रहार्थं सन्धानार्थं तथैव च । सद्योव्रणेष्वायतेषु क्षौद्रसर्पिर्विधीयते ॥' इति ।
क्षत की ऊष्मा का संरक्षण ।
Preservation of wound-heat.

क्षपणम् (च. चि. ३.२८६)
क्षयापादनम्, यथा 'वर्धनैनैकदोषस्य क्षपणेनोच्छ्रितस्य वा, इति ।
घटाना । Decreasing.

क्षयनाशनः (सु. सू. ४६.६६)
क्षयं नाशयतीति ।
क्षयनाशक ।
Alleviating cousumption.

क्षरणम् (सु. सू. ११.४)
दुष्टत्वङ्मांसादिचालनात् शातनादित्यर्थः, अन्ये तु क्षरणाद् दोषाणां चालनात् (ड०) । क्षारकर्म ।
धातुओं का नाश या दोषप्रकोप ।
Neccrosis of tissues or aggravation of doṣas.

क्षीणक्षतसन्धानकरः (च. सू. २६.४३(१))
क्षीणस्य सन्धानकरो धातुपोषकत्वेन, किं वा क्षीणश्वासौ क्षतश्चेति, तेन क्षीणक्षतस्योरःक्षतं संदधाति (चक्रः) । सन्धानं घातविशेषाद्

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

द्विधाभूतस्यावयवस्यैकीभावः। (ड० सु. चि. १.१३०)

क्षीण और क्षत का सन्धानकर।

Healing, unifying.

क्षीरजननानि (च. शा. ८.५७)

स्तन्यजननानि।

स्तन्यजनन। Galactogogue.

क्षीरविशोधनानि (च. शा. ८.५६)

स्तन्यशोधनानि।

स्तन्यशोधन।

Galacto-depurant.

क्षीरदौर्गन्ध्यनाशिनी (च. चि. ३०.२७३)

स्तन्यस्य दौर्गन्ध्यं नाशयतीति, यथा—'विषाणिकाजशृङ्ग्यौ च त्रिफलां रजनीं वचाम्। पिबेच्छीताम्बुना पिष्ट्वा क्षीरदौर्गन्ध्यनाशिनीम्।' इति।

स्तन्य की दुर्गन्ध को नष्ट करने वाली।

Removing foul smell of breast-milk.

क्षीरवैवर्ण्यनाशनम् (च. चि. ३०.२७१)

स्तन्यस्य वैवर्ण्यदोषं नाशयतीति, यथा—'यष्टीमधुकमृद्वीकापयस्यासिन्धुवारिकाः। शीताम्बुना पिबेत् कल्कं क्षीरवैवर्ण्यनाशनम्॥' इति।

स्तन्य की विवर्णता को दूर करने वाला।

Removing discoloration of breast-milk.

क्षीरशोधनम् (च. चि. ३०.२६७)

स्तन्यशोधनम्।

स्तन्यशोधन।

क्षीरसंजननः (च. चि. २.३.६)

स्तन्यजननः (महाकषायः)।

स्तन्यजनन।

ख

खमार्दवकरम् (च. चि. १७.७२)

खानां स्रोतसां मार्दवं कुर्वन्तीति, यथोक्तं—'तैरस्य ग्रथितः श्लेष्मा स्रोतःस्वभिविलीयते। खानि मार्दवमायान्ति ततो वातानुलोमता॥' इति।

स्रोतों में मृदुता लाने वाला।

Smoothenig channels.

खरः (च. शा. ६.१०)

१. श्लक्ष्णविपरीतः गुणः। (द्र०कर्कशः)

रुखडा। Rough.

२. गर्दभः (च. सू. १.१०४)

गदहा। Ass.

खरत्वम् (च. सू. २२.१०)

खरस्य भावः खरत्वम्, खरत्वापादनं रूक्षणस्य कर्म, यथा— 'रौक्ष्यं खरत्वं वैशद्यं यत् कुर्यात् तद्धि रूक्षणम्' इति।

रुखड़ापन। Roughness.

खालित्यापहम् (च. चि. २६.२६४)

खालित्यमपहन्तीति, खालित्यं केशनाशः, तल्लक्षणं यथा—'रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम्। प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः॥ रुणद्धि रोमकूपांस्तु ततोऽन्येषामसंभवः। तदिन्द्रलुप्तं खालित्यं रुह्येति च विभाव्यते॥' इति।

खालित्यनाशक।

Alleviating baldness.

खालित्यापादनः (च. सू. २६.४३(३))

खालित्यमापादयतीति। अत्युपयुक्तलवणरसस्य कर्म।

खालित्यजनक।

Causing baldness.

ग

गण्डनुत् (च. चि. ७.१४३)

गण्डान् नुदति निराकरोतीति।

गण्डनाशक।

Alleviating enlarged glands.

गण्डविलापनः (अ. हृ. उ. ३०.१६)

गण्डान् विलापयति विलीनम् करोति नाशयतीत्यर्थः। यथोक्तं—'शमीमूलकशिग्रूणां बीजैः सयवसर्षपैः। लेपः पिष्टोऽम्लतक्रेण ग्रन्थिगण्ड-विलापनः॥' इति।

गण्डनाशक।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

गन्धः (च. सू. ८.११)

घ्राणेन्द्रियस्यार्थः, पृथिवीभूतस्य नैसर्गिको गुणः यथोक्तं—'महाभूतानि खं वायुरग्निरापः क्षितिस्तथा। शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः॥' इति (च. शा. १.२७), 'शब्दादयो यथासंख्यं खादीनां नैसर्गिकाः गुणाः ज्ञेयाः'। (चक्र.)

गन्ध। Smell.

गन्धाढ्यान् (च. चि. २.१.४५)

प्रभूतगन्धद्रव्ययुक्तान्।

सुगन्धित। Aromatic.

गरजित् (च. सू. २७.९१)

गरः कृत्रिमविषः, तं जयतीति, यथा—'कालशाकं तु कटुकं दीपनं गरशोफजित्।' इति।

गर (कृत्रिम विष) का नाशक।

Counteracting artificial poison.

गरहरः (उ. सू. ३८.६३)

गरनाशनः, यथा 'गणस्त्रप्वादिरित्येष गरक्रिमिहरः परः।' इति।

गरजित्, गरनाशक।

गरहारि (च. सू. २७.१४६)

गरं कृत्रिमं विषं हर्तुं शीलं यस्येति, यथा—'प्राचीनामलकं चैव दोषघ्नं गरहारि च' इति।

गरजित् (गरनाशक)।

गर्भकोष्ठशोधनम् (च. शा. ८.३१)

गर्भाशयशोधनम्, यथा—'व्यपगतगर्भशल्यां तु स्त्रियमामगर्भां सुरासीध्वरिष्टमधुमदिरासवानामन्यतममग्रे सामर्थ्यतः पाययेद् गर्भकोष्ठशुद्ध्यर्थमर्तिविस्मरणार्थं प्रहर्षणार्थञ्च' इति।

गर्भाशयशोधन।

Cleansing uterus.

गर्भदम् (च. चि. ३०.७०)

गर्भं ददाति योनिदोषमपाकृत्य गर्भं स्थापयतीति, यथोक्तं—'एवमेव क्षीरसर्पिर्जीवनीयोपसाधितम्। गर्भदं पित्तलानां च योनीनां स्याद् भिषग्जितम्॥' इति।

गर्भदायक।

Promoting conception.

गर्भधारणम् (च. सू. २५.४०)

गर्भं धारयति स्थापयतीति, यथा—'सौमनस्यं गर्भधारणानाम् (अग्र्यम्)' इति।

गर्भस्थापक।

Stabilising foetus.

गर्भपातनम् (सु. चि. १५.११)

१. गर्भस्य पातनम्, यथा—'अविषह्ये विकारे तु श्रेयो गर्भस्य पातनम्।' इति।

गर्भपातन। Abortion.

२. गर्भं पातयति स्वाशयाद् बहिः निष्कासयतीति (यो. र., पृ. ४१७)।

गर्भपात कराने वाला।

Abortifacient.

गर्भरोधकः (भा. प्र. चि. ७०.३३-३४)

'शुक्रशोणितजीवानां संयोगः कुक्षिसंस्थितः। गर्भः तद्बाधको योगो गर्भरोधक उच्यते'। इत्यस्मत्कृतलक्षणम्। भावमिश्रादिभिरनेके गर्भरोधका योगाः प्रोक्ताः।

गर्भनिरोधक, गर्भनिवारक।

Contreceptive.

गर्भस्थानमार्गस्नेहनम् (च. शा. ८.३२)

गर्भस्थानस्य गर्भाशयस्य तन्मार्गस्य च स्नेहनम्।

गर्भाशय तथा योनिमार्ग का स्नेहन

Lubricating uterus and vaginal passage.

गर्भशातनम् (सु. नि. ८.३)

भेषजेन गर्भपातनम्। (ड०)

गर्भपातन।

Abortion.

गर्भस्थापनानि (च. शा. ८.२०)

प्रजास्थापनमहाकषायोक्तानि द्रव्याणि।

प्रजास्थापन।

Foetus-stabilising.

गर्भाशयविशुद्धिः (सु. चि. ३७.११६)

गर्भाशयशोधनम्।

गर्भाशयशोधन।

Cleansing of uterus.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

गर्भाशयशोधनम् (सु. सू. ४५.११२)

गर्भाशयं शोधयतीति। तैलकर्म।

गर्भाशयशोधन।

गर्भोपघातकराः (च. शा. ८.२१)

गर्भोपघातं कुर्वन्तीति।

गर्भ को विकृत करने वाले।

Causing teratological disorders.

गलरोगनुत् (च. चि. २६.१९६)

गलरोगान् नाशयतीति।

गलरोगनाशक।

Alleviating throat disorders.

गलशोषनुत् (च. चि. २६.२१३)

गलस्य शोषं नुदति निवारयतीति।

गलशोष को दूर करना।

Eliminating dryness of throat.

गलामयघ्नी (अ. हृ. उ. २२.१०१)

गलस्यामयान् हन्तीति, यथा– 'द्विक्षारधूमकवरा-पञ्चपटुव्योषवेल्लगिरिताक्ष्यैः। गोमूत्रेण विपक्वा गलामयघ्नी रसक्रिया एषा॥' इति।

गलरोगनाशक।

गलामयविनाशनम् (सु. चि. २४.२३)

गलस्यामयान् रोगान् विनाशयतीति। ताम्बूलगुणः।

गलरोगनाशक।

गुदकण्डूनाशनम् (च. चि. १४.७५)

गुदकण्डूं नाशयतीति। तक्रारिष्टगुणः।

गुदकण्डूनाशक।

Alleviating anal itching (Pruritis ani).

गुदकीलहा (सु. सू. ४६.३०७)

गुदकीलमर्शः, तद्धन्तीति, यथा 'सूरणो गुदकीलहा' इति।

अर्शोघ्न।

गुदप्रगुणीकरणम् (च. चि. २६.१७)

गुदं प्रगुणं प्रकृष्टगुणं करोतीति। निरूहकर्म।

गुद को दृढ करने वाला।

Making rectum firm.

गुदभ्रंशापहम् (च. चि. १९.४३)

गुदभ्रंशमपहन्तीति, यथोक्तं– 'चाङ्गेरीकोलदध्यम्ल-नागरक्षारसंयुतम्। घृतमुत्क्वथितं पेयं गुदभ्रंशरुजापहम्॥' इति।

गुदभ्रंशनाशक।

Removing rectal prolapse.

गुदरुजापहम् (च. चि. १९.४३)

गुदे रुजा शूलं, तामपहन्तीति।

गुदशूलनाशक।

Alleviating pain in anus.

गुदश्वयथुनाशनम् (च. चि. १४.७५)

गुदशोथं नाशयतीति। तक्रारिष्टगुणः।

गुदशोथहर।

Alleviating swelling in anus.

गुदार्तिनाशनम् (च. चि. १४.७५)

गुदशूलहरम्।

गुदशूलहर।

गुरुः (च. शा. ६.१०)

१. लघुविपरीतः गुणः, बृंहणद्रव्यस्य मुख्यगुणः (च. सू. २२.१३), गुर्वादिगुणानामाद्यः (अ. हृ. सू. १.१८)।

भारी। Heavy.

२. अष्टविधे षड्विधे च वीर्ये गुरु वीर्यं गुरुत्वापादकम्, यथाह हेमाद्रिः–'यस्य बृंहणे कर्मणि शक्तिः स गुरुः' इति।

गुरुवीर्य।

३. गुरुपाकी– प्रकृतिगुरवो यथा माषाः, करणगुरवो यथा घृतपक्वान्नम्, मात्रागुरवो यथाऽतिमात्रं भक्षिता मुद्गाः।

पचने में भारी।

Heavy in digestion.

गुरुता (च. सू. ७.४३)

गुरोर्भावः गुरुता, गौरवमित्यर्थः, यथा–'मलवृद्धिं गुरुतया लाघवान् मलसंक्षयम्' इति।

भारीपन। Heaviness.

गुरुपाकम् (सु. सू. ४५.९९)

गुरुः पाको यस्य तत्, यथा माहिषं घृतम्। अत्र पाकशब्दः पाकं विपाकञ्चोभयं ग्राहयति।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पचने में भारी, विपाक में गुरु।
Heavy in digestion.

गुरुलाघवम् (च. सू. ५.६)
गौरवं लाघवञ्च।
गुरुता—लघुता
Heaviness-lightness.

गुर्वादयः (च. सू. १.४९)
गुणाः। 'गुर्वादयस्तु गुरुलघुशीतोष्णस्निग्धरूक्ष-मन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिलश्लक्ष्ण-खरस्थूलसूक्ष्मसान्द्रद्रवा विंशतिः।
गुर्वादि गुण।
Gurvadi guṇas.

गुल्मघ्नम् (च. चि. १००)
गुल्मं हन्तीति, यथोक्तं--'बस्तिकर्म परं विद्याद् गुल्मघ्नम्' इति।
गुल्मनाशक।
Destroying abdominal lump.

गुल्मनाशनः (च. सू. २७.१७६)
गुल्मं नाशयतीति। लशुनकर्म।
गुल्मनाशक।

गुल्मनिबर्हणः (च. चि. ५.६५)
गुल्मनाशनः।
गुल्मनाशक।

गुल्मनुत् (च. चि. १५.१३३)
गुल्महरम्।
गुल्मनाशक।

गुल्मप्रभेदनम् (च. चि. ५.१७८)
गुल्मं प्रकर्षेण भिनत्ति विदारयतीति, यथा—'अदृश्यमाने रुधिरे दद्याद् गुलमप्रभेदनम्' इति।
गुल्म को तोड़ने वाला।
Breaking the abdominal lump.

गुल्मभेदनः (च. चि. २१.१३१)
गुल्मं भिनत्ति विदारयतीति।
गुल्म को तोड़ने वाला।
Lump-breaking.

गुल्मशैथिल्यजननी (च. चि. ५.१७३)
गुल्मस्य काठिन्यमपहृत्य शैथिल्यं जनयतीति, यथोक्तं— 'पलाशक्षारपात्रे द्वे द्वे पात्रे तैलसर्पिषोः। गुल्मशैथिल्यजननीं पक्त्वा मात्रां प्रयोजयेत्॥' इति।
गुल्म को शिथिल करने वाली।
Making the lump slack.

गुल्मापहम् (च. चि. १३.८१)
गुल्ममपहन्तीति, यथा—'विडङ्गं चित्रकं शुण्ठीं सघृतां सैन्धवं वचाम्। दग्ध्वा कपाले पयसा गुल्मप्लीहापहं पिबेत्॥' इति।
गुल्मनाशक।

गृध्रसीरोगापहः (च. चि. २७.४७)
गृध्रसीरोगनाशनः, यथा— 'पलाभ्यां पिप्पलीमूल-नागरादष्टकट्वरः। तैलप्रस्थः समो दध्ना गृध्रस्यूरुग्रहापहः॥' इति।
गृध्रसीनाशक।
Alleviating sciatica.

गौरवम् (च. सू. ५.९३)
१. गुरुत्वानुभूतिः। कफविकारः।
भारीपन का अनुभव। Feeling of heaviness.
२. गुरुपाकित्वम्।
पचने में भारीपन। Heaviness in digestion.
३. बृहत्त्वम्। बृंहणकर्म।
Heaviness in body by increase of weight.

गौरवकराणि (च. सू. २६.११)
गौरवं कुर्वन्तीति। पार्थिवद्रव्यकर्म।
गौरवजनक।
Causing heaviness.

ग्रन्थिविलापनः (अ. हृ. उ. ३०.१६)
ग्रन्थिं विलापयतीति। (द्र. -गण्डविलापनः)
ग्रन्थि को विलीन करने वाला।
Removing cyst.

ग्रहरोगघ्नम् (च. चि. १०.२४)
ग्रहजनितान् रोगान् हन्तीति।
ग्रहरोगनाशक।
Alleviating disorders caused by grahas (seizures).

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ग्रहणीदीपनम् (अ. कृं. उ. २.३९०)

ग्रहणीं दीपयति तद्बलं वर्धयतीति, यथा– 'रजनीदारुसरलश्रेयसीबृहतीद्वयम्। पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा॥ ग्रहणीदीपनं श्रेष्ठम्' इति।

ग्रहणी को दीप्त करने वाला।

Stimulating (functions of) grahaṇī.

ग्रहणीदूषणम् (च. सू. २५.४०)

ग्रहणीमग्न्यधिष्ठानं दूषयतीति, यथा– 'अजीर्णाध्यशनं ग्रहणीदूषणानाम्' इति।

ग्रहणी को विकृत करने वाला।

Affecting grahaṇī.

ग्रहणीदोषनुत् (च. चि. १५.१३३)

ग्रहणीदोषहरम्।

ग्रहणीदोषनाशक।

Removing the disorders of grahaṇī.

ग्रहणीदोषप्रशमनम् (च. सू. २५.४०)

ग्रहण्याः दोषं विकारं प्रशमयतीति, यथा– 'तक्राभ्यासो ग्रहणीदोषशोफार्शोघृतव्यापत्-प्रशमनानाम्' इति।

ग्रहणीदोषशामक।

Pacifying the disorders of grahaṇī.

ग्रहणीनुत् (च. चि. १६.१०५)

ग्रहणीदोषहरः।

ग्रहणीविकारनाशक।

ग्रहणीबलवर्धनः (च. चि. १५.१८०)

ग्रहण्याः बलमग्निं वर्धयतीति।

ग्रहणी के बल को बढ़ाने वाला।

Potentiating the functions of grahaṇī.

ग्रहणीरोगघ्नम् (च .क. ७.७१)

ग्रहणीरोगं हन्तीति।

ग्रहणीविकारनाशक।

ग्रहनाशनम् (च. चि. ९.५९)

ग्रहान् मानसरोगजनकान् नाशयतीति, यथा– 'विशेषतः पुराणञ्च घृतं च पाययेद् भिषक्। त्रिदोषघ्नं पवित्रत्वाद् विशेषाद् ग्रहनाशनम्॥' इति।

ग्रहों का नाशक।

Destroyer of grahas (seizures)

ग्रहामयनाशनम् (च. चि. १०.२६)

ग्रहजन्यान् रोगान्नाशयतीति, यथा– 'घृतं सैन्धवहिङ्गुभ्यां वार्षे बास्ते चतुर्गुणे। मूत्रे सिद्धमपस्मारहृद् ग्रहामयनाशनम्॥' इति

ग्रहजन्य रोगों का नाशक।

Alleviating disorders caused by grahas.

ग्लपनम् (अ. हृ. सू. ६.३४)

ग्लानिकरम् (हे०), यथा– 'शाण्डाकीवटकं दृग्घ्नं दोषलं ग्लपनं गुरु' इति।

ग्लानिकर।

Causing malaise.

ग्लपनकरम् (सु. सू. ४१.४(४))

ग्लपनमवृष्यत्वम् (ड०) तत् करोतीति।

कटुरसकर्म।

वाजीकरण के विपरीत।

Non-aphrodisiac.

ग्लानिकरः (च. सू. २६.४३(४))

ग्लानिं करोतीति। कटुरसकर्म।

ग्लानिकर।

Causing malaise.

ग्लान्यभिनिर्वृत्तिकरम् (च. वि. १.१८)

ग्लानिकरम्। अत्युपयुज्यमानलवणकर्म।

ग्लानिकर।

घ

घनः (च. सू. १२.७)

१. शुषिरविपरीतो घनः। 'घनं निरन्तरं सान्द्रमित्यमरः।

घना, ठोस। Compact, solid.

२. मुस्तकः।

ओषधिविशेषः।

घृतव्यापत्प्रशमनम् (च. सू. २५.४०)

घृताभ्यासे जायमाना व्यापदः प्रकर्षेण शमयतीति, यथा 'तक्राभ्यासो ग्रहणीदोषशोफार्शोघृतव्यापत्-प्रशमनानाम्' इति।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

घृतसेवनजन्य उपद्रवों का शामक।

Pacifying adverse effects of ghee.

घृतव्यापत्तिनाशिनी (च. सू. २.३०)

घृतसेवनजन्यां व्यापत्तिं नाशयतीति, यथा—'तक्रसिद्धा यवागूः स्याद् घृतव्यापत्तिनाशिनी' इति।

घृतव्यापत्प्रशमन।

घ्राणास्रावणः (च. सू. २६.४३(४))

घ्राणमास्रावतीति। कटुरसकर्म।

नासास्राव को बढ़ाने वाला।

Increasing nasal secretion.

घ्राणादिप्रह्लादनः (च. सू. २६.४३(१))

घ्राणादीन् प्रकर्षेण ह्लादयतीति। मधुररसकर्म।

घ्राण आदि इन्द्रियों का आह्लादक।

Exhilarating to sense organs.

च

चक्षुःप्रसादनम् (सु. चि. २४.७०)

दृष्टिप्रसादनम्, दृष्टिसंयुक्तपादनिबन्धननाडीप्रसादनत्वात्, प्रभावादित्यपरे (ड०), यथा—'पादप्रक्षालनं पादमलरोगश्रमापहम्। चक्षुःप्रसादनं वृष्यं रक्षोघ्नं प्रीतिवर्धनम्॥' इति।

चक्षु का प्रसादजनक।

Pleasing to eyes.

चक्षुर्विरेचनः (च. सू. २६.४३(४))

चक्षुर्विरेचयति नेत्रस्रावं वर्धयतीति। कटुरसस्य कर्म।

अश्रुस्राव को बढ़ाने वाला।

Stimulating lachrymal secretion.

चक्षुष्यम् (च. सू. २५.४०)

चक्षुषे हितं चक्षुष्यम्। मधुकं चक्षुष्यद्रव्येषु श्रेष्ठम्। पादत्रधारणं चक्षुष्यमित्यत्र चक्रो वक्ति—'अत्र च वृष्यत्वचक्षुष्यत्वे प्रभावात्, यदि वा पादसंबद्धनेत्रपोषिकानाडीप्रत्यवायहरणाच्चक्षुष्यम्' इति।

नेत्र के लिए हितकर।

Benefecial for eyes.

चलः (च. सू. १.५९)

गतिशीलः, वायोः गुणः।

गतिशील।

Moving.

चातुर्थकविनाशनम् (च. चि. १०.२४)

चातुर्थकज्वरं विनाशयतीति।

महापञ्चगव्यघृतस्य कर्म।

चातुर्थकज्वर को नष्ट करने वाला।

Alleviating quartan fever.

चातुर्थिकनिवारणम् (भा. नि. ८.४७)

चातुर्थिकं ज्वरं निवारयति दूरीकरोतीति, यथोक्तं—'अगस्तिकुसुमं शीतं चातुर्थिकनिवारणम्' इति।

चातुर्थिकज्वर को दूर करने वाला।

Removing quartan fever.

चातुर्थिकहरः (भा. नि. ४.६०)

चातुर्थिकज्वरं हरतीति, यथोक्तं—'अगस्त्यः पित्तकफजिच्चातुर्थिकहरो हिमः' इति।

चातुर्थिकज्वरनाशक।

चेतना (च. शा. १.७२)

आत्मलिङ्गम्। 'चेतना गुणत्वेन अचेतनखादिभूतातिरिक्तधर्मेणात्मानं गमयति' (चक्र०)

चेतना। Consciousness.

चेतोविकारकरम् (च. चि. २४.२९)

चेतसि मनसि विकारं करोतीति, यथा—'मद्यं हृदयमाविश्य स्वगुणैरोजसो गुणान्। दशभिर्दश संक्षोभ्य चेतो नयति विक्रियाम्॥' इति।

मन में विकार उत्पन्न करने वाला।

Causing mental disorders.

चेतोविकारनुत् (सु. सू. ४५.२२५)

चेतोविकारा उन्मादादयः (ड०) तन्निवारयतीति।

मनोविकारनाशक।

Alleviating mental disorders, psychiatric measures.

चेतोविकारघ्नम् (सु. सू. ४५.२२७)

चेतोविकारा मानसरोगाः, तान् हन्तीति, यथा—'गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत्। दीपनं गार्दभं मूत्रं कृमिवातकफापहम्॥' इति।

मनोविकारनाशक।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

च्यावनः (च. सू. २६.४३(३)

च्यावयति धातुक्षयं करोतीति ।

लवणरसस्य कर्म ।

धातुक्षयकारक ।

Decreasing dhātus.

छ

छर्दनम् (च. चि. १७.१२१)

१. वमनम्, यथा– 'कासिने छर्दनं दद्यात् स्वरभङ्गे च बुद्धिमान् । वातश्लेष्महरैर्युक्तं तमके तु विरेचनम् ॥' इति 'शणपुष्पी च बिम्बी च छर्दने हैमवत्यपि' (च. सू. १.७९) इति च ।

वमन । Emesis.

२. वमनद्रव्यम्, यथा मदनमधुक.... छर्दनानि' इति (अ. हृ. सू. १५.१) ।

वामक द्रव्य । Emetic.

छर्दिघ्नी (च. चि. ३०.३२५)

छर्दिं हन्तीति ।

छर्दिनाशक ।

छर्दिनिग्रहणः (च. सू. ४.८)

छर्दिं निगृह्णाति रुणद्धीति, यथा–

'जम्ब्वाम्रपल्लवमातुलुङ्गाम्लबदरदाडिमयवषष्टिकोशीरमृल्लाजा इति दशेमानि छर्दिनिग्रहणानि भवन्ति' इति ।

छर्दिनाशक । Anti-emetic.

छर्द्यतियोगप्रशमनम् (च. सू. २५.४०)

अतिप्रसक्तछर्दिं प्रशमयतीति, यथा–

'मृद्भृष्टलोष्टनिर्वापितमुदकं तृष्णाच्छर्द्यतियोगप्रशमनानाम्' इति ।

अतिशय छर्दि का शामक ।

Checking frequent vomiting.

छेत्ता (च. सू. २७.३०६)

छिनत्ति विश्लेषयति श्लेष्मादिकानिति । क्षारस्य कर्म ।

काटने वाला ।

Cutting, separating.

छेदनम् (च. सू. २७.२४५)

१. छिनत्ति विश्लेषयति श्लेष्मादिकानिति, यथोक्तं शार्ङ्गधरेण– श्लिष्टान् कफादिकान् दोषानुन्मूलयति यद् बलात् । छेदनं तद् यवक्षारो मरिचानि शिलाजतु ॥' इति (शा. सं. १.४.९)

श्लेष्मा आदि को काट कर निकालना ।

Expectorant etc.

२. पृथक्करणात्मकं शस्त्रकर्म । (सु. सू. ८.४)

काटना । Excision.

छेदनीयः (च .सू. २६.८)

१. अपतर्पणकारकः । (चक्र०)

अपतर्पणकारकः Desaturating.

२. छेदनीयम् (मलच्छेदनात्) (सु. सू. १५.३२), स्रोतोविशोधनीयम् (ड०) 'हिङ्गुनिर्यासच्छेदनीयानाम्' (च. सू. २५.४०)

स्रोतःशोधन ।

Channel-cleansing.

ज

जठरघ्नानि (च. चि. .१३.११२)

उदररोगहराणि ।

उदररोगनाशक ।

Alleviating udararogas (abdominal enlargements).

जठराग्निवृद्धिः (च. चि. १९.१८)

जठराग्नेः वृद्धिः । हरीतक्याः कर्म ।

अग्निदीपन ।

Stimulation of digestive fire.

जठरापहम् (च. चि. १३.११४)

उदररोगहरम् ।

उदरोगनाशक ।

जडताकरम् (अ. हृ. सू. ५.२८)

अङ्गजाड्यकरणहेतुः (अ. द.) ।

वडवादीनां क्षीरस्य कर्म ।

अंगों में जडता उत्पन्न करने वाला ।

Causing stiffness in limbs.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

जरणः (सु. सू. ४५.१८५)

जरणोऽन्नादिपरिणामकारी (ड०) अम्लरसकर्म ।

पाचन । Digestant.

जरणीयः (च. सू. २७.१८३)

जरणे पाचने शस्त इति ।

पाचन ।

जराकृत् (सु. चि. २४.७९)

जरां वार्धक्यं करोति शीघ्रमानयतीति; यथा– 'अत्यध्वा विपरीतोऽस्माज्जरादौर्बल्यकृच्च सः' इति ।

शीघ्र वार्धक्य लाने वाला ।

Causing premature senility.

जराव्याधिप्रशमनम् (च. चि. १.३.६)

जरा च व्याधिश्च तयोः प्रशमनम्, अथवा जरा एव व्याधिस्तस्य प्रशमनम् । रसायनस्य विशेषणम् । उक्तञ्च शार्ङ्गधरेण–'रसायनं च तज्ज्ञेयं यज्जराव्याधिनाशनम्' इति ।

जरा और रोगों का नाशक ।

Alleviating senility and diseases.

जर्जरीकरणम् (च. सू. २७.४)

जर्जरीकरोतीति श्ल्यथमांसाद्युपचयं करोति, यदुक्तं हारीते– 'सुरा जर्जरीकरोत्यसृङ्मेदोबाहुल्यात्' इति, तथा ह्यत्रैवोक्तं –'सुरा कृशानां पुष्ट्यर्थम्' इति (चक्र.) । अस्मन्मते तु शरीरं विध्वस्तं करोतीति ।

शरीर को जर्जर करने वाला ।

Making the body shattered.

जाड्यकरः (च. सू. २६.७९)

जाड्यं निश्चेष्टतां करोतीति, कषायरसो यथा जिह्वां जडीकरोति, उक्तं हि–'वैशद्यस्तम्भजाड्यैर्यो रसनं योजयेद् रसः । बध्नातीव च यः कण्ठं कषायः स विकास्यपि ॥' इति ।

जाड्यकारक ।

Causing stiffness.

जिह्वाविशोधनम् (च. चि. ८.१४३)

जिह्वां विशोधयति तन्मलमपहरतीति ।

जिह्वाशोधक ।

Tongue-cleaning.

जिह्वेन्द्रियविशोधनम् (सु. चि. २४.२२)

जिह्वेन्द्रियं रसनां विशोधयतीति । ताम्बूलकर्म ।

जिह्वाशोधक ।

जीर्णज्वरहरः (च. चि. ३.२८१)

जीर्णज्वरं हरतीति ।

जीर्णज्वरनाशक ।

Alleviating chronic fever.

जीर्णज्वरापहम् (च.चि. ३.२२३)

जीर्णज्वरमपहन्तीति ।

जीर्णज्वरनाशक ।

जीवनः (च. सू. २६.४३(१)

अभिघातादिमूर्च्छितस्य जीवनः इति चक्रः; अस्मन्मते तु जीवनः प्राणशक्तिवर्धनः । डल्हणोऽपि प्राणधारण इति (सु. सू. ३८.३६) ।

प्राणशक्तिवर्धक ।

Vitaliser.

जीवनीयः (च. सू. ४.८)

प्राणशक्तिवर्धनीयः । (द्र. -जीवनः) । जीवने हितो जीवनीयः । जीवनीयशब्देनेहायुष्यत्वमभिप्रेतम् । उक्तं हि चरके– 'जीवकर्षभकौ मेदा महामेदा काकोली क्षीरकाकोली मुद्गपणीमाषपर्ण्यौ जीवन्ती मधुकमिति दशेमानि जीवनीयानि भवन्ति इति । क्षीरञ्च जीवनीयमुक्तम् (च. सू. १.१०८) ।

प्राणशक्तिवर्धक ।

Vitaliser.

ज्वरकासघ्नम् (च. चि. ८.११५)

ज्वरं कासञ्च हन्तीति ।

ज्वर और कास का नाशक ।

Alleviating fever and cough.

ज्वरघ्नः (च. सू. २६.४६(५)

ज्वरं हन्तीति । तिक्तरसो ज्वरघ्नः प्रोक्तः ।

ज्वरनाशक ।

Antipyretic.

ज्वरनाशनम् (च. चि. ३.२३७)

ज्वरं नाशयतीति ।

ज्वरघ्न ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ज्वरनुत् (च. चि. २८.१२२)

ज्वरापहः ।

ज्वरप्रशमनम् (च. चि. ३.२४९)

ज्वरं प्रशमयतीति ।

ज्वरशामक ।

Pacifying fever.

ज्वरवर्धनाः (अ. हृ. चि. १.९७)

ज्वरं वर्धयन्तीति ।

ज्वर को बढ़ाने वाले ।

Aggravating fever.

ज्वरहरः (च. सू. ४.८)

ज्वरं हरतीति, उक्तं यथा— 'सारिवाशर्करापाठा-मञ्जिष्ठाद्राक्षापीलुपरुषकाभयामलकबिभीतकानीति दशेमानि ज्वरहराणि भवन्ति । इति ।

ज्वरघ्नः ।

ज्वरापहः (च. चि. ९.७२)

ज्वरमपहन्तीति, यथोक्तं— 'रक्तशाल्यादयः शस्ताः पुराणाः षष्टिकैः सह । यवाग्वोदनलाजार्थे ज्वरितानां ज्वरापहाः ॥' इति (च. चि. ३.१७८)

ज्वरघ्न ।

त

तत्र योग्यत्वम् (च. सू. ९.७)

तत्र प्रतिकर्त्तव्ये व्याधौ योग्यत्वम् (चक्रः), कार्मुकत्वमित्यर्थः ।

योग्यता ।

Effectivity.

तनु (च. सू. २२.३२)

१. अबहलम् (चक्रः), असान्द्रमिति ।

पतला । Thin.

२. कृशम् ।

पतला । Lean.

तनुताम् (च. पू. ५.५३)

१. अबहलत्वम् ।

पतलापन । Thinness.

२. अल्पत्वम्, कार्श्यमिति ।

कृशता । Leanness.

तन्द्राकरः (च. सू. २५.४०)

तन्द्रां करोतीति, यथोक्तं 'अतिस्वप्नस्तन्द्राकराणाम्' इति ।

तन्द्राजनक ।

Causing drowsiness.

तन्द्रापहरम् (च. चि. १.२.३)

तन्द्रामपहरतीति । रसायनगुणः ।

तन्द्रानाशक ।

Removing drowsiness.

तन्द्रोपशमनम् (सु. चि. २४.५८)

तन्द्रामुपशमयतीति ।

तन्द्राशामक ।

Pacifying drowsiness.

तमकशमनाः (च. चि. ४.७४)

१. तमकः दौर्बल्यात्तमः प्रवेश इव, तं शमयन्तीति ।

तमक (अंधेरा छा जाना) का शामक ।

Pacifying feeling of darkness

२. तमकः तमकश्वासः, तं शमयन्तीति ।

तमकश्वास का शामक ।

Relieving bronchial asthma.

तरुणप्रायम् (च. नि. ४.५)

प्रायेणाभिनवम् ।

प्रायः ताजा ।

Almost fresh.

तरुण्यः (सु. सू. ६.११)

अभिनवाः । (ड०)

नई । Young.

तर्पणः (च. सू. २६.४३ (१))

तर्पयतीति तर्पणः यथा मधुरो रसः ।

तृप्त करने वाला ।

Satiating.

तर्पणम् (च. सू. ७.२१)

तर्पयतीति तर्पणम् (चक्रः), पारिभाषिकं तर्पणं यथा पारिभाषाप्रदीपे — 'द्रवेणातो भृतास्ते स्युस्तर्पणं लाजसक्तवः' इति ।

तर्पण ।

A specific dietary preparation.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तर्पणीयः (च. सू. २५.४०)

तर्पणे हितस्तर्पणीयः, यथा- 'रसस्तर्पणीयानाम् (अग्र्यः)' इति ।

तर्पण के लिए हितकर ।

Useful for satiation.

तर्षणः (च. सू. २६.४३ (३))

तर्षयति तृषां जनयतीति । अत्युपयुज्यमानाम्ल-लवणरसयोः कर्म ।

तृष्णाजनक ।

Causing thirst.

तापनः (च. सू. २६.४३ (३)

तापयतीति । अत्युपयुज्यमानलवणरसस्य कर्म ।

तापजनक ।

Producing heat.

तापनकरम् (उ. सू. ४१.४ (३)

तापनं शरीरादिसंतापनम् । (ड०), तत्करम् । लवणरसकर्म ।

तापजनक ।

तामकः (च. सू. २६.४३ (४)

तमयतीति, तमः प्रवेशं जनयतीति । कटुरसकर्म ।

तमः प्रवेशकारक ।

Causing feeling of darkness.

तालुशोषघ्नाः (च. चि. २२.३४)

तालुशोषं घ्नन्तीति ।

तालुशोष के नाशक ।

Removing dryness of palate.

तिक्तः (च. सू. १.६५)

१. तेजयति वर्धयति रुचिं वह्निञ्चेति तिक्तः — 'तिज निशाने' । वाय्वाकाशीयो रसविशेषः ।

तीता (रसविशेष) ।

Bitter.

२. तिक्तरसवान् पादपः निम्बः ।

तीता पेड़ — नीम ।

Bitter plant (Nimba).

तिमिरघ्नम् (च. चि. २६.२५८)

तिमिरं दृष्टिमान्द्यं हन्तीति, यथा 'एतन्नेत्राञ्जनं कार्यं तिमिरघ्नमनुत्तमम्' इति ।

तिमिररोगनाशक ।

Alleviating defects of vision.

तीक्ष्णः (च. शा. ६.१०)

१. मन्दविपरीतो गुणः यथा राजिकादौ । 'तीक्ष्णं मुखे दुःखोत्पादकमिति डल्हणः (सु. सू. ४५.१८८) ।

तेज, तीखा ।

Irritant, sharp.

२. कुशः (रा. नि. ८.२०७)

तीक्ष्णविरेचनम् (च. सू. २५.४०)

तीक्ष्णं विरेचयतीति, यथा — 'स्नुक्पयस्तीक्ष्ण-विरेचनानाम् (अग्र्यम्)' इति ।

तीव्र विरेचन ।

Drastic purgative.

तीव्ररूक्षाः (च. सू. ६.६)

तीव्राश्च रूक्षाश्च तीव्ररूक्षाः, यदि वा तीव्रं रौक्ष्यं येषां ते तीव्ररूक्षाः । (चक्रः)

तेज और रूखी ।

Fast and rough.

तुल्यगुणः (च. सू. १०-११)

समानगुणः । यथोक्तं - 'न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेत्' इत्यादि ।

समान गुण वाला ।

Having similar property.

तुवरः (सु. सू. ४३. १८७)

१. कषायः । (ड०)

कषाय । Astingent.

२. तुवरकः (सु. चि. ८.५८)

वृक्षविशेष । A Tree.

तुष्टिदम् (सु. चि. २४.५८)

तुष्टिं ददातीति ।

तुष्टिदायक ।

Providing contentment, satisfying.

तुष्टिप्रदम् (च. सू. २७.१९४)

तुष्टिं प्रकर्षेण ददातीति, यथा — 'हर्षणं प्रीणनं मद्यं भयशोकश्रमापहम् । प्रागल्भ्यवीर्यप्रांतेभातुष्टि-पुष्टिबलप्रदम् ॥' इति मद्यगुणे ।

तुष्टिदायक ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तृप्तिकरः (सु. सू. ४६.३९८)

तृप्तिं करोतीति, यथा — 'वातापहस्तृप्तिकरो बल्यो विष्यन्द उच्यते' इति विष्यन्दगुणे। (द्र. -विष्यन्दः)

तृप्ति करने वाला।

Satiating .

तृप्तिघ्नः (च. सू. ४.८)

तृप्तिः श्लेष्मविकारो येन तृप्तमिवात्मानं मन्यते, तद्घ्नं तृप्तिघ्नम् (चक्रः), यथोक्तं — 'नागरचव्य-चित्रकविडङ्गमूर्वागुडूचीवचामुस्तपिप्पलीपटोला-नीति दशेमानि तृप्तिघ्नानि भवन्ति' इति तृप्तिघ्नो महाकषायः।

तृप्ति को नष्ट करने वाला।

Alleviating feeling of satiety.

तृषापहम् (सु. चि. २४.५७)

तृषामपहन्तीति।

तृष्णानाशक।

Allaying thirst.

तृष्णाजननः (च. सू. २६.४३(४)

तृष्णां जनयतीति। कटुरसस्यात्युपयुज्यमानस्य कर्म।

तृष्णाजनक।

Causing thirst.

तृष्णाकृत् (सु. चि. २४.८६)

तृष्णां करोतीति।

तृष्णाजनक।

तृष्णाघ्नाः (च. चि. २२.३५)

तृष्णां विकारभूतां घ्नन्तीति, यथा— 'जम्ब्वाम्रातक-बदरीवेतसपञ्चवल्कपञ्चाम्लैः। हृन्मुखशिरःप्रदेहाः सघृता मूर्च्छाभ्रमतृष्णाघ्नाः स्युः॥' इति।

तृष्णानाशक।

तृष्णाघ्नम् (च. चि. २०.३२)

तृष्णां हन्तीति, यथा— 'सेव्यं पिबेत् काञ्चनगैरिकं वा सबालकं तण्डुलधावनेन। धात्रीरसेनोत्तमचन्दनं वा तृष्णावमिघ्नानि समाक्षिकाणि॥' इति। क्षीरगुणेऽपि (च. सू. १.१०९)

तृष्णानाशक।

तृष्णातियोगप्रशमनम् (च. सू. २५.४०)

तृष्णाया अतियोगं प्रशमयतीति, यथा— 'मृद्भृष्टलीष्टनिर्वापितमुदकं तृष्णाच्छर्द्यतियोग-प्रशमनानाम्' (अग्र्यम्), इति।

अतितृष्णाशामक।

Pacifying excessive thirst.

तृष्णानिग्रहणः (च. सू. ४.८)

तृष्णां निगृह्णाति शमयतीति, यथा— 'नागरधन्वयवासकमुस्तपर्पटकचन्दनकिरात-तिक्तकगुडूचीह्रीबेरधान्यकपटोलानीति दशेमानि तृष्णानिग्रहणानि भवन्ति' इति तृष्णानिग्रहणो महाकषायः।

तृष्णानाशक।

Pacifying thirst.

तृष्णाप्रशमनः (च. सू. २६.४३(१)

तृष्णां प्रकर्षेण शमयतीति। मधुररसः वातपित्तशामकत्वात्तृष्णाप्रशमनः।

तृष्णाशामक।

तृष्णाप्रशमनम् (च. वि. ३.४०)

तृष्णां प्रशमयतीति, यथा— ज्वरे उष्णोदकं स्वल्पमपि पीतं तृष्णाप्रशमनायोपकल्पते।

तृष्णाशामक।

तृष्णाप्रशान्तिः (च. चि. २४.१६३)

तृष्णाप्रशमनम्, यथा— 'शस्यते शिशिरं तोयं दाहतृष्णा- प्रशान्तये' इति।

तृष्णाशमन।

Pacification of thirst.

तृष्णाहरम् (सु. सू. ४५.८१)

तृष्णां हरतीति, यथा मस्तुगुणे— 'तृष्णाक्लमहरं मस्तु लघु स्रोतोविशोधनम्' इति।

तृष्णाशामक।

तेजोरूपावहम् (सु. चि. २४.२९)

तेजोरूपकरम्।

तेज और रूप देने वाला।

Providing glow and complexion.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तैक्ष्ण्यम् (च. सू. २७.३०२)

तीक्ष्णस्य भावः, तीक्ष्णत्वमिति। यथाह चरकः—'तैक्ष्ण्यादौष्ण्याद् व्यवायित्वाद् दीपनं शूलनाशनम्। ऊर्ध्वं चाधश्च वातानामानुलोम्यकरं बिडम्॥' इति।

तीक्ष्णता। Sharpness.

तैमिर्यापहम् (च. चि. २६.२४९)

तैमिर्यं तिमिरदोषमपहन्तीति, यथा—'बस्तमूत्रे त्र्यहं स्थाप्यमेलाचूर्णं सुभावितम्। चूर्णाञ्जनं हि तैमिर्यक्रिमिपिल्लमलापहम्॥' इति।

तिमिरनाशक।

Removing defects of vision.

त्रिदोषशमनी (च. सू. २७.८९)

त्रिदोषं शमयतीति, यथोक्तं—'त्रिदोषशमनी वृष्या काकमाची रसायनी' इति।

त्रिदोषशामक।

Pacifying three doṣas.

त्वक्प्रदूषणाः (सु. सू. ४६.४०६)

त्वचं प्रदूषयन्तीति, त्वग्रोगकरा इत्यर्थः, यथोक्तं—'विदाहिनस्तैलकृता गुरवः कटुपाकिनः। उष्णाः मारुतदृष्टिघ्नाः पित्तलास्त्वक्प्रदूषणाः॥' इति।

त्वचा को दूषित करने वाले।

Affecting skin and causing diseases therein.

त्वक्प्रसादकरम् (सु. चि. २४.५२)

त्वचः प्रसादं नैर्मल्यं करोतीति, यथा— 'उद्वर्त्तनं वातहरं कफमेदोविलापनम्। स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्॥' इति।

त्वचा को प्रसन्न करने वाला।

Making skin pleasant.

त्वक्स्थिरीकरणः (च. सू. २६.४३(५))

त्वचं स्थिरां करोतीति। तिक्तरसकर्म।

त्वचा को स्थिर करने वाला।

Providing firmness to skin.

त्वगग्नितेजनम् (सु. चि. २४.५२)

त्वक्स्थं भ्राजकमग्निं तेजयतीति।

त्वचागत अग्नि को तीव्र करने वाला।

Stimulating heat of the skin.

त्वग्ग्रहणम् (च. चि. २५.११३)

त्वग्जननम्, सत्वचो भवन्तीति चक्रः।

त्वचा धारण करना।

Attaining (covering of) skin.

त्वग्दोषप्रबाधनः (च. चि. ७.९२)

त्वचो दोषं विकारं प्रबाधते रुणद्धीति, त्वग्विकारनाशन इत्यर्थः।

चर्म रोगों को रोकने वाला।

Checking skin diseases.

त्वग्दोषापनयनम् (च. सू. २५.४०)

त्वग्दोषं चर्मविकारमपनयतीति, यथा— 'लामज्जकोशीरं दाहत्वग्दोषस्वेदापनयन-प्रलेपनानाम्' इति।

चर्मरोगनाशक।

Alleviating skin diseases.

त्वग्विशुद्धिकरः (च. चि. २५.११४)

त्वचो विशुद्धिं दोषापनयनरूपां करोतीति, यथा— 'मनःशिलैला मञ्जिष्ठा लाक्षा च रजनीद्वयम्। प्रलेपः सघृतक्षौद्रस्त्वग्विशुद्धिकरः परः॥' इति।

त्वचा का विशोधन करने वाला।

Purifying skin.

त्वच्यः (च. सू. २६.४३(१))

त्वचे हितः। मधुररसकर्म। तैलकर्मापि यथा— 'मारुतघ्नं न च श्लेष्मवर्धनं बलवर्धनम्। त्वच्यमुष्णं स्थिरकरं तैलं योनिविशोधनम्॥' इति।

त्वचा के लिए हितकर।

Benefecial for skin.

द

दन्तक्रिमिनुत् (च. चि. २६.२१२)

दन्तक्रिमीनपनयतीति।

दन्तक्रिमिनाशक।

Removing dental caries.

दन्तचलननुत् (च. चि. २६.२१२)

दन्तानां चलनमपाकरोतीति।

दाँतों के हिलने को दूर करना।

Removing looseness of teeth.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दन्तच्यावनः (च. सू. २६.४३(३))

दन्तांश्च्यावयति दुर्बलीकृत्य पातयतीति। लवणातिसेवनस्य कर्म।

दांतों को (कमजोर कर) गिराने वाला।

Making the teeth weak and fall.

दन्तदार्ढ्यकरम् (सु. चि. २४.१४)

दन्तेषु दार्ढ्यं स्थैर्यं करोतीति, दन्तस्थिरीकरणमित्यर्थः, यथोक्तं— 'मुखवैरस्य-दौर्गन्ध्यशोफजाड्यहरं सुखम्। दन्तदार्ढ्यकरं रुच्यं स्नेहगण्डूषधारणम्॥' इति।

दांतों को मजबूत करने वाला।

Providing firmness to teeth.

दन्तबलकरः (च. सू. २५.४०)

दन्तेषु बलमादधातीति, यथोक्तं— 'तैलगण्डूषाभ्यासो दन्तबलरुचिकराणाम्' इति।

दांतों को सबल बनाने वाला।

Making teeth strong.

दन्तरोगनुत् (च. चि. २६.१९६)

दन्तानां रोगानपनयतीति, यथा— 'कालकं नाम तच्चूर्णं दन्तास्यगलरोगनुत्।' इति।

दन्तरोगनाशक।

Alleviating diseases of teeth.

दन्तविशोधनम् (च. सू. ५.७३)

दन्तान् विशोधयतीति, यथा— औद्भिदं कृत्रिमं वा दन्तपवनं, दशनसंस्कारचूर्णं वा।

दांतों को साफ करने वाला।

Cleaning of teeth, tooth brush.

दन्तविषापहः (च. चि. २३.२२०)

प्राणिदन्तैर्जातं विषमपहन्तीति। यथोक्तं— 'सोमवल्कोऽश्वकर्णश्च गोजिह्वा हंसपद्यपि। रजन्यौ गैरिकं लेपो नखदन्तविषापहः॥' इति।

दन्तज विष का नाशक।

Destroying teeth-poison.

दन्तशोधनम् (सु. चि. २४.९)

दन्तान् शोधयति मलानपाकृत्य स्वच्छयतीति, यथा— 'दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्। तद्दौर्गन्ध्योपदेहौ तु श्लेष्माणं चापकर्षति॥' इति।

दांतों को साफ करने वाला।

Teeth-cleaning, tooth powder.

दन्तशौषिर्यनुत् (च. चि. २६.२१८)

दन्तस्य शौषिर्यं सरन्ध्रतां कोटरं वाऽपनयतीति।

दांत की शुषिरता को दूर करने वाला।

Removing cavity in teeth.

दन्तहर्षः (च. सू. २६.७५)

दन्तेषु हर्षवत् प्रतीतिः। अम्लरसस्य लिङ्गम्, यथोक्तं— 'दन्तहर्षान् मुखास्रावात् स्वेदनान् मुखबोधनात्। विदाहाच्चास्यकण्ठस्य प्राश्यैवाम्लं रसं वदेत्॥' इति।

दांत कोठा होना।

Excessive sensitiveness in teeth.

दन्तहर्षणः (च. सू. २६.४३(२))

दन्तान् हर्षयतीति। अतिप्रयुक्ताम्लरसस्य कर्म।

दन्तहर्ष उत्पन्न करने वाला।

Causing excessive sensitivencess in teeth.

दन्तहर्षप्रमर्दनाः (सु. चि. २२.३४)

दन्तहर्षं प्रमर्दयति शमयतीति, यथा— 'स्नेहानां कवलाः कोष्णाः सर्पिषस्त्रैवृतस्य वा। निर्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्दनाः॥' इति।

दन्तहर्ष का शामक।

Relieving excessive sensitiveness of teeth.

दन्तभ्रंशनुत् (च. चि. २६.२१२)

दन्तानां भ्रंशं पतनं रुणद्धीति।

दांत गिरने को रोकने वाला।

Checking fall of teeth.

दर्शनहिततमः (च. .सू. २७.६४)

दर्शनाय चक्षुरिन्द्रियाय हिततमः। मयूरमांसगुणः।

चक्षु के लिए हिततम।

Most benefecial for eyes (vision).

दहनम् (च. वि. १.१७)

दग्धीकरणं, भस्मीकरणं वा, 'दह भस्मीकरणे' धातोः।

जलाना।

Burning.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दहनकरम् (सु. सू. ४१.४(३)

दहनं भस्मसात्करणम् (ड०), तत्करम्। तैजसद्रव्यकर्म।

जलाना। Burning.

दारणः (च. सू. २६.४३(३)

दारयति धातून् व्रणादीन् वा भिनत्तीति। अत्युपयुक्तलवणरसस्य कर्म।

विदीर्ण करने वाला।

Tearing, breaking.

दारणम् (सु. सू. २७.४)

विदारणं भेदनमित्यर्थः, यथोक्तं डल्हणेन — 'दारणमिति चिरबिल्वादिभिर्मिश्रकोक्तैरौषधै-र्विदारणम्' इति। पुनः 'द्विविधं हि पक्वशोथदारणं सुकुमारं कृच्छ्रं चेति, तत्र कपोतपुरीषादि सुकुमारं, क्षारः कृच्छ्रमिति' (सु. सू. ३७.१०)।

विदीर्ण करना, फाड़ना।

Tearing, opening.

दारुणः (च. सू. १२.७)

मृदुविपरीतः, कठिन इत्यर्थः। वातगुणेषु पठितः।

कठिन (कड़ा)। Hard.

दारुणीकरणम् (सु. चि. १.८६)

कठिनकरणम् (ड०), यथा—'व्रणेषु मृदुमांसेषु दारुणीकरणं हितम्। धवप्रियङ्ग्वशोकानां रोहिण्याश्च त्वचस्तथा॥' इति।

कठिन बनाना। Hardening.

दार्ढ्यकृत् (अ. हृ. सू. ६.६६)

दार्ढ्यं स्थैर्यं करोतीति।

दृढ़ता उत्पन्न करने वाला।

Providing firmness.

दार्ढ्यजननम् (च. सू. २७.८१)

दार्ढ्यं शरीराङ्गानां स्थैर्यं जनयतीति। दार्ढ्यकृत्।

दृढ़ता उत्पन्न करने वाला।

दार्ढ्यावहः (च. सि. १.२८)

दार्ढ्यकृत्।

दाहकराणि (च. सू. २६.११)

दाहं कुर्वन्तीति। आग्नेयद्रव्यकर्म।

दाहजनक।

Heat-producing.

दाहकारी (सु. चि. २४.८६)

दाहं कर्तुं शीलं यस्येति, यथा— 'आतपः पित्ततृष्णाग्निस्वेदमूर्च्छाभ्रमास्रकृत्। दाहवैवर्ण्यकारी च' इति।

दाहकर।

दाहघ्नः (सु. सू. ३८.४९)

दाहं हन्तीति। न्यग्रोधादिगणकर्म

दाहशामक।

Pacifying burning sensation.

दाहज्वरप्रशमनम् (च. चि. ३.२५७)

दाहयुक्तः ज्वरः दाहज्वरः, तं प्रशमयतीति, यथोक्तं— 'सहस्रधौतं सर्पिर्वा तैलं वा चन्दनादिकम्। दाहज्वरप्रशमनं दद्यादभ्यञ्जनं भिषक्॥' इति।

दाहयुक्त ज्वर का शामक।

Pacifying fever with burning sensation.

दाहज्वरापहाः (च. चि. ३.२६६)

दाहज्वरमपघ्नन्तीति, यथा— 'शीतानि चान्नपानानि शीतान्युपवनानि च। वायवश्चन्द्रपादाश्च शीता दाहज्वरापहाः॥' इति।

दाहज्वरशामक।

दाहनः (च. सू. २७.३०६)

दाहयति दाहं जनयतीति। क्षारकर्म।

दाहजनक।

Causing burning.

दाहनिवारणाः (च. चि. २९.१३५)

दाहं निवारयतीति, दाहप्रशमन इत्यर्थः।

दाहशामक।

दाहनिर्वापणम् (च. सू. २५.४०)

दाहं निर्वापयति प्रशमयतीति, यथा— 'चन्दनं दुर्गन्धहरदाहनिर्वापणलेपनानाम् (अग्र्यम्)' इति॥

दाहशामक।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दाहनुत् (च. चि. २९.१२२)

दाहमपनयतीति, यथा— 'तिलाः प्रियालो मधुकं बिसं मूलं च वेतसात्। आजेन पयसा पिष्टः प्रलेपो दाहरागनुत् ॥' इति।

दाहशामक।

दाहप्रणाशनाः (सु. सू. ४५.१६८)

दाहं प्रकर्षेण नाशयन्तीति, यथा 'यावत्यः शर्कराः प्रोक्ता सर्वा दाहप्रणाशनाः' इति।

दाहनाशक।

दाहप्रशमनः (च. सू. ४.१७)

दाहं प्रकर्षेण शमयतीति, यथा— दाहप्रशमनो महाकषायः— 'लाजाचन्दनकाश्मर्यफलमधूक-शर्करानीलोत्पलोशीरसारिवागुडूचीह्रीबेराणीति दशेमानि दाहप्रशमनानि भवन्ति' इति।

दाहशामक।

Pacifying burning sensation.

दाहप्रशान्तिः (च. चि. २४.१६३)

दाहप्रशमनम्।

दाह का शमन।

Pacification of burning sentation.

दाहशमनाः (च. चि. ४.७४)

दाहं शमयन्तीति।

दाहशामक।

दाहहरम् (सु. चि. २४.५७)

दाहं हरतीति, दाहप्रशमनमित्यर्थः।

दाहशामक।

दाहापनयनम् (च. सू. २५.४०)

दाहमपनयति निवारयतीति, यथा—'लामज्जकोशीरं दाहत्वग्दोषस्वेदापनयनप्रलेपनानाम् (अग्र्यम्)' इति।

दाहशामक।

दीपनः (च. चि. १९.१०३)

दीपयत्यग्निमिति, यथा— 'योज्यश्चामाातिसारघ्नो यथोक्तो दीपनो गणः' इति।'दीपनो गणः' इति 'शालपर्णी पृश्निपर्णी इत्यादिना (च. चि. १९.२६-२९) उक्तः (चक्र.)। कट्वम्ललवणा आग्नेया रसाः सामान्याद् दीपनाः।

अग्नि को दीप्त करने वाला।

Stimulating digestive fire.

दीपनम् (प्रि. नि. १३.५४)

दीपनमग्नेरुत्तेजनम्।

तल्लक्षणं यथा— 'दीपयत्यनलं यद्धि दीपनं रामठं यथा' इति।

अग्नि को उत्तेजित करने वाला।

Stimulating digestive fire. Appetiser.

दीपनग्राही (च. चि. १९.२५)

दीपनग्राहिगणौ षड्विरेचनशताश्रितीयोक्तौ इति चक्रः; तत्तु न रम्यम्। वस्तुतस्तु 'दीपनत्वे सति ग्राहित्वम्' इति दीपनग्राहिलक्षणम्। इदमेव ग्राहिपदेन शार्ङ्गधरेण स्तम्भनात् पृथक् परिभाषितं यथा— दीपनं पाचनं यत् स्यादुष्णत्वाद् द्रवशोषकम्। ग्राहि तच्च यथा शुण्ठी जीरकं गजपिप्पली' ॥ इति

अस्मिन् संदर्भे अधोनिर्दिष्टा अंशा अपि द्रष्टव्याः— च. चि. ८.१३४; १५.११७,१२४;२८.२४३.

जो दीपन होते हुए ग्राही हो।

That which is anti-diarrhoeal also being appetiser.

दीपनपाचनम् (च. चि. ८.१३६)

दीपनञ्च तत् पाचनम्, अग्निं दीपयत्यामञ्च पाचयतीत्यर्थः, यथोक्तं — 'पिबेद्धूमं ततो मृष्टमद्या-द्दीपनपाचनम्'। भेषजं पानमन्नञ्च हितमिष्टोपकल्पितम् ॥' इति ।(द्र. -च. चि. १९.१९,२९)

दीपन और पाचन दोनों।

Both appetiser and digestant.

दीपनीयः (च. सू. ४.८)

दीपने हितो दीपनीयः, यथा— 'पिप्पलीपिप्पलीमूल-चव्यचित्रकशृङ्गबेराम्लवेतसमरिचाजमोदाभल्ला-तकास्थिहिङ्गुनिर्यासा इति दशेमानि दीपनीयानि भवन्ति' इति।

दीपन में प्रयोज्य।

Useful for stimulating digestive fire.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दीर्घम् (च. सू. १.३)

दीर्घकालसंबन्धि (चक्र.), यथोक्तं 'दीर्घं जीवितमन्विच्छन् भरद्वाज उपागमत्'; 'तथा कुर्वन् दीर्घजीवितं जीवत्यनवमतः पुरुषो भवति' इत्यादि।

लम्बा, बड़ा।

बड़ा। Long

दुःखम् (च. शा. १.७२)

१. आत्मगुणः, यथोक्तं चरके—इच्छा द्वेषः सुखं दुःखमित्यादि।

दुःख। Pain.

२. आयुषो भेदः, यथा 'हिताहितं सुखं दुःखमायुः' इति। 'दुःखयुक्तवाद् दुःखम्' इति चक्रः।

दुखी। Painful.

दुःखाबोधनम् (च. चि. २४.६४)

दुःखबोधस्य बाधनम्, यथा— 'वधबन्धपरिक्लेश-दुःखानां चाप्यबोधनम्। मद्योत्थानाञ्च रोगाणां मद्यमेव प्रबाधकम्॥' इति।

दुःखज्ञान को बाधित करने वाला।

Blocking the feeling of pain (Anaesthetic.)

दुर्गन्धः (सु. सू. ४६.५२२)

गुणविशेषः, तल्लक्षणं सुश्रुते—'सुखानुबन्धी सूक्ष्मश्च सुगन्धो रोचनो मृदुः। दुर्गन्धो विपरीतोऽस्माद्धुल्लासारुचिकारकः॥' इति।

दुखद गन्ध।

Foul smell.

दुर्गन्धहरम् (च. सू. २५.४०)

दुर्गन्धं हरतीति, यथा— 'चन्दनं दुर्गन्धहरदाह-निर्वापणलेपनानाम्' (अग्र्यम्)' इति।

दुर्गन्धनाशक।

Removing foul odour.

दुर्नामहत् (सु. सू. ४५.१८९)

दुर्नामान्यर्शांसि हरतीति, अर्शोघ्न इत्यर्थः।

अर्शोघ्न।

दुर्विपाककरः (च. सू. २५.४०)

दुःखेन विपाकं परिणामं करोतीति, यथा—'गुरुभोजनं दुर्विपाककराणाम्' इति।

कठिनाई से परिपाक करने वाला।

दुष्टव्रणविशोधनः (सु. सू. ३८.६५)

दुष्टव्रणान् विशोधयतीति, यथा लाक्षादिगणवर्णने— 'कषायतिक्तमधुरः कफपित्तार्त्तिनाशनः। कुष्ठक्रिमि-हरश्चैव दुष्टव्रणविशोधनः॥' इति।

दूषित व्रण को शुद्ध करने वाला।

Cleansing dirty wounds.

दुष्टव्रणशोधनम् (सु. सू. ४४.६३)

दुष्टान् व्रणान् शोधयतीति, यथा हरीतकीप्रसङ्गे — 'रसायनं परं मेध्यं दुष्टान्तर्व्रणशोधनम्' इति।

दूषित व्रण को शुद्ध करने वाला।

दूषीविषापहाः (सु. सू. ४६.८३)

विषमेव दावाग्निवातातपाद्यभिभवेन मन्दतां गतं विषपीतस्य वा विषं दूषीविषम् (ड०), तदपघ्नन्तीति।

दूषीविष का नाशक।

Countreacting latent poison.

दृक्नाशनम् (अ. हृ. सू. ५.७७)

दृशं चक्षुरिन्द्रियं नाशयतीति, दर्शनेन्द्रियोपघातक इत्यर्थः, यथा शुक्तगुणे—'दीपनं शिशिरस्पर्शं पाण्डुदृक्कृमिनाशनम्' इति।

दृष्टिनाशक।

Destroying vision.

दृक्प्रसादनी (च. चि. २६.२४५)

दृशं दर्शनेन्द्रियं प्रसादयति निर्मलीकरोतीति, यथा नेत्ररोगोक्तामृताह्ववर्तौ—'चूर्णं क्षिप्त्वा कृता वर्तिः सर्वघ्नी दृक्प्रसादनी' इति।

दृष्टि को स्वच्छ करने वाली।

Clearing vision.

दृग्घ्नम् (अ. हृ. सू. ६.३४)

दृशं दर्शनेन्द्रियं हन्तीति, दृष्टिनाशनमित्यर्थः, यथा— 'शाण्डाकीवटकं दृग्घ्नं दोषलं ग्लपनं गुरु' इति।

दृष्टिनाशन।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दृढम् (च. सू. ५.८६)

दार्ढ्यसंपन्नं स्थिरमित्यर्थः, यथाह चरकः—'तथा शरीरमभ्यङ्गाद् दृढं सुत्वक् च जायते' इति।

दृढ, स्थिर।

Firm, stable.

दृष्टिकण्डूघ्नम् (सु. चि. २४.१८)

दृष्टेः नेत्रस्य कण्डूं हन्तीति, नेत्रकण्डूहर इत्यर्थः।

नेत्रकण्डू का नाशक।

Alleviating itching of eyes.

दृष्टिक्लेदापहम् (सु. चि. २४.१८)

दृष्टेः नेत्रस्य क्लेदमार्द्रतामपहन्तीति, यथा—'मतं स्रोतोऽञ्जनं श्रेष्ठं विशुद्धं सिन्धुसंभवम्। दाहकण्डूमलघ्नं च दृष्टिक्लेदरुजापहम्॥' इति।

नेत्रों की आर्द्रता का नाशक।

Removing watering of eyes.

दृष्टिक्षयकरम् (सु. सू. ४६.२१४)

दृष्टेः दर्शनशक्तेः क्षयं ह्रासं करोतीति, यथा—'दृष्टिशुक्रक्षयकरं कालिन्दं कफवातकृत्' इति।

दृष्टि को क्षीण करने वाला।

Diminishing vision.

दृष्टिघ्नः (च. सू. २७.४)

दृष्टिं दर्शनेन्द्रियं हन्तीति, यथा—'दृष्टिशुक्रघ्नः क्षारः' इति।

दृष्टिनाशक।

Causing loss of vision.

दृष्टिदाहघ्नम् (सु. चि. २४.१८)

दृष्टेः नेत्रस्य दाहं हन्तीति, नेत्रदाहशमन इत्यर्थः।

नेत्रदाहशामक।

Relieving burning sensation in eyes.

दृष्टिदूषणम् (सु. सू. ४६.५१)

दृष्टिं दर्शनेन्द्रियं दूषयतीति, यथा—'विदाहि गुरु विष्टम्भि विरूढं दृष्टिदूषणम्' इति।

दृष्टि को दूषित करने वाला।

Affecting vision.

दृष्टिप्रदूषणाः (सु. सू. ४६.४०४)

दृष्टिं दर्शनेन्द्रियं प्रकर्षेण दूषयन्तीति।

दृष्टिदूषक।

दृष्टिप्रसादनम् (च. सू. ५.१६)

दृष्टिं नेत्रं प्रसादयति निर्मलीकरोतीति, यथा—'चक्षुस्तेजोमयं तस्य विशेषाच्छ्लेष्मणो भयम्। ततः श्लेष्महरं कर्म हितं दृष्टेः प्रसादनम्॥' इति 'नात्यर्थं वातलास्तेषु मुद्गा दृष्टिप्रसादनाः' इति च।

दृष्टि को स्वच्छ करने वाला।

Clearing vision.

दृष्टिबलकृत् (अ. कृ. उ. १४.३२)

दृष्टेः दर्शनेन्द्रियस्य बलं करोति जनयतीति, दृष्टिबलप्रद इत्यर्थः, यथा—'पिण्डाञ्जनं हितमनातपशुष्कमक्ष्णि विद्धे प्रसादजननं बलकृच्च दृष्टेः।' इति, अन्यच्च— 'तिलैतलमक्षतैलं भृङ्गस्वरसोऽसनाच्च निर्यूहः। आयसपात्रविपक्वं करोति दृष्टेर्बलं नस्यम्॥' इति।

दृष्टिशक्तिवर्धक।

Promoting power of vision.

दृष्टिबलविवृद्धिः (सु. उ. १८.८४)

दृष्टेश्चक्षुषो बलस्य शक्तेः विवृद्धिः विशेषेण वृद्धिरिति, यथा— 'दृष्टेर्बलविवृद्ध्यर्थं याप्यरोगक्षयाय च। राजार्हान्यञ्जनाग्र्याणि निबोधेमान्यतः परम्॥' इति। अत्र डल्हणः— 'दृष्टिर्मसूरदलमात्रा, तच्छक्तिबलाधानार्थं स्वस्थेन प्रसादाञ्जनं कार्यं, आतुरेण याप्यरोगप्रसादाञ्जनं कार्यम्' इति।

दष्टिशक्तिवर्धक।

दृष्टिमलघ्नम् (सु. चि. २४.१८)

दृष्टेर्मलं दोषं हन्तीति, नेत्रमलापहमित्यर्थः।

नेत्रमल का नाशक।

Removing dirt of eyes.

दृष्टिरुजापहम् (सु. चि. २४.१८)

दृष्टेः नेत्रस्य रुजां पीडामपहन्तीति, नेत्रशूलहरमित्यर्थः।

नेत्रशूल का नाशक।

Alleviating pain in eyes.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दृष्ट्यपहम् (सु. सू. ४५.११८)

दृष्टिं दर्शनशक्तिमपहन्तीति, यथा– 'कृमिघ्नमिङ्गुदीतैलमीषत्तिक्तं तथा लघु। कुष्ठामयकृमिहरं दृष्टिशुक्रबलापहम् ॥' इति।

दृष्टिनाशक।

Causing loss of vision.

देहदार्ढ्यकरम् (च. चि. १.३.५३)

देहे दार्ढ्यं स्थैर्यं करोतीति, देहस्थिरीकरणमित्यर्थः। शिलाजतुरसायनकर्म।

शरीर में दृढता उत्पन्न करने वाला।

Producing firmness in body.

देहमृदूकरणः (च. सू. २६.४३(३))

देहस्यावयवान् मृदूकरोतीति। लवणरसस्य कर्म। स्नेहनस्यापि कर्म 'स्नेहोऽनिलं हन्ति मृदूकरोति देहं मलानां विनिहन्ति सङ्गम्' इति। (च. सि. १.७)

शरीर को मृदु बनाना।

Softening body parts.

देहलघुता (च. चि. १९.१८)

शरीरावयवेषु लाघवम्, यथाऽतीसारे दोषप्रवाहणगुणे– 'तया प्रवाहिते दोषे प्रशाम्यत्युदरामयः। जायते देहलघुता जठराग्निश्च वर्धते ॥' इति।

शरीर में हलकापन।

Lightness in body.

देहवृद्धिकरम् (सु. सू. ४५.१०३)

देहस्य वृद्धिं विकासं करोतीति, यथा–'चक्षुष्यमग्र्यं स्त्रीणां तु सर्पिः स्यादमृतोपमम्। वृद्धिं करोति देहाग्न्योर्लघुपाकं विषापहम् ॥' इति।

शरीर को विकसित करना।

Promoting growth of body.

देहसंघुक्षणम् (सु. चि. ३१.५७)

शक्त्युपचयलक्षणबलसंदीपनं पुष्ट्यावहमित्यर्थः (ड०)। स्नेहफलम्।

शरीरविकास को उत्तेजित करना।

Stimulating development of body.

देहसंवेजनम् (च. चि. ९.२९)

देहस्य संवेजनमुद्वेजनं क्षोभणमिति यावत्, यथोन्मादचिकित्सिते–'शुद्धस्याचारविभ्रंशे तीक्ष्णं नावनमञ्जनम्। ताडनं च मनोबुद्धिदेहसंवेजनं हितम् ॥' इति।

शरीर में क्षोभ उत्पन्न करना।

Producing shocks in body parts.

दोषघाति (अ. हृ. सू. ६.१२६)

दोषान् हन्तुं शीलं यस्येति, दोषहरमित्यर्थः, यथोक्तं कपित्थगुणवर्णने–'दोषघाति तु पक्वं हिध्मावमथुजित्' इति।

दोषहर।

Alleviating doṣas.

दोषघ्नम् (च. सू. २७.१४६)

दोषान् हन्तीति, त्रिदोषशमनमित्यर्थः, यथा– 'प्राचीनामलकं चैव दोषघ्नं गरहारि च' इति। नारीदध्यपि दोषघ्नम् (सु. सू. ४५.७४)

(त्रि) दोषशामक।

Pacifying (three) doṣas.

दोषनिर्हरणम् (च. चि. २६.१४१)

दोषो मलं, तस्य निर्हरणं बहिष्करणम्।

मलशोधन।

Eliminating excreta.

दोषपाचनः (सु. सू. ३८.२८)

आमसंसृष्टानां दोषाणां पाचनः (ड०), यथोक्तं–'एतौ वचाहरिद्रादी गणौ स्तन्यविशोधनौ। आमातिसारशमनौ विशेषाद् दोषपाचनौ ॥' इति, 'अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्' इति च (सु. उ. ३९.१०३) तिक्तरसो दोषपाचनः, यथाऽर्शश्चिकित्सिते– 'अग्निसंदीपनार्थं च रक्तसंग्रहणाय च। दोषाणां पाचनार्थं च परं तिक्तैरुपाचरेत् ॥' इति (च. चि. १४.१८२)।

सामदोष का पाचन।

Digestant of doṣas associated with āma.

दोषप्रच्यावनम् (सु. चि. १.१२७)

दोषनिर्हरणम्, दोषप्रच्यावनं त्रिफलाद्राक्षादिकषायादिभिरिति डल्हणः।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दोषों को बाहर निकालना।

Elimination of doṣas.

दोषप्रशमनम् (च. सू. १.६७)

'दोषस्य दोषयोर्दोषाणां वा प्रशमननम्। दोषग्रहणेन दुष्टा रसादयोऽपि गृह्यन्ते। तेन द्रव्यमहिम्ना यद् दोषाणां दुष्टानां रसादीनां धातूनां वा शमकमामलकदुरालभादि तद् गृह्यते' इति चक्रः। प्रभावभेदे द्रव्यभेदः यथा—'किञ्चिद् दोषप्रशमनं किञ्चिद् धातुप्रदूषणम्। स्वस्थवृत्तौ मतं किञ्चित् त्रिविधं द्रव्यमुच्यते॥' इति।

दोषशामक।

Pacifying doṣas.

दोषलम् (सु. सू. ४५.७२)

दोषलमपथ्यत्वेन विकारकारि। (ड०)

यथोक्तं— 'बिल्वं तु दुर्जरं पक्वं दोषलं पूतिमारुतम्' इति (च. सू. २७.१३८)।

विकारजनक।

Pathogenic.

दोषविपाचनम् (च. चि. २४.१६७)

दोषं सामदोषं विशेषेण पाचयतीति, यथा—'जलं मुस्तैः श्रृतं वापि दद्याद्दोषविपाचनम्' इति।

दोषपाचन।

दोषविलायनम् (च. क. १२.६)

दोषयोः पित्तश्लेष्मणोः विलीनीकरणमार्द्रीकृत्य निर्हरणम्।

दोषों को विलीन करना।

Expelling doṣas (kapha and pitta) after increasing their liquidity.

दोषविष्यन्दनम् (च. चि. २४.११८)

दोषविलयनम्, यथा— 'दोषविष्यन्दनार्थं हि तस्मै मद्यं विशेषतः। व्यवायितीक्ष्णोष्णतया देयमम्लेषु सत्स्वपि॥' इति।

दोषों का विलीन होना।

Liquifaction of doṣas.

दोषशमनः (सु. चि. ३८.९५)

अनिर्हृत्यैव दोषान् शमयतीति, यथा—'प्रियङ्गुर्मधुकं मुस्ता तथैव च रसाञ्जनम्। सक्षीरः शस्यते बस्तिर्दोषाणां शमनः परः॥' इति

दोषशामक।

दोषशेषहरम् (च. चि. १३.१६९)

दोषस्य शेषोऽवशेषः, तं हरतीति, यथा—'दद्यान्मूत्रयुतं क्षीरं दोषशेषहरं शिवम्।' इत्युदरे।

अवशिष्ट दोष का शोधक।

Eliminating remnant doṣa.

दोषसंघातभेदनम् (सु. सू. ४६.४३६)

दोषसमूहपृथक्करणम् (ड०); चरकेऽपि स्नुहीगुणवर्णने यथा— 'विरेचनानां सर्वेषां सुधा तीक्ष्णतमा मता। सङ्घातं हि भिनत्त्याशु दोषाणां कष्टविभ्रमा॥' इति।

दोषसमूह का पृथक्करण।

Disintegrating mass of impurities.

दोषसंजननः (सु. सू. १९,१७)

दोषं विकारं संजनयतीति।

अत्र दोषशब्देन व्रणदुष्टिरेवोच्यते इति डल्हणः।

विकारजनक।

Pathogenic.

दोषसंप्रवर्तिनी (अ. हृ. चि०९.५)

दोषं मलं सम्यक् प्रवर्त्तयति प्रवाहयतीति, यथा—'प्राणदा प्राणदा दोषे विबद्धे संप्रवर्तिनी' इति।

मल को बाहर प्रेरित करने वाली।

Pushing exereta out.

दोषसञ्चयानुबन्धाः (च. वि. १.१८)

दोषसञ्चयानुबन्धोऽत्युपयोगे यासां ताः दोषसञ्चयानुबन्धाः (चक्र०), परिणामे दोषसञ्चय एव भवतीत्यर्थः, यथा पिप्पलीप्रसङ्गे— 'सततमुपयुज्यमाना हि गुरुप्रक्लेदित्वाच्छ्लेष्माणमुत्क्लेशयन्ति, औष्ण्यात् पित्तं, न च वातप्रशमनायोपकल्पन्तेऽल्पस्नेहोष्णभावात्' इति।

परिणाम में दोषसञ्चय होना।

Accumulation of doṣas by prolonged use.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दोषसमीरणम् (च. सि. ११.६)

दोषं मलभूतं सम्यगीरयति निःसारयतीति, वस्तिना दोषहारकमिति चक्रः ।'

मल का प्रेरक ।

Pushing faeces out.

दोषहरः (सु. चि. ३८.९४)

उत्क्लिष्टं दोषं हरतीति, यथा– 'शताह्वा मधुकं बीजं कौटजं फलमेव च । सकाञ्जिकः सगोमूत्रो बस्तिर्दोषहरः स्मृतः ॥' इति ।

दोष को निकालने वाला ।

Expelling impurity.

दोषहरणम् (च. क. १.४)

दोषसंशोधनम् ।

दोषसंशोधन ।

दोषानुबन्धरक्षणम् (च. चि. १३.१९४)

दोषानुबन्धाद्रक्षणम्, अनुबन्धे दोषाः प्रकुपिता न स्युरिति सावधानवृत्तिः, यथोदरचिकित्सायां– 'प्रयोगाणां च सर्वेषामनु क्षीरं प्रयोजयेत् । दोषानुबन्धरक्षार्थं बलस्थैर्यार्थमेव च ॥' इति ।

दोषानुबन्ध से रक्षा ।

Protection against association of doṣas.

दोषानुलोमनाः (च. चि. ३.१५२)

दोषाणां विकारकर्तृणां मलानामनुलोमनाः स्वमार्गे प्रवर्त्तकाः, यथा यवागूगुणे–

'ताश्च भेषजसंयोगाल्लघुत्वाच्चाग्निदीपनाः । वातमूत्रपुरीषाणां दोषाणां चानुलोमनाः ॥' इति ।

दोषानुलोमनी– हरीतकी (च. चि. १.१.२९)

मलों का अनुलोमन करने वाला ।

Pushing excreta through their normal passages.

दोषान्ध्यनाशिनी (अ. हृ. उ. १३.८५)

दोषान्ध्यं निशान्ध्यम्, तन्नाशयतीति, नक्तान्ध्यनाशिनीत्यर्थः ।

नक्तान्ध्यनाशक ।

Removing might-blindness.

दोषोत्क्लेशकरम् (अ. हृ. ६.१०७)

दोषान् वातादीन् उत्क्लेशयति कोपयत् स्थानाच्चालयतीति (अ. द.) ।

दोषों को कुपित कर अपने स्थान से चालित करना ।

Displacing doṣas after aggravating them.

दौर्गन्ध्यम् (च. सू. ५.७६)

दुर्गन्धस्य भावः दौर्गन्ध्यम्, अनिष्टगन्धमित्यर्थः ।

दुर्गन्ध । Foul smell.

दौर्गन्ध्यनाशनम् (च. सू. २७.३०७)

दौर्गन्ध्यं नाशयति हरतीति, यथा– 'कारवी कुञ्चिकाऽजाजी यवानी धान्यतुम्बुरु । रोचनं दीपनं वातकफदौर्गन्ध्यनाशनम् ॥' इति ।

दुर्गन्धनाशक ।

Removing foul smell.

दौर्बल्यकरः (च.. सू. २५.४०)

दौर्बल्यं करोतीति, यथा– 'एकरसाभ्यासो दौर्बल्यकराणाम् (अभ्यम्)' इति ।

दौर्बल्यजनक ।

Debilitating.

दौर्बल्यकृत् (सु. चि. २४.७९)

दौर्बल्यकरः, यथा– 'अत्यध्वा विपरीतोऽ-स्याज्जरादौर्बल्यकृच्च सः ।' इति ।

दौर्बल्यकर ।

दौर्बल्यापहरम् (च. .चि. १.२.३)

दौर्बल्यमपहरतीति । रसायनकर्म ।

दौर्बल्यनाशक ।

Alleviating debility.

दौर्बल्याभिनिर्वृत्तिकरम् (च. वि. १.१८)

दौर्बल्यजनकम् । अत्युपयुज्यमानलवणस्य कर्म ।

दौर्बल्यकर ।

द्रवः (च. शा. ६.१०)

सान्द्रविपरीतो गुर्वादिगुणः ।

द्रव । Liquid.

द्रव्यगुरु (च. सू. ६.९)

द्रव्यतः द्रव्यप्रकृतितो यद् गुरु यथा माषादि ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्रकृति से भारी।

Heavy by nature.

द्वेषः (च. शा. १.७२)

आत्मगुणः, प्रतिकूलविषयान्निवृत्तिः। अनुकूलादपि व्याधिवशान्निवृत्तिर्भवति यथा अन्नद्वेषः, बालद्वेष इत्यादि।

प्रतिकूलविषय से निवृत्ति (विमुख होना)।

Aversion.

ध

धातुपुष्टिजननः (सु. चि. २४.३०)

धातूनां पुष्टिमुपचयं जनयतीति, धातुपुष्टिकर इत्यर्थः।

धातुपुष्टिकर।

Nourishing dhātus.

धातुप्रदूषणम् (च. सू. १.६७)

वातादीनां समत्वेन शरीरधारणात्मकानां तथा रसादीनाञ्च दूषणम् यथा यवकमन्दकविषादि (चक्र.)। प्रभावभेदेन द्रव्यभेदः यथा—'किञ्चिद् दोषप्रशमनं किञ्चिद् धातुप्रदूषणम्' इति।

धातुओं को प्रदूषित करने वाला।

Vitiating dhātus (and also normal doṣas and malas).

धातुवर्धनम् (सु. सू. ४५.७८)

धातून् वर्धयतीति, यथा—'शृतात् क्षीरात्तु यज्जातं गुणवद् दधि तत् स्मृतम्। वातपित्तहरं रुच्यं धात्वग्निबलवर्धनम्॥' इति।

धातुओं को बढ़ाने वाला।

Promoting dhātus.

धृतिः (च. शा. १.७२)

आत्मगुणः। तल्लक्षणं यथा 'धृतिर्हि नियमात्मिका'— धृतिः अनिष्टविषयेभ्यो मनो नियमयति निवर्त्तयतीत्यर्थः। 'धीधृतिस्मृतयः प्रज्ञाभेदाः' (चक्र.)

आत्मनियन्त्रण।

Self-control on mind and body.

धातुसाम्यकरः (च. सू. २७.२५४)

धातुसाम्यं करोतीति, यथा—'तृष्णातीसारशमनो धातुसाम्यकरः शिवः। लाजमण्डोऽग्निजननो दाहमूर्च्छानिवारणः॥' इति।

धातुसाम्य करने वाला।

Causing homeostasis.

धातुसाम्यकृत् (अ. हृ. सू. ६.२७)

धातुसाम्यकरः।

धातुसाम्यकर।

धारणः (च. चि. ३०.१०७)

धारयतीति। वामिन्याः बीजधारणकारक इत्यर्थः (चक्र.)।

बीजधारण कराने वाला।

Causing to hold back the seed (semen, embryo).

धीधृतिस्मृतिहरः (च. सू. २५.४०)

धीधृतिस्मृतिरूपां प्रज्ञां हरतीति, यथा—'मद्याक्षेपो धीधृतिस्मृतिहराणाम् (अप्रयम्)' इति।

प्रज्ञानाशक।

Causing loss of intellect.

धीप्रदम् (अ. हृ. उ. ७.२९)

बुद्धिप्रदम्, यथा— 'कूष्माण्डस्वरसे सर्पिरष्टादशगुणे शृतम्। यष्टीकल्कमपस्मारहरं धीवाक्स्वरप्रदम्॥' इति।

बुद्धिवर्धक।

Intellect-promoting.

न

नखविषापहः (च. चि. २३.२२०)

प्राणिनां नखक्षताज्जातं विषमपहन्तीति, यथा— 'सोमवल्कोऽश्वकर्णश्च गोजिह्वा हंसपद्यपि। रजन्यौ गैरिकं लेपो नखदन्तविषापहः॥' इति।

नखज विष का नाशक।

Counteracting nail-poison.

नयनामयघ्नः (सु. सू. ४६.३८)

नेत्ररोगनाशकः, यथा—'कफस्य हन्ता नयनामयघ्नो विशेषतो वन्यकुलत्थ उक्तः' इति।

नेत्ररोगनाशक।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Alleviating diseases of eye.

नस्तः प्रच्छर्दनम् (च. सू. १.८५)

शिरोविरेचनम् (चक्र०)। नासातः दोषं प्रकर्षेण छर्दयति निःसारयतीति।

नस्य द्वारा शिरोविरेचन।

Head-evacuation (by snuffing).

नवम् (च. सू. २१.३०)

अचिरजातम्, अन्नं मद्यमित्यादि।

नया। Fresh.

नाडीव्रणापहः (सु. चि. ८.४२)

नाडीव्रणमपहन्तीति, यथा—'स्वरसः क्वथितो दार्व्या घनीभूतो रसक्रिया। सक्षौद्रा मुखरोगासृग्-दोषनाडीव्रणापहा॥' इति।

नाडीव्रणनाशक।

Alleviating sinus.

नातिघनम् (अ. हृ. सू. ३.३०)

ईषत् सान्द्रम् (हे.)

थोड़ा गाढ़ा।

Slightly thick.

नात्युष्णशीतम् (च. सू. २४.२३)

ईषदुष्णशीतम्। 'अतिशीतमग्निमाद्यं करोति, अत्युष्णं च प्रचलस्यासृजो नितरां प्रचलतां करोति, तस्मान्नात्युष्णशीतम्' (चक्र.)।

किञ्चित् उष्ण और शीत।

Slightly hot and cold.

नामनः (च. सू. २६.४३(४))

शरीरं नमयतीति। कटुरसकर्म।

शरीर को झुकाना।

Bending the body.

निःसाराः (सु. सू. ६.१)

'निर्गतसाराः, सारोऽत्र गौरवमिति डल्हणः' 'अपगतसौम्यांशाः' इति चक्रः, अस्मन्मते तु सारोऽत्र वीर्यम्।

सारहीन (वीर्यहीन)।

Devoid of essence (potency).

निद्रापहरम् (च. चि. १.२.३)

(अति) निद्रामपहरतीति। रसायनकर्म।

अतिनिद्रानाशक।

Removing excessive sleep.

निद्रावर्धनः (सु. सू. ४६.९८)

निद्रां वर्धयतीति, अतिनिद्राजनन इत्यर्थः।

अति निद्राजनन।

Potently hypnotic.

निद्राहरम् (सु. चि. २४.५७)

निद्रां हरतीति, निद्रानाशन इत्यर्थः।

निद्रानाशक।

Anti-hypnotic.

निन्दितव्याधिकरः (च. सू. २५.४०)

निन्दितव्याधिं कुष्ठं करोतीति, कुष्ठजनक इत्यर्थः, यथा—'विरुद्धवीर्याशनं निन्दितव्याधिकराणाम् (अग्र्यम्)' इति।

कुष्ठजनक।

Causing leprosy.

निरूहणानि (अ. हृ. सू. १५.३)

निरूहे प्रयोज्यानि, निरूहकर्मकराणीति।

निरूहकर्म करने वाले।

Exerting actions of non-unctuous enema.

निर्गन्धम् (सु. सू. ४५.२०)

गन्धरहितम्, उपादेयभौमजलगुणः।

गन्धरहित।

Devoid of smell.

निर्वपणम् (च. चि. २५.६४)

निर्वापणम्।

दाहशामक।

निर्वापणम् (च. सू. १३-१४)

दाहप्रशमनम् (चक्र.), यथा घृतगुणे—'घृतं पित्तानिलहरं सशुक्रौजसां हितम्। निर्वापणं मृदुकरं स्वरवर्णप्रसादनम्॥' इति।

दाहशामक।

नेत्रक्रिमिघ्नम् (च. चि. २६.२४९)

नेत्रक्रिमीन् हन्तीति।

नेत्रगत क्रिमियों का नाशक।

Destroying organisms in eyes.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नेत्रदाहनिवारणः (च. चि. २६.२३१)

नेत्रदाहं निवारयतीति, यथा– 'उत्पन्नमात्रे तरुणे नेत्ररोगे बिडालकः। कार्यो दाहोपदेहाश्रुशोफरागनिवारणः॥' इति।

नेत्रगत दाह का शामक।

Alleviating burning sensation in eyes.

नेत्रमलविशोधनम् (च. चि. २६.२४८)

नेत्रमलं विशोधयतीति।

नेत्रमल का शोधक।

Eliminating eye-dirt.

नेत्रमलापहम् (च. चि. २६.२४९)

नेत्रमलमपहन्तीति।

नेत्रमलनाशक।

Removing dirt of eyes.

नेत्ररुजापहः (च. चि. २६.२३३)

नेत्रे रुजां पीडामपहन्तीति, यथा–'तद्वत् कार्यो हरीतक्या घृतभृष्टो बिडालकः।' इति।

नेत्रशूलहर।

Alleviating pain in eyes.

नेत्ररागनिवारणः (च. चि. २६.२३१)

नेत्रे रागं लौहित्यं निवारयतीति।

नेत्रगत लालिमा का नाशक।

Alleviating redness of eyes.

नेत्रशोफनिवारणः (च. चि. २६.२३१)

नेत्रे शोथं निवारयतीति।

नेत्रशोथ का नाशक।

Alleviating swelling in eyes.

नेत्रोपदेहनिवारणः (च. चि. २६.२३१)

नेत्रे उपदेहं मलं निवारयतीति।

नेत्रमलनाशक।

Alleviating dirt of eyes.

प

पक्ता (च. सू. २७.३०६)

पाकं करोतीति, पाचन इत्यर्थः। क्षारगुणः।

पाचन।

Digestant.

पक्तिदम् (अ. हृ. सू. ४.३०)

पक्तिं पाकशक्तिमग्निं ददाति वर्धयतीति, अग्निवर्धनमिति यावत्।

अग्निवर्धक (दीपन)।

पक्तिनाशनम् (सु. सू. ४५.७४)

पक्तिं पाकशक्तिमग्निं नाशयतीति।

अग्निनाशक।

Causing loss of digestive power.

पक्तिनुत् (सु. चि. २४.८४)

पक्तिं पाकशक्तिमग्निं नुदति विक्षिपति नाशयतीत्यर्थः।

अग्निनाशक।

पक्वशोथप्रभेदनः (च. चि. २५.५४)

पक्वशोथं (विद्रधिं) प्रभिनत्ति विदारयतीति, यथा– 'उमाऽथो गुग्गुलः सौधं पयो दक्षकपोतयोः। विट् पलाशभवः क्षारो हेमक्षीरी मुकूलकः॥ इत्युक्तो भेषजगणः पक्वशोथप्रभेदनः।' इति।

पक्व व्रणशोथ को विदीर्ण करने वाला।

Tearing mature inflammation (Abscess).

पक्वातीसारनाशनः (सु. सू. ३८.४७)

पक्वातीसारं नाशयति स्तम्भनादिति। यथा–'गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ' इति।

पक्वातीसारनाशक।

Checking mature diarrhoea.

पक्वाशयविशोधनम् (च. चि. २८.२४४)

पक्वाशयस्य विशोधनं रेचनमिति, यथा– 'अपानेनावृते सर्वं दीपनं ग्राहि भेषजम्। वातानुलोमनं यच्च पक्वाशयविशोधनम्॥' इति।

पक्वाशय का शोधन (रेचन)।

Intistinal evacuation (Purgative.)

पचनम् (च. वि. १.१७)

पाकः। क्षारकर्म।

पाचन।

Digestion.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पचनकरम् (सु. सू. ४२.४(३))

पचनमाहारादिपाकः (ड०) तत्करोतीति। लवणरसकर्म।

पाचन।

पटलापहा (च. चि. २६.२६१)

पटलं तदारख्यं नेत्ररोगमपहन्तीति, यथा—'धात्रीरसाञ्जनक्षौद्रसर्पिर्भिस्तु रसक्रिया। पित्तरक्ताक्षिरोगघ्नी तैमिर्यपटलापहा॥' इति।

पटलनामक नेत्ररोग का नाशक।

Alleviating disease of paṭala in eyes.

पटुः (अ. हृ. सू. ९.२१)

लवणः सैन्धवादिः। (अ०द०)

लवण। Salt.

पथ्यम् (च. सू. १.१००)

पथिभ्यः स्रोतोभ्यो हितं पथ्यम्।

स्रोतोमयं शरीरमिति कृत्वा शरीराय हितमित्यर्थः। शरीरमनसोरन्योन्याश्रयत्वात् 'मनःशरीरानुपघाति पथ्यम्' इति लक्षणं चक्रपाणिना कृतम् (च. सू. २५.४५)। (द्र. -अपथ्यम्)।

'हरीतकी पथ्यानाम् अग्र्यम्' इति। (च. सू. २५.४०)

मन और शरीर के लिए हितकर।

Wholesome for mind and body.

परत्वम् (च. सू. २६.२९)

परादिगुणेष्वाद्यम्। परत्वं प्रधानत्वम्, यथोक्तं—'देशकालवयोमानपाकवीर्यरसादिषु। परापरत्वे'—यथा देशो मरुः परः, अनूपोऽपरः इत्यादि।

प्रधानता।

Superiority (or excellence).

परादयः (च. सू. २६.३०)

गुणाः, यथाह चरकः—'सार्था गुर्वादयो बुद्धिः प्रयत्नान्ताः परादयः' इति।

ते च दश यथा—'परापरत्वे युक्तिश्च संख्या संयोग एव च। विभागश्च पृथुकत्वं च परिमाणमथापि च॥ संस्कारोऽभ्यास इत्येते गुणाः प्रोक्ताः परादयः।' इति।

परादि गुण।

Parādi guṇas (a category of guṇas).

परिणतवीर्याः (सु. सू. ६.११)

सञ्जातशक्तिकाः। (ड०)

वीर्यवान्। mature, potent.

परितर्पणम् (च. चि. ६.१७)

सन्तर्पणम्।

सन्तर्पण।

Saturating regimen.

परिमाणम् (च. सू. २६.२९)

परिमाणं पुनर्मानम्, 'प्रस्थाढकादितुलादिमेयम्' (चक्र.)। परादिगुणविशेषः।

परिमाण।

Quantitative measurement.

परिस्रंसि (च. चि. १३.९०)

अनुलोमनम्। (चक्र.)

अनुलोमन।

Carminative.

परुषः (च. वि. ८.८२)

श्लक्ष्णविपरीतः, खर इत्यर्थः।

खुरदरा। Rough.

पलितघ्नम् (च. चि. २६.२७५)

पलितं केशशौक्ल्यं हन्तीति, यथा—'महानीलमिति ख्यातं पलितघ्नमनुत्तमम्' इति। पलितलक्षणं माधवे—'क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः। पित्तञ्च केशान् पचति पलितं तेन जायते॥' इति।

पलितनाशक।

Alleviating greying of hairs.

पलितापहम् (च. चि. २६.२६४)

पलितमपहन्तीति, यथा—'नस्यं स्यादणुतैलं वा खालित्यपलितापहम्' इति।

पलितनाशक।

पलितापादनः (च. सू. २६.४३(३))

पलितमापादयति जनयतीति।

अत्युपयुज्यमानलवणरसस्य कर्म।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पलितकारक।

Causing greying of hairs.

पवनक्षोभि (च. सि. ११.८)

पवनं वातं क्षोभयितुं कोपयितुं शलमस्येति, वातप्रकोपीत्यर्थः।

वातप्रकोपक।

Aggravating vāta.

पवननिग्रहणः (सु. सू. ४२.१०(२))

पवनं वातं निगृह्णातीति, वातशमन इत्यर्थः।

वातशामक।

Pacifying vāta.

पवनानुलोमि (च. सि. ११.१४)

वातानुलोमनः।

वायु का अनुलोमन।

Carminative.

पाकः (च. सू. २६.४५)

१. विपाकः।

विपाक। Final transformation.

२. पचनमाहारादेः। (च. चि. १५.५५)

पचन। Disestion.

३. शोथस्य पाकः। (सु. सू. १७.१४)

पाक।

Suppuration.

पाककराणि (च. सू. २६.११)

पाकं कुर्वन्तीति पाचनानीत्यर्थः। आग्नेयद्रव्यलक्षणम्।

पाक करने चले (पाचन)।

Digestant.

पाकशमः (सु. चि. १.२७)

पाकस्य शान्तिरुपरमः, यथा– 'वेदनोपशमार्थाय तथा पाकशमाय च। अचिरोत्पतिते शोफे कुर्याच्छोणितमोक्षणम्॥' इति।

पाकशामक।

Checking suppuration.

पाकि (च. सू. २७.३०४)

पाचयितुं शीलमस्येति। पांशुजलवणगुणः। भल्लातकफलान्यपि पाकीनि यथोक्तं– 'भल्लातकानि तीक्ष्णानि पाकीन्यग्निसमानि च। भवन्त्यमृतकल्पानि प्रयुक्तानि यथाविधि॥' इति (च. चि. १.२.१७)

पाचन, व्रणशोधकर।

Suppurating, inflammatory.

पाचनम् (च. सू. २२.१८०

१. अन्नपाचनम्—पचन्तमग्निं प्रतिपक्षक्षपणेन बलदानेन च यत् पाचयति तत् पाचनम्, तच्च वाय्वग्निभूयिष्ठम्। (चक्र.)

२. आमदोषपाचनम्—'पाचनमिति आमदोषपाचनम्' (चक्र., च. चि. ३.१६०)

३. आमपाचनम् —यथा नागरातिविषामुस्तक्वाथः स्यादामपाचनः' इति। (च. चि. १५.९८)

४. विकृतिपाचनम् —यथा प्रतिश्याये 'अपच्यमानस्य हि पाचनार्थं स्वेदो हितोऽम्लैरहिमं च भोज्यम्' इति।

५. ग्रन्थिपाचनम्—'पाकिभिः पाचयित्वा वा पाटयित्वा समुद्धरेत्' (च. चि. २१.१३३); व्रणशोथस्य पाचनम् (सु. सू. ३७.९); अपक्वशल्यस्य पाचनद्रव्यैः पाकविधानम्। (सु. सू.२७.४)

६. पाचनं भस्मादिभिर्व्रणस्य शुष्कीकरणम्, रक्तस्रावनिरोधार्थम्। (सु. सू. १४.३९)

1. Digestive for food 2. Digestive for āmadoṣa 3.Digestive for āma. 4.Maturation of pathos. 5. suppuration.6.Dehydrating wound.

पाचनीयम् (च. सू. २५.४०)

पाचने हितम्, यथा– 'पिप्पलीमूलं दीपनीय-पाचनीयानाहप्रशमनानाम् (अग्र्यम्)' इति।

पाचन के लिए हितकर।

Useful for digestion.

पाण्डुकर्म (सु. चि. १.९४)

कृष्णानां (व्रणानां) पाण्डुकर्मणा सवर्णीकरणम् (ड०), यथा–'दुरूढत्वात्तु कृष्णानां पाण्डुकर्म हितं भवेत्।' इति।

त्वचा में पाण्डुता लाना।

Producing paleness in skin (so as to restore normal colour)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पाण्डुरोगघ्नम् (च. चि. १४.१४७)

पाण्डुरोगं हन्तीति, यथा– 'ग्रहणीपाण्डुरोगघ्नं वातवर्चोऽनुलोमनम्। दीपनं चारुचिघ्नं च दन्त्यरिष्टमिमं विदुः ॥' इति।

पाण्डुरोगनाशक।

Alleviating pāṇḍuroga (anaemia)

पाण्डुरोगप्रशान्तिः (च. चि. १६.६९)

पाण्डुरोगशमन।

Pacifying Pāṇḍuroga.

पाण्डुहरः (च. चि. १६.६६)

पाण्डुरोगं हरतीति, यथा–'तरुजान् ज्वलितान् मूत्रे निर्वाप्यामृद्य चाङ्गुरान्। मातुलुङ्गस्य तत् पूतं पाण्डुशोथहरं पिबेत् ॥' इति।

पाण्डुरोगनाशक।

पाण्ड्वर्तिजित् (च. चि. १६.५१)

पाण्डुरोगहरः।

पाण्डुरोगनाशक।

पाण्ड्वामयनुत् (च. चि. १६.५०)

पाण्डुरोगहरः, यथा– 'पथ्याशतरसे पथ्यावृन्तार्ध-शतकल्कवान्। प्रस्थः सिद्धो घृतात् पेयः स पाण्ड्वामयगुल्मनुत्'। इति।

पाण्डुरोगनाशक

पार्श्वशूलघ्नम् (च. चि. ८.१४४)

पार्श्वशूलं हन्तीति, यथोक्तं यवानीषाडवगुणे– 'हृत्प्लीहपार्श्वशूलघ्नं विबन्धानाहनाशनम्' इति।

पार्श्वशूलनाशक।

Alleviating chest-pain.

पार्श्वशूलनुत् (च. चि. १४.११८)

पार्श्वशूलहरः।

पार्श्वशूलनाशक।

पार्श्वशूलापहः (च. चि. ८.१०२)

पार्श्वशूलमपहन्तीति, यथा– 'श्लोकार्धैर्विहिता-नेतांल्लिह्यान्ना मधुसर्पिषा। कासश्वासापहान् स्वर्यान् पार्श्वशूलापहांस्तथा ॥' इति।

पार्श्वशूलनाशक।

पार्श्वांसशूलघ्नम् (च. चि. .२.९२)

पार्श्वांसयोः शूलं हन्तीति।

पार्श्वांसशूलनाशक।

Alleviating pain in chest and shoulders.

पार्श्वांसशूलनुत् (च. चि. ८.७७)

पार्श्वांसयोः शूलं नुदति हरतीति। यथा–'शतपुष्पा समधुकं कुष्ठं तगरचन्दने। आलेपनं स्यात् सघृतं शिरःपार्श्वांसशूलनुत् ॥' इति।

पार्श्वांसशूलनाशक।

पार्श्वार्तिनुत् (च. क. ७.६४)

पार्श्वशूलहरम्।

पार्श्वशूलनाशक।

पालीपोषणम् (अ. हृ. उ. १८.४१)

पालीं कर्णपालीं पुष्णातीति, यथा– 'कल्केन जीवनीयेन तैलं पयसि पाचितम्। आनूपमांसक्वाथे च पालीपोषणवर्धनम् ॥' इति।

कर्णपाली को पुष्ट करने वाला।

Nourishing the ear-pinnae.

पालीवर्धनम् (अ. हृ. उ. १८.४१)

कर्णपालीवृद्धिकृत्।

कर्णपाली का वर्धन।

Promoting development of ear-pinnae.

पिच्छिलः (च. शा. ६.१०)

विशदविपरीतः श्लेष्मलः परादिगुणविशेषः, यथा श्लेष्मातकः।

लुआबदार। Slimy.

पित्तकरः (च. सू. २७.१५)

पित्तवर्धनः, यथा– 'मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः।' इति।

पित्तवर्धन।

Increasing Pitta.

पित्तकर्षी (च. सि. १.२८)

पित्तानुलोमनः। निरूहकर्म।

पित्त को खींच कर नीचे ले जाने वाला।

Pulling Pitta down.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पित्तकासनिर्बहणम् (च. चि. १८.१०७)

पित्तजकासहरम् ।

पित्तज कास को दूर करने वाला ।

Alleviating cough caused by pitta.

पित्तकासहरम् (च. चि. १८.९५)

पित्तजं कासं हरतीति, यथा—'विदारीक्षुमृणालानां रसान् क्षीरं सितोपलाम्। पिबेद् वा मधुसंयुक्तं पित्तकासहरं परम् ॥' इति ।

पित्तज कास को दूर करने वाला ।

पित्तकृत् (च. सू. २६.६२)

पित्तवर्धकः, यथा—'पित्तकृत् सृष्टविण्मूत्रः पाकोऽम्लः शुक्रनाशनः' इति ।

पित्तवर्धक ।

Increasing pitta.

पित्तकोपनः (च. सू. २६.४३(३))

पित्तं कोपयतीति। अत्युपयुज्यमानलवणरसस्य कर्म ।

पित्तकोपक ।

Aggravating pitta.

पितघ्नः (च. सू. २६.४३(१))

पित्तं हन्ति शमयतीति । मधुररसकर्म ।

पित्तशामक ।

Pacifying pitta.

पित्तनाशिनी (च. चि. १८.१३२)

पित्तं नाशयतीति, यथा—'वाते कफानुबन्धे तु कुर्यात् कफहरीं क्रियाम्। पित्तानुबन्धयोर्वातकफयोः पित्तनाशिनीम् ॥' इति ।

पित्तनाशक ।

Alleviating (vitiated) pitta.

पित्तपाचनाः (सु. उ. ४०.६२)

सामं पित्तं पाचयन्तीति, यथा— 'एतैः श्लोकार्धनिर्दिष्टैः क्वाथाः स्युः पित्तपाचनाः' इति ।

(साम) पित्त का पाचन ।

Digestive for pitta (associated with āma).

पित्तप्रशमनम् (च. सू. ६.४२)

पित्तं प्रशमयतीति, यथा—'तत्रान्नपानं मधुरं लघु शीतं सतिक्तकम्। पित्तप्रशमनं सेव्यं मात्रया सुप्रकांक्षितैः ॥' इति शरदृतुचर्यायाम् ।

पित्तशामक ।

Pacifying pitta.

पित्तरक्ताक्षिरोगघ्नी (च. चि. २६.२६१)

पित्तरक्ताभ्यां जातानक्षिरोगान् हन्तीति, यथा—'धात्रीरसाञ्जनक्षौद्रसर्पिर्भिस्तु रसक्रिया ।
पित्तरक्ताक्षिरोगघ्नी तैमिर्यपटलापहा ॥' इति ।

पित्तरक्तजन्य नेत्ररोग का नाश करने वाली ।

Alleviating disease of eye caused by pitta and rakta.

पित्तरक्ताविरोधि (च. चि. १८.१४३)

पित्तरक्तयोरविरोधि अप्रकोपीति, यथा—'स्तम्भायामेषु महतीं मात्रां वा सर्पिषः पिबेत्। कुर्याद् वा वातरोगघ्नं पित्तरक्ताविरोधि यत् ॥' इति ॥

पित्त और रक्त का अविरोधी ।

Non-antagonist to pitta and rakta.

पित्तरोगविनाशनम् (च. सू. २७.१४९)

पित्तजान् रोगान् विनाशयतीति, यथा बिभीतकगुणे—'स्वरभेदकफोत्क्लेदपित्तरोगविनाशनम्' इति ।

पित्तरोगनाशक ।

Alleviating disorders of pitta.

पित्तलम् (च. सू. २७.४)

पित्तं लाति वर्धयतीति, यथा— 'प्रायः पित्तलमम्लमन्यत्र दाडिमामलकात्' इति ।

पित्तवर्धक ।

Increasing pitta.

पित्तश्लेष्मज्वरापहः (च. चि. ३.२०९)

पित्तश्लेष्मजं ज्वरमपहन्तीति, यथा—'पित्तश्लेष्ममहरस्त्वेष कषायो ह्यानुलोमिकः।
त्रिवृताशर्करायुक्तः पित्तश्लेष्मज्वरापहः ॥' इति ।

पित्तश्लेष्मज ज्वर का नाशक ।

Alleviating fever caused by pitta and kapha.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पित्तश्लेष्मनिबर्हणम् (च. क. ५.९)

पित्तं श्लेष्माणञ्च निवारयतीति, यथा—'पिबेत्तद् वमनं श्रेष्ठं पित्तश्लेष्मनिबर्हणम्' इति।

पित्त और कफ को दूर करने वाला।

Eliminating pitta and kapha (as by emesis).

पित्तातिसारघ्नम् (च. चि. १९.५१)

पित्तजमतिसारं हन्तीति, यथा—'सक्षौद्रातिविषं पिष्ट्वा वत्सकस्य फलत्वचम्। पिबेत् पित्तातिसारघ्नं तण्डुलोदकसंयुतम्॥' इति।

पित्तज अतिसार का नाशक।

Alleviating diarrhoea caused by pitta.

पित्तानुलोमनम् (च. सू. २३.३६)

पित्तमनुलोमयति स्वमार्गे प्रवर्त्तयतीति, यथा—'सक्तवो मदिरा क्षौद्रं शर्करा चेति तर्पणम्। पिबेन् मारुतविण्मूत्रकफपित्तानुलोमनम्॥' इति।

पित्त का अनुलोमन।

Pushing pitta in its passage.

पित्ताभिवर्धनः (च. सू. २६.४३(२))

पित्तमभिवर्धयतीति। अत्युपयुज्यमानाम्लरसस्य कर्म।

पित्तवर्धन।

Increasing pitta.

पित्ताविरोधिनी (सु. सू. ४६.२२३)

पित्तस्याविरोधिनी अप्रकोपणीति।

डल्हणस्तु ईषत् पित्तविरोधिनी, ईषत् पित्तशमनीत्यर्थः इति वक्ति।

पित्त की अविरोधी।

Non-antagonist to pitta.

पिपासाघ्नी (च. सू. २.२४)

पिपासां हन्तीति, तृषाशामक इत्यर्थः। यवागूवर्णने यथा— 'मृद्वीकासारिवालाजपिप्पलीमधुनागरैः। पिपासाघ्नी' इति।

तृष्णाशामक।

Allaying thirst.

पिपासाच्छेदनम् (सु. सू. ४६.४३७)

पिपासाविनाशकम् (ड०)। अनुपानकर्म।

तृष्णानाशक।

Alleviating thirst.

पिपासानाशनम् (च. चि. ३.२३७)

पिपासां तृष्णां नाशयतीति मूलोच्छेदेन, यथा—'सनागरं समृद्वीकं सघृतक्षौद्रशर्करम्। शृतं पयः सखर्जूरं पिपासाज्वरनाशनम्॥' इति।

तृष्णानाशक।

पिपसाशमनाः (च. चि. ४.७४)

पिपासां शमयन्तीति।

तृष्णाशामक।

पिपासाशान्तिः (च. चि. ३.१४५)

पिपासाशमनम्, यथा—'मुस्तपर्पटकोशीरचन्दनोदीच्य- नागरैः। शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये॥' इति।

तृष्णाशमन।

पिल्लापहम् (च. चि. २६.२४९)

पिल्लं तदाख्यं नेत्ररोगमपहन्तीति, यथा—'बस्तमूत्रे त्र्यहं स्थाप्यमेलाचूर्णं सुभावितम्। चूर्णाञ्जनं हि तैमिर्यक्रिमिपिल्लमलापहम्॥' इति।

पिल्लनाशक।

Alleviating pillra, an eye-disease.

पीडनः (च. सू. २६.४३)

व्रणपीडन इति चक्रः।

पीडनो व्रणस्य हृदयस्य वा, वातकारित्वादिति डल्हणः। कषायरसकर्म।

व्रण को दबाने वाला (या हृदयशूल उत्पन्न करने वाला।

Pressing agent for wound or that causing pain in heart.

पीडनम् (सु. सू. २७.४)

'द्रव्याणां पिच्छिलानाम्' इत्यादि मिश्रकोक्तैः द्रव्यैः कृत्वा पीड्यते यत्। (ड)

दबाना। Pressing.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पीनसनाशनः (सु. सू. ४६.८७)

पीनसं नासारोगं नाशयतीति ।

पीनस रोगको नष्ट करने वाला ।

Alleviating chronic coryza.

पीनसहन्ता (सु. सू. ४६.३७)

पीनसस्य हन्ता नाशकः, यथा कुलत्थगुणे– 'सांग्राहिकः पीनसकासहन्ता' इति ।

पीनसरोगनाशक ।

पुंसवनः (च. क. ७.४५)

१. औषधविशेषः– पुमान् सूयतेऽनेनेति, यथा– 'ग्रहणीपाण्डुरोगांश्च हन्युः पुंसवनाश्च ते । कल्याणका इति ख्याताः सर्वेष्वृतेषु यौगिकाः ॥' इति ।

पुंसवन औषध ।

Drug which helps getting male progeny.

२. संस्कारविशेषः ।

A specific ritual.

पुंसवनम् (च. शा. ८.१९)

पुंस्त्वकारकं कर्म । (चक्र.)

Measures used for getting male progeny.

पुंस्त्वघ्नः (च. सू. २७.१७२)

पुंस्त्वं वृषत्वं हन्तीति, यथा–'पुंस्त्वघ्नः कटुरूक्षोष्णो भूस्तृणो वक्त्रशोधनः' इति ।

पुंस्त्वनाशक ।

Destroying virility.

पुंस्त्वनाशनाः (सु. सू. ४६.३२)

पुंस्त्वं नाशयन्तीति, यथा चणकगुणे– 'कफशोणिपित्तघ्नाश्चणकाः पुंस्त्वनाशनाः' इति ।

पुंस्त्वघ्न ।

पुंस्त्ववर्धनम् (सु. चि. २४.५८)

पुंस्त्वं वर्धयतीति ।

पुंस्त्ववर्धन इति च द्वयं स्तुतिवृद्धिप्राप्तये इति डल्हणः (सु. सू. ४६.९२) ।

पुंस्त्वं को बढ़ाने वाला ।

Promoting virility.

पुंस्त्वोपघातकरः (च. वि. १.१७)

पुंस्त्वघ्नः । अतिप्रयुज्यमानस्य क्षारस्य कर्म ।

पुंस्त्वघ्न ।

पुंस्त्वोपघाती (च. सू. २६.४३(३)

पुंस्त्वघ्नः । अतिप्रयुज्यमानलवणरसस्य कर्म । 'क्षारः पुंस्त्वोपघातिनाम् (अग्र्यः)' इति (च. सू. २५.४०) च ।

पुंस्त्वघ्न ।

पुत्रजननः (भा. प्र. चि. ७०.२९-३२)

पुत्रमेव जनयति, न कन्यामिति ।

पुत्र उत्पन्न करने वाला ।

Producing male progeny.

पुनर्नवकरी (च. सू. १३.३४)

शरीरेन्द्रियचेतसां पुनर्नवत्वं करोतीति, निःशेषदोषहरत्वेनेति चक्रः । उत्तममात्रस्नेहगुणः ।

पुनः नवीन कर देने वाली ।

Rejuvenating, renovating.

पुराणम् (च. सू. २७.३०९)

एकवर्षातीतं यवगोधूमादि धान्यम्, यथोक्तं– 'शूकधान्यं शमीधान्यं समातीतं प्रशस्यते । पुराणं प्रायशो रूक्षं प्रायेणा भिनवं गुरु ॥'इति । घृतं तु दशवर्षस्थितं पुराणं मानसरोगोपयोगि 'उग्रगन्धं पुराणं स्याद् दशवर्षस्थितं घृतम्' इति ।

पुराना । Old.

पुरीषजननम् (च. सू. २५.४०)

पुरीषं प्रभूतं जनयतीति, यथा–'यवाः पुरीषजननानाम् (अग्र्यम्)' इति ।

अधिक पुरीष उत्पन्न करने वाला ।

Making the quantity of faeces excessive.

पुरीषभेदनम् (च. सू. २७.१०३)

पुरीषं निचितं पिण्डितं वा भिनत्ति विश्लेषयतीति यथा कटुका ।

सञ्चित या पिण्डित पुरीष को तोड़ना ।

Breaking the faecal mass.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पुरीषभेदी (सु. सू. ४६.३५)

पुरीषं भेत्तुं शीलस्येति। पुरीषभेदनः।

पुरीषभेदन।

पुरीषविरजनीयः (च. सू. ४.८)

पुरीषस्य विरजनं दोषसंबन्धनिरासं करोतीति पुरीषविरजनीयः (चक्रः)। पुरीषविरजनीयो महाकषायो यथा— 'जम्बुशलमकीत्वक्कच्छुरा-मधूकशाल्मलीश्रीवेसृकभृष्टमृत्पयस्योत्पल-तिलकणा इति दशेमानि पुरीषविरजनीयानि भवन्ति' इति।

पुरीष के विकृत वर्ण को दूर करना।

Eliminating the abnormal colour of faeces.

पुरीषसङ्ग्रहणीयः (च. सू. ४.८)

पुरीषं सङ्गृह्णाति स्तभ्नातीति पुरीषसङ्ग्रहणं पुरीषस्तम्भनं तस्मै हितः पुरीषसङ्ग्रहणीयः। पुरीषसङ्ग्रहणीयो महाकषायो यथा— 'प्रियंग्वनन्ताम्रास्थिकट्वङ्गलोध्रमोचरससमङ्गा-धातकीपुष्पपद्मापद्मकेशराणीति दशेमानि पुरीषसङ्ग्रहणीयानि भवन्ति' इति। पुरीषस्तम्भन।

Checking frequency and liquidity of stool, anti-diarrhoeal.

पुरीषस्रंसनम् (च. चि. ८.८८)

रेचनम्।

विरेचन। Purgative.

पुरीषानुलोमनाः (च. चि. ३.१५२)

पुरीषमनुलोमयन्तीति। यवागूकर्म।

पुरीष का अनुलोमन।

Pushing faeces to its course.

पुष्टिः (च. सू. १६.१८)

उपचयः। संशोधनफलम्।

Nourishment, Development.

पुष्टिकरः (च. चि. ११.९२)

पुष्टिमुपचयं करोतीति, यथा— 'एष प्रयोगः पुष्ट्यायुर्बलारोग्यकरः परः' इति नागबला-सेवनगुणे।

पौष्टिक।

Nourishing.

पुष्टिदम् (च. चि. २९.१०२)

पुष्टिमुपचयं ददातीति, पुष्टिकरमित्यर्थः।

पौष्टिक।

Nourishing.

पुष्टिप्रदम् (च. सू. २७.१९४)

पुष्टिमुपचयं प्रकर्षेण ददातीति, पुष्टिकरमिति यावत्, यथा मद्यम्।

पौष्टिक।

पूति (सु. सू. ४५.२०२)

दुर्गन्धम्।

दुर्गन्ध। Foul smell.

पूतिकोष्ठघ्नः (सु. चि. ५.४२)

कोष्ठे दुर्गन्धं हन्तीति, कोष्ठदुर्गन्धनाशन इत्यर्थः यथा गुग्गुलुगुणे' सौगन्ध्यात् पूतिकोष्ठघ्नः' इति।

कोष्ठगत दुर्गन्ध का नाशक।

Removing foul smell from bowels.

पूतिगन्धहा (च. सू. २७.१६९)

शरीरस्य तथा व्यञ्जनार्थं मांसस्य च पूतिगन्धतां हन्ति (चक्रः), यथा—'पित्तकृत् कफवातघ्नः सुरसः पूतिगन्धहा' इति।

दुर्गन्धनाशक।

Removing foul smell.

पूतिगन्धापकर्षणम् (च. चि. ३०.१२५)

दुर्गन्धं निवारयतीति, यथा—'चूर्णं वा सर्वगन्धानां पूतिगन्धापकर्षणम्' इति।

दुर्गन्धनाशक।

पूतिमारुतम् (च. सू. २७.१३८)

पूतिः दुर्गन्धो मारुतोऽपानवायुरनेनेति, यथा—'बिल्वं तु दुर्जरं पक्वं दोषलं पूतिमारुतम्' इति।

अपान वायु को दुर्गन्धित करने वाला।

Making the flatus foetid.

पूयवर्धनः (सु. सू. १९.१७)

व्रणे पूयं वर्धयतीति, यथा—'तक्रान्तो नवधान्यादिर्योऽयं वर्ग उदाहृतः। दोषसंजननो ह्येष विज्ञेयः पूयवर्धनः॥' इति।

पूय बढ़ाने वाला।

Promoting suppuration.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पृथक्त्वम् (च. सू. २६.२९)

पृथक्त्वम् भिन्नत्वम् यथा—'पृथक्त्वं स्यादसंयोगो वैलक्षण्यमनेकता' इति। परादिगुणविशेषः।

पार्थक्य (भिन्नता)।

Separation.

पेलवम् (सु. सू. ४५.२०२)

अच्छम्, अन्ये तरुणमाहुः। (ड०)

स्वच्छ। Clear.

पैच्छिल्यनुत् (च. चि. २६.२१३)

पैच्छिल्यनाशकः।

पैच्छिल्यनाशक।

Removing sliminess.

पौरुषम् (च. चि. २४.६१)

१. पुंस्त्वं वृषत्वमिति यावत् शुक्रमिति चक्रः। मद्यगुणे यथा—'हर्षमूर्जं मुदं पुष्टिमारोग्यं पौरुषं परम्। युक्त्या पीतं करोत्याशु मद्यं सुखमदप्रदम्।' इति।

पुंस्त्व। Virility.

२. अवयवविशेषः। (सु. नि. ३.१९)

Prostate gland.

पौष्टिकम् (च. सू. ५.९९)

पुष्टिप्रदम्।

पौष्टिकी— हरीतकीकर्म। (च. चि. १.१.३०)

पौष्टिक।

प्रकाशकराणि (च. सू. २६.११)

प्रकाशं कुर्वन्तीति।आग्नेयद्रव्यकर्म।

प्रकाशित करने वाले।

Manifesting, to make glowing.

प्रकाशनकरम् (सु. सू. ४१.४(३))

प्रकाशनमभिव्यक्तिः (ड०), तत्करम्। तैजसद्रव्यकर्म।

प्रकाशित करने वाला।

Manifesting, to make glowing.

प्रकृतिगुरूणि (च. सू. ५.५)

प्रकृत्या स्वभावतो गुरूणि तिलमाषादीनि।

प्रकृति से गुरु।

Heavy by nature.

प्रकृतिलघूनि (च. सू. ५.५)

प्रकृत्या स्वभावतो लघूनि शालिषष्टिकादीनि।

प्रकृति से लघु।

Light by nature.

प्रकृतिविघातः (च. वि. ७.१४)

प्रकृतेः कारणस्य श्लेष्मादिरूपस्य विघातः (चक्रः), यथोक्तं क्रिमिरोगचिकित्सिते— 'अपकर्षणमेवादौ क्रिमीणां भेषजं मृतम्। ततो विघातः प्रकृतेर्निदानस्य च वर्जनम्॥' इति।

कारण का नाश।

Destruction of cause.

प्रकृतिस्थता (च. सि. १.४२)

स्वास्थ्यम्।

प्राकृत स्थिति (स्वास्थ्य)।

Normalcy (Health).

प्रकृतिस्थापनम् (च. चि. १.१.३)

प्रकृतौ स्वभावे धातुसाम्यात्मके स्थापनं पुनरानयनमिति। भेषजपर्यायः। उक्तं हि— 'चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम्। प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम्॥ विद्याद्भेषजनामानि' इति।

रोगी को प्राकृत स्थिति में पुनः लाना।

Bringing back to normalcy, restoration.

प्रकृत्यनुवर्तनम् (च. सू. १६.१७)

प्रकृतिः धातुसाम्यं, तस्यानुवर्तनम्। संशोधनफलम्।

धातुसाम्य का बना रहना।

Continuance of equilibrium.

प्रक्लेदनः (सु. सू. ४६.५२०)

आर्द्रभावकरः (ड०), आर्द्रीकरण इत्यर्थः। द्रवकर्म।

प्रक्लेदिन्यः — पिप्पलीकर्म। (च. वि. १.१६)

आर्द्र बनाने वाला।

Moistening.

प्रच्छर्दनम् (च. चि. २६.२६)

वमनम्, यथा— 'आनाहमामप्रभवं जयेत्तु प्रच्छर्दनैलङ्घनपाचनैश्च' इति।

वमन। Vomiting.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्रजास्थापनः (च. सू. ४.८)

प्रजोपघातकं दोषं हत्वा प्रजां स्थापयतीति प्रजास्थापनम् (चक्र.)।

प्रजास्थापनो महाकषायो यथा—'ऐन्द्रीब्राह्मीशतवीर्यासहस्रवीर्याऽमोघाऽव्यथा-शिवारिष्टावाट्यपुष्पीविष्वक्सेनकान्ता इति दशेमानि प्रजास्थापनानि भवन्ति' इति ।

गर्भधारण में सहायक, गर्भस्थापन।

Conception-promoting, foetus-stabilising.

प्रतिभाप्रदम् (च. सू. २७.१९४)

'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' इति रुद्रः (अमरे रामाश्रम्यामुद्धृतः), प्रतिभां प्रददातीति। मद्यकर्म।

प्रतिभादायक।

Inspiring new ideas.

प्रतिविषम् (च. चि. २३.३६)

विषप्रतिषेधकम्, विषान्तरप्रयोगः इति चक्रः यथा—जांगमविषे भौमं, भौमे च जांगममिति।

प्रतिविष (विषघ्न)।

Antidote.

प्रपीडनम् (सु. सू. ३७.११)

मर्मादिसमीपसूक्ष्ममुखव्रणपीडनम्। (ड०)

व्रण को अच्छी तरह दबाना।

Pressing wound firmly.

प्रपुराणम् (च. चि. ५.१६४)

अतिपुराणम्। वर्षद्वयातीतं धान्यं, दशवर्षाधिक-स्थितं घृतञ्च प्रपुराणं कथ्यते।

अत्यन्त पुराना। Too old.

(as cereals of more then two years and ghee of more than ten years).

प्रबद्धमूत्रः (सु. सू. ४६.४१)

अल्पमूत्रः, अत एव प्रमेहिणां हितः। (ड०)

मूत्र को कम करने वाला।

Anti-diuretic.

प्रबोधनम् (अ. हृ. उ. ७.१५)

चैतन्योत्थापनम्, यथाऽपस्मारचिकित्सिते—'अथावृतानां धीचित्तहृत्खानां प्राक् प्रबोधनम्। तीक्ष्णैः कुर्यादपस्मारे कर्मभिर्वमनादिभिः॥' इति।

बेहोशी से जगाना।

Resuscitation.

प्रभाकरम् (सु. सू. ४१.४(३))

प्रभा तेजः (ड०), तत्करोतीति।

प्रभा वर्णप्रकाशिनी दीप्तिरिति चक्रः। (च. सू. २६.११)

तैजसद्रव्यकर्म।

दीप्तिकर।

Promoting glow.

प्रभावः (च. सू. २६.६७)

द्रव्यस्य स्वाभाविकी शक्तिः विशिष्टकर्महेतुः, यथोक्तं वृद्धवाग्भटे—'सर्वातिशायी द्रव्यस्वभावः प्रभावः' लघुवाग्भटे च—'रसादिसाम्ये यत् कर्म विशिष्टं तत् प्रभावजम्' इति।

स्वाभाविक विशिष्ट शक्ति।

Specific potency.

प्रभिन्नविट् (सु. सू. ४६.४५)

पुरीषभेदनः। शिम्बकर्म।

पुरीषभेदन।

Faeces-breaking.

प्रभूतक्रिमिकरः (च. सू. २७.२३८)

क्रिमीन् प्रभूतं करोतीति, यथा गुडकर्मवर्णने—'प्रभूतक्रिमिमज्जासृङ्मेदोमांसकरो गुडः' इति।

क्रिमिवर्धक।

Promoting worms.

प्रभूतमज्जकरः (च. सू. २७.२३८)

मज्जानं प्रभूतं करोतीति।

गुडकर्म।

मज्जावर्धक।

Promoting bone-marrow.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्रभूतमांसकरः (च. सू. २७.२३९).

मांसं प्रभूतं करोतीति। गुडकर्म।

मांसवर्धक।

Promoting muscles.

प्रभूतमेदोकरः (च. सू. २७.२३८)

मेदः प्रभूतं करोतीति। गुडकर्म।

मेदोवर्धक।

Promoting fat.

प्रभूतान्तर्मलः (च. सू. २७.४)

प्रभूतमन्तर्मलं पुरीषं येनेति, यथा माषसूपः।

पुरीष की मात्रा बढ़ाने वाला।

Increasing quantity of faeces.

प्रभूतासृक्करः (च. सू. २७.२३८)

असृक् रक्तं प्रभूतं करोतीति। गुडकर्म।

रक्तवर्धक

Haematinic.

प्रभोत्तमकरम् (च. चि. १.२.३)

प्रभामुत्तमां श्रेष्ठां करोतीति।

रसायनकर्म।

उत्तमकान्तिप्रद।

Providing excellent glow.

प्रमाथि (च. चि. १८.१५७)

तैक्ष्ण्यादौष्ण्याच्च स्रोतोभ्यः दोषं प्रमथ्य यत् च्यावयति तत् प्रमाथि, यथोक्तं—'औष्ण्यात् प्रभाथिभावाच्च स्रोतोभ्यश्च्यावयन्ति ते। कफम्' इति; मद्यं तैक्ष्ण्यौष्ण्यवैशद्यसूक्ष्मत्वात् स्रोतसां मुखम्। प्रमथ्य विवृणोत्याशु (च. चि. ८.१६६); 'तेनास्य दोषसंघातः स्थिरो लीनो विमार्गगः। विषेणाशु प्रमाथित्वादाशु भिन्नः प्रवर्तते॥' इति (च. चि. १३.१८०); हितं प्रतिहते वर्चस्यन्नपानं प्रमाथि च' इति च (च. सू. ७.९)। शार्ङ्गधरोक्तं प्रमाथिलक्षणं यथा—'निजवीर्येण यद् द्रव्यं स्रोतोभ्यो दोषसंचयम्। निरस्यति प्रमाथि स्यात्तद् यथा मरिचं वचा॥ इति।

मथ कर सञ्चित दोषों को निकालना।

Elimination of accumulated doṣas as if by churning.

प्रमेहघ्नी (च. चि. २८.१९५)

प्रमेहं हन्तीति, यथा—'प्रमेहवातमेदोघ्नीमामवाते प्रयोजयेत्' इति।

प्रमेहनाशक।

Anti-diabetic.

प्रयत्नः (च. श. १.७२)

आत्मगुणः, कर्ममूलं, यथोक्तं—'प्रयत्नादि कर्म चेष्टितमुच्यते' इति।

प्रयत्न। Will, effort.

प्रलापः (सु. क. २.७)

अबद्धवाक्त्वम्। विषकर्म।

प्रलाप।

Delirium.

प्रसन्नम् (च. सू. २७.२१७)

निर्दोषम् (चक्र०), निर्मलमित्यर्थः।

स्वच्छ, निर्मल।

Clear, free from impurity.

प्रसवनम् (च. चि. २९.१०९)

प्रसूतिकारकम्(चक्र.), यथा— 'प्रसवनं चैत्ततैलाज्यममृताह्वयम्' इति।

प्रसवकारक।

Inducing parturition.

प्रसादः (च. सू. २७.२३८)

नैर्मल्यम्, स्वच्छता।

स्वच्छता, निर्मलता।

Clarity, freedom from impurity.

प्रसादनम् (सु. सू. ४५.१३२)

निर्मलीकरणम्, कोपप्रशमनं वा। मधुकर्म। क्षीरोत्थनवनीतस्य च (सु. सू. ४५.९३)।

स्वच्छ करना, कोप का शमन।

To make clear (free from impurity), to pacify.

प्रसृष्टविण्मूत्रसमीरणत्वम् (च. सि. १.४१)

पुरीषमूत्रापानवायूनां प्रकर्षेणोत्सर्गः।

Normal ehimination of faeces, urine and wind.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्रसेकशमनम् (सु. चि. २४.२३)

प्रसेकं लालास्रावाधिक्यं शमयतीति । ताम्बूलकर्म ।

लालास्रावशामक ।

Anti-sailagogue.

प्रस्कन्दनम् (च. .चि. ३.२३०)

विरेचनम् (चक्र.), यथा—'मृद्वीकामलकानां वा रसं प्रस्कन्दनं पिबेत्' इति ।

विरेचन । Purgative.

प्रस्तम्भनी (च. चि. १४.२१७)

प्रकर्षेणावरोधिनी ।

रोकने वाली ।

Firmly checking.

प्रस्रंसनम् (च. क. १२.६३)

विरेचनम् ।

विरेचन ।

प्रहर्षः (च. चि. १४.८७)

चित्तप्रफुल्लता ।

अत्यधिक हर्ष ।

Exhilaration.

प्रहर्षकारि (च. चि. ८.१८२)

प्रहर्षं कर्तुं शीलमस्येति ।

प्रहर्षजनक ।

Exhilarating.

प्रहर्षणम् (च. शा. ८.३१)

प्रकर्षेण हर्षयतीति, प्रहर्षकारीत्यर्थः ।

प्रहर्षजनक ।

प्रह्लादकराणि (च. सू. २६.११)

प्रह्लादः शरीरेन्द्रियतर्पणम् (चक्रः), तं कुर्वन्तीति । आप्यद्रव्यकर्म ।

तृप्तिकर ।

Satiating.

प्रह्लादनम् (सु. सू. ४५.८२)

प्रह्लादयतीति । मस्तुगुणः ।

तृप्तिकर ।

प्राग्ल्भ्यप्रदम् (च. सू. २७.१९४)

प्रागल्भ्यं धार्ष्ट्यं प्रददातीति ।

मद्यकर्म ।

प्रगल्भतादायक ।

Providing boldness.

प्राणकराः (च. चि. २४.१८६)

१. प्राणो बलं, तं कुर्वन्तीति, यथा— 'प्राणवर्णकराणां च प्रघर्षाणां च सेवया' इति, 'तेषां प्राणकराः हृद्याः घृतपूराः कफावहाः' इति (सु. सू. ४६.३९३) च ।

बलकर । Strengthening.

२. प्राणो जीवनशक्तिः, तं कुर्वन्तीति, जीवनीया इत्यर्थः, यथा—'ता उपपुज्यमानाः प्राणायुर्बलवीर्योजस्कर्यो भवन्ति' इति । (सु. सू. ६.१५)

जीवनशक्तिवर्धक । Vitaliser.

प्राणघ्नम् (सु. सू. ४०.५)

प्राणान् हन्तीति, मारक इत्यर्थः ।

प्राणघ्नत्वं विषादेः । (ड०)

प्राणघातक ।

Fatal.

प्राणजननः (सु. सू. ४६.३७४)

प्राणो बलं, भारहरणादिशक्तिरिति डल्हणः ।

बलप्रद ।

Promoting strength.

प्राणधारणः (च. सू. २७.२५३)

प्राणं बलं धारयतीति, यथा—'दीपनत्वाल्लघुत्वाच्च मण्डः स्यात् प्राणधारणः' इति । अत्र चक्रः— 'दीपनलघुत्वाभ्यामग्निं यस्मात् करोति तस्माद् (बलकरत्वात्) लङ्घितादीनां प्राणधारण इति ज्ञेयम्' इति ।

प्राणधारण ।

Sustaining strength.

प्राणप्रत्यानयनम् (च. शा. ८.४२)

प्राणं प्रत्यानयतीति ।

प्राण को पुनः लाना ।

Revitalisation.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्राणप्रदानहेतुः (च. सू. २५.४०)

प्राणप्रदाने कारणम्, यथा—

'वायुः प्राणसंज्ञाप्रदानहेतूनाम् (अग्र्यम्)' इति ।

प्राणानयन में कारण ।

(chief) agent in vitalisation.

प्राणवर्धनः (सु. सू. ४६.३७५)

प्राणं बलं वर्धयतीति, यथा— 'सर्वधान्यकृतस्तद्वद् बृंहणः प्राणवर्धनः इति । यूषगुणः ।

बलवर्धन ।

Strength-promoting.

प्राणोपरोधी (च. सू. २५.४०)

प्राणं जीवनशक्तिमुपरुणद्धीति, यथा—

'अयथाबलमारम्भः प्राणोपरोधिनाम् (अग्र्यम्)' इति ।

प्राण का अवरोधक ।

Obstructing vitality.

प्रीणनः (च. सू. २६.४३(१))

पुष्टिदस्तर्पणः । प्रीणाति तर्पयति पुष्णाति चेति, 'प्रीञ् तर्पणे कान्तौ च' इति धातोः । मधुररसकर्म । क्षीरं प्रीणनं (च. सू. १.१०७) । प्रीणयतीति क्षीणान् पुष्णाति, न त्वति बृहत्त्वं करोतीति चक्रः (च. सू. २७.४) ।

पुष्टिप्रद एवं तर्पक ।

Nourishing and satiating.

प्रीतिप्रदाः (सु. चि. २६.३९)

प्रीतिः मनःसुखम् (ड०), तां प्रददतीति । वाजीकरगुणे यथा— 'एते वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः' इति ।

प्रीतिकर ।

Pleasant.

प्रीतिवर्धनम् (सु. सू. ४५.३८)

सुखवर्धन ।

सुख को बढ़ाने वाला ।

Promoting pleasure.

प्रीतिसंयोगवर्धनम् (च. चि. २४.६५)

विषयाणां शब्दादीनां संयोगे प्रीति संयोगं च वर्धयति । (चक्र.)

प्रीति और संयोग को बढ़ाने वाला ।

Promoting pleasure as well ass union,

प्लीहजित् (च. चि. १६.५१)

प्लीहानं वृद्धं जयति निवारयतीति, प्लीहशमन इत्यर्थः ।

प्लीहवृद्धिशामक ।

Alleviating enlargement of spleen.

प्लीहशूलघ्नम् (च. चि. ८.१४४)

प्लीहशूलं हन्तीति ।

प्लीहशूलहर ।

Removing pain in spleen.

प्लीहहरम् (च. चि. १८.१६४)

प्लीहवृद्धिं हरतीति ।

प्लीहवृद्धिशामक ।

प्लीहापहम् (च. चि. १३.८१)

प्लीहवृद्धिमपहन्तीति, यथा—'विडङ्गं चित्रकं शुण्ठीं सघृतां सैन्धवं वचाम् । दग्ध्वा कपाले पयसा गुल्मप्लीहापहं पिबेत् ॥' इति ।

प्लीहवृद्धिशामक ।

प्लीहाभिवृद्धिशमनम् (च. चि. १३.८५)

प्लीहवृद्धिहरम् ।

प्लीहवृद्धिशामक ।

प्लीहोदरहरः (सु. चि. १२.१९)

प्लीहोदरनाशनः, यथा लोहारिष्टगुणे—'प्लीहोदरहरः शीघ्रं विषमज्वरनाशनः' इति ।

प्लीहोदरनाशन ।

Alleviating splenomegaly.

फ

फलविरेचनम् (च. चि. २६.१०२)

फलैः विरेचनम् । फलैः द्राक्षाकाश्मर्यादिभिरिति चक्रः ।

फलों के द्वारा विरेचन ।

Fruity purgative.

ब

बद्धनिस्यन्दः (सु. सू. ४५.१८७)

बद्धमूत्रः (ड०), मूत्रसङ्ग्रहणीय इत्यर्थः ।

मूत्ररोधक ।

Anti-diuretic.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बद्धविण्मूत्रः (च. सू. २६.६१)

पुरीषमूत्रयोः सङ्ग्रहणः। कटुविपाकस्य कर्म।

पुरीष एवं मूत्र को रोकने वाला।

Constipative and autidiuretic.

बद्धाल्पवर्चसः (च. सू. २७.१०)

बद्धोऽल्पश्च पुरीषो भवति यैस्ते। उक्तं शालिगुणे—'शीता रसे विपाके च मधुराश्चाल्पमारुताः। बद्धाल्पवर्चसः स्निग्धाः बृंहणाः शुक्रमूत्रलाः॥' इति।

बंधा और कम पुरीष लाने वाला।

Causing solid and little faeces.

बन्धकराणि (च. सू. २६.११)

बन्धः परस्परयोजनम् (चक्रः), तं कुर्वन्तीति। आप्यद्रव्यकर्म।

बांधने वाला। Binding.

बन्धकारकः (सु. सू. ४६.५२०)

बन्धं योजनं करोतीति, उपचयकारक इति डल्हणः।

सान्द्रगुणस्य कर्म, यथा—'सान्द्रः स्थूलः स्याद् बन्धकारकः' इति।

बन्धकर।

बन्धछेदनः (च. सू. २६.४३(४))

बन्धांश्छिनत्तीति। कटुरसकर्म।

बंन्धनों को काटने वाला।

Cutting the unions.

बन्धविधमनः (च. सू. २६.४३(३))

बन्धं विधमति वियोजयतीति।

लवणरसकर्म।

बन्धनों को पृथक् करने वाला।

Separating the unions.

बलम् (च. सू. १६.१८)

१. शक्त्युपचयलक्षणम् (ड०, सु. सू. १५.२८)। तद्द्विविधं— बाह्यमाभ्यन्तरञ्च, बाह्यं भारहरणादिगम्यं शारीरं मानसञ्चोत्साहः; आभ्यन्तरं पुनः व्याधिक्षमत्वहेतुः। त्रिविधं हेतुभेदेन चरकोक्तं सहजं, कालजं युक्तिकृतञ्च।

शक्ति और वृद्धि। Energy and growth.

२. ओजः —तत् खल्वोजस्तदेव बलमित्युच्यते (सु. सू. १५.१९)।

ओज। Ojas.

बलकरः (च. सू. २६.४३(१))

बलं करोतीति। मधुररसकर्म।

सर्वरसाभ्यासो बलकराणाम् (अग्र्यः) इति (च. सू. २५.४०)।

बलकारक।

Promoting strength.

बलकृत् (च. सि. १.२७)

बलकरः।

बलकारक।

बलक्षपणः (च. सू. २६.४३(४))

बलक्षयकरः। अत्युपयुज्यमानकटुरसकर्म।

बल को क्षीण करने वाला।

Decreasing strength.

बलक्षयकरम् (च. वि. २.७)

बलक्षयं करोतीति। हीनमात्राहारस्य कर्म।

बल को क्षीण करने वाला।

बलघ्नम् (च. सि. ११.८)

बलं हन्तीति, बलनाशकमित्यर्थः।

बलनाशक।

Causing loss of strength.

बलजननः (च. सि. १२.१८(१))

बलं जनयतीति, बलप्रदः।

बलकर।

बलदम् (च. सि. १.३०)

बलं ददातीति।

बलकर।

बलप्रदम् (च. सू. २७.१३९)

बलं प्रकर्षेण ददातीति, यथा—'पक्वमाम्रं जयेद् वायुं मांसशुक्रबलप्रदम्' इति।

बलकर।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बलप्रसादनम् (च. सू. १५.२२)

बलं प्रसादयति स्फुटीकरोतीति, यथा संशोधनगुणे– 'मलापहं रोगहरं बलवर्णप्रसादनम् । पीत्वा संशोधनं सम्यगायुषा युज्येत चिरम् ॥' इति ।

बल को व्यक्त करने वाला ।

Manifesting strength.

बलवत्यः (सु. सू. ६.११)

देहोपचयहेतवः । (ड०)

बलकर ।

बलवर्धनम् (च. सू. १३.१५)

बलं वर्धयतीति, यथा तैलगुणे–'मारुतघ्नं न च श्लेष्मवर्धनं बलवर्धनम् । त्वच्यमुष्णं स्थिरकरं तैलं योनिविशोधनम् ॥' इति । रसायनकर्मापि (च. चि. १.३.३१) ।

बल को बढ़ाने वाला ।

Strength-promoting.

बलविवर्धनः (च. सू. १३.१७)

बलं विशेषेण वर्धयतीति, यथा मज्जगुणे– 'बलशुक्ररसश्लेष्ममेदोमज्जविवर्धनः । मज्जा विशेषतोऽस्थ्नां च बलकृत् स्नेहने हितः ।' इति ।

बल का विशिष्ट वर्धक ।

Specifically strength-promoting.

बलवृद्धिकृत् (च. सि. १.५३)

बलवर्धनः ।

बलवर्धन ।

बलस्थैर्यम् (च. चि. १३.१९४)

बलस्य स्थैर्यं दृढानुबन्धः, यथा–'दोषानुबन्धरक्षार्थं बलस्थैर्यार्थमेव च । प्रयोगापचिताङ्गानां हितं ह्युदरिणां पयः ॥' इति ।

बल की स्थिरता ।

Stability of strength.

बलादानः (च. सू. २६.४३(५))

बलमादत्ते क्षपयतीति । तिक्तरसकर्म ।

बल को घटाने वाला ।

Decreasing strength.

बलानुरक्षी (च. शा. ८.३१)

बलमनुरक्षतीति, निरन्तरं बलरक्षकः ।

बल का रक्षक ।

Protecting strength.

बलापहम् (सु. सू. ४५.११८)

बलमपहन्तीति, यथा– 'कृमिघ्नमिङ्गुदीतैलमीषत् तिक्तं तथा लघु । कुष्ठामयकृमिहरं दृष्टिशुक्रबलापहम् ॥' इति ।

बलनाशक ।

Causing loss of strength.

बलावहम् (सु. सू. ४५.८२)

बलमावहते वर्धयतीति, यथा मस्तुगुणे– 'बलमावहते चित्रं भक्तच्छन्दं करोति च' इति ।

बलवर्धक ।

बलासघ्नम् (सु. सू. ४५.७४)

बलासः कफः, तं हन्तीति, कफनाशक इत्यर्थः ।

कफनाशक ।

Anti-kapha.

बलासवर्धनम् (सु. सू. ४५.७०)

बलासं कफं वर्धयतीति ।

कफवर्धक ।

Increasing kapha.

बलोपरोधः (च. सू. २६.८४)

बलस्योपरोधो व्याघातः । वैरोधिककर्म ।

बल को रोकना ।

Obstructing strength.

बल्यः (च. सू. ४.८)

बलाय हितो बल्यः । बल्यो महाकषायो यथा– 'ऐन्द्रषभ्यतिरसर्व्यप्रोक्तापयस्याश्वगन्धास्थिरा-रोहिणीबलातिबला इति दशेमानि बल्यानि भवन्ति' इति ।

बलकर ।

Strength-promoting.

बस्तिरुजापहा (च. सू. २७.१७२)

बस्तेः' रुजां शूलमपहन्तीति, यथा–'खराह्वा कफवातघ्नी बस्तिरोगरुजापहा' इति ।

बस्तिशूलहर ।

Relieving renal and vesicular colic.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बस्तिरोगनुत् (च. सू. २७.१८३)

बस्तिरोगनाशकः ।

बस्तिरोगनाशक ।

Alleviating diseases of kidney and urinary bladder.

बस्तिरोगापहा (च. सू. २७.१७२)

बस्तिरोगमपहन्तीति, बस्तिरोगहरी ।

बस्तिरोगनाशक ।

बहलम् (च. सू. २२.१३)

घनम् (चक्रः) ।

ठोस । Solid.

बहुः (च. वि. ८.९८)

अतिशयितवृत्तिः, वातगुणः ।

बहुत । profuse.

बहुकर्मकृत् (च. क. १२.४७)

बहूनि कर्माणि करोतीति, यथा—'सुभावितं ह्यल्पमपि द्रव्यं स्याद् बहुकर्मकृत्' इति ।

बहुत कर्म करने वाला ।

Exerting many actions.

बहुता (च. सू. ९.७)

प्राचुर्यम्, द्रव्यगुणः । चक्रोऽत्र वक्ति— 'बहुता भेषजगुणः, अल्पं हि भेषजं गुणवदप्यविद्यमानमिव, असाधकत्वात् ।' इति ।

अधिकता ।

Abundance.

बहुपुरीषः (च. सू. २७.१५)

बहुमात्रं पुरीषमनेनेति ।

अधिक पुरीष लाने वाला ।

Producing faeces in large quantity.

बहुमलः (च. सू. २७.२४)

बहुमात्रं मलं पुरीषमनेनेति, बहुपुरीष इत्यर्थः, यथा— 'बल्यो बहुमलः पुंस्त्वं माषः शीघ्रं ददाति च' इति ।

बहुत पुरीष लाने वाला ।

बहुमूत्रः (च. सू. २७.१५)

प्रभूतमूत्रतां करोतीति ।

अधिक मूत्र लाने वाला ।

Diuretic.

बहुवर्चाः (सु. सू. ४६.४१)

बहुपुरीषः ।

बहुवातः (सु. सू. ४६.४१)

प्रभूतं वातं करोतीति । वातोऽत्र कुक्षिवातोऽभिप्रेतः (ड०), यथोक्तं— 'रूक्षः शीतोऽगुरुः स्वादुर्बहुवातशकृद्यवः' इति (च. सू. २७.१९) ।

अधिक वायु (गैस) बनाने वाला ।

Wind-forming.

बहुशकृत् (च. सू. २७.१९)

बहुपुरीषः । यवकर्म ।

बहुत पुरीष लाने वाला ।

बहुशुक्रम् (सु. सू. ४६.२९९)

प्रभूतशुक्रकरम्, यथा विदार्यादिकन्दगुणे- रक्तपित्तहराण्याहुः शीतानि मधुराणि च । गुरूणि बहुशुक्राणि स्तन्यवृद्धिकराणि च ॥' इति ।

अधिक शुक्र उत्पन्न करने वाला ।

Producing profuse semen.

बहूष्मा (च. सू. २७.१५)

प्रभूतोष्मजननः ।

अधिक ऊष्मा उत्पन्न करने वाला ।

Generating heat in high degree.

बिम्बिशिनाशनः (अ. हृ. चि. ९.२८)

बिम्बिशिं प्रवाहिकां नाशयतीति, प्रवाहिकाघ्नः (अ. द.) ।

प्रवाहिकानाशन ।

Anti-dysenteric.

बीजपोषणः (अ. हृ. सू. १.४८)

शुक्रवृद्धिहेतुः । (अ. द.)

शुक्रवर्धक ।

Promoting semen.

बुद्धिः (च. शा. १.७२)

आत्मलिङ्गम्, निश्चयात्मकज्ञानम्, यथोक्तं चरके— 'जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।' इति, सांख्यकारिकायाञ्च 'साध्यवासाया बुद्धिः' इति ।

बुद्धि । Intellect.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बुद्धिकरम् (च. चि. ९.४८)

बुद्धिं करोतीति, यथा महापैशाचिकघृतवर्णने– 'बुद्धिस्मृतिकरं चैव बालानां चाङ्गवर्धनम्' इति।

बुद्धिवर्धक।

Intellect-promoting.

बुद्धिप्रदा (च. चि. १.१.३०)

बुद्धिं प्रकर्षेण ददातीति। हरीतकीकर्म। अत्र 'बुद्धिस्मृतिप्रदत्वमभिधायापि स्मृतिबुद्धिप्रमोहहरत्वाभिधानं तत्र विशिष्टशक्त्युपदर्शनार्थमिति चक्रः।

बुद्धिवर्धक।

बुद्धिप्रबोधनम् (च. चि. ९.३२)

बुद्धिं प्रबोधयति जागरयतीति।

बुद्धि को जाग्रत करने वाला।

Awakening intellect.

बुद्धिप्रसादः (च. सू. १६.१८)

बुद्धिनैर्मल्यम्।

बुद्धि की शुद्धता।

Purity of intellect.

बुद्धिबलकरः (च. सू. २७.३१४)

बुद्धिं सबलां करोतीति।

बुद्धिबल को बढाने वाला।

Strengthening intellect.

बुद्धिविवर्धनम् (च. सू. २७.२३१)

बुद्धिं विशेषेण वर्धयतीति।

घृतकर्म।

बुद्धिवर्धक।

बुद्धिसंवेजनम् (च. चि. ९.२९)

बुद्धिसंक्षोभणम्।

बुद्धि को क्षोभित करना।

Irritating intellect, shock-producing.

बुद्ध्युपघातकरम् (च. वि. २.७)

बुद्धेरुपघातं करोतीति।

बुद्धिनाशक।

Causing loss of intellect.

बृंहणम् (च. सू. २२.१०)

शरीरबृहत्त्वकरम्, यथोक्तं– बृहत्त्वं यच्छरीरस्य जनयेत्तच्च बृंहणम्' इति।

शरीर को बढाने वाला।

Promoting body-weight.

बृंहणात्मकः (च. सू. २७.११९)

बृंहण स्वभावः, यथा मुञ्जातकगुणे –'बल्यः शीतो गुरुः स्निग्धस्तर्पणो बृंहणात्मकः' इति।

बृंहण स्वभाव का।

Heaving nature of body-promoting.

बृंहणीयः (च. सू. ४.८)

बृंहणे हितः। बृंहणीयो महाकषायो यथा– 'क्षीरिणीराजक्षवकाश्वगन्धाकाकोलीक्षीरकाकोलीवाट्यायनीभद्रौदनीभारद्वाजीपयस्यर्ष्यगन्धा इति दशेमानि बृंहणीयानि भवन्ति' इति।

बृंहण के लिए हितकर।

Beneficial for body-promoting.

बृहत्त्वम् (च. सू. २२.१०)

शरीरगौरवं भारायामदृष्ट्या। बृंहणकर्मेदम्।

बृहत्त्व। Largeness, heaviness.

बृहत्त्वकृत् (अ. हृ. सू. ६.६६)

बृंहत्त्वं करोतीति, बृंहण इत्यर्थः।

बृंहण।

बृहत्त्वजननम् (च. सू. २७.८१)

बृहंणम्।

बृंहण।

बोधनम् (च. चि. २४.६३)

स्फूर्तिप्रदम्।

स्फूर्तिजनन।

Awakening, energizing.

ब्रघ्नहरः (च. सि. १२.१८(१३)

ब्रघ्नं तदाख्यं रोगं हरतीति।

ब्रध्ननाशक।

Alleviating bradhna (inguinal hernia)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

भ

भक्तच्छन्दकरम् (सु. सू. ४५.८२)

भक्तच्छन्दं भक्ताभिलाषमन्नरुचिं करोतीति, रोचनमित्यर्थः।

रुचिकर। Relishing.

भक्तपाचनः (च. सू. २७.१६७)

भक्तमन्नं पाचयतीति, पाचन इत्यर्थः, यथा—'जम्बीरः कफवातघ्नः क्रिमिघ्नो भक्तपाचनः' इति।

पाचन।

भक्तप्ररोचनम् (च. सू. २७.१५६)

रुचिवर्धकम्, यथा नागरङ्गगुणे—'मधुरं किञ्चिदम्लञ्च हृद्यं भक्तप्ररोचनम्' इति।

रुचिवर्धक।

Promoting relish.

भक्ताभिलाषकरम् (सु. सू. ४५.७७)

रोचनम्।

रुचिकर।

भगन्दरविनाशनम् (सु. चि. ८.४६)

भगन्दरं तदाख्यं रोगं विनाशयतीति।

भगन्दरनाशक।

Alleviating fistula-in-ano.

भग्नप्रसाधकम् (सु. चि. ३.५५)

भग्नस्य प्रसाधकं संयोजकम्।

भग्न को जोड़ने वाला।

Union-promoting in fracture.

भग्नप्रसाधनम् (सु. चि. ३.६८)

भग्नसंयोजनम्।

भग्नसंयोजक।

भग्नसाधकः (सु. सू. ३८.४७)

भग्नयोजकः, यथा—'न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः' इति।

भग्नसंयोजक।

भयापहम् (च. चि. २४.६२)

भयमपहन्ति निवारयतीति। मद्यकर्म।

भय को दूर करने वाला।

Allaying fear.

भागशो ग्रहः (च. सू. २६.३३)

विभक्तत्वेन ग्रहणम् (चक्र०), द्रव्यस्यांशेषु विभाजनम्, यथा एककर्षद्रव्यस्य मात्राद्वये विभाजनम् (द्र. सू.)।

अंशों में विभाजन।

Division in parts.

भिन्नवर्चः (च. सू. २७.८९)

पुरीषभेदनम्, यथा—'भिन्नवर्चस्तु वास्तुकम्' इति।

पुरीषभेदन।

Breaking faeces (purgative).

भिन्नवातः (च. सू. २७.१८६)

पिण्डितवातभेदनः।

सञ्चित वात का भेदन।

Breaking accumulated wind.

भिन्नशकृत् (च. सू. २५.१०८)

पुरीषभेदनः।

पुरीषभेदन।

भुक्तपाचनम् (च. चि. १५.८६)

भुक्तमन्नं पाचयतीति, यथा दशमूलाद्यघृते—'करोत्यग्निं बलं वर्णं वातघ्नं भुक्तपाचनम्' इति।

पाचन।

भुक्तशोषणः (च. सू. २६.४३(४)

भुक्तमन्नं शोषयतीति। कटुरसकर्म।

आहार का शोषण करने वाला।

Promoting absorption of ingested food.

भुक्तापकर्षणः (च. सू. २६.४३(२)

भुक्तमपकर्षयति सारयतीति (चक्रः), अनुलोमन इत्यर्थः।

भुक्त अन्न को नीचे ले जाना।

Carrying ingested food downwards.

भुक्तावसादनम् (च. सू. २७.३२५)

भुक्तमन्नमवसादयति अधो गमयतीति।

अनुपानकर्म।

भुक्त अन्न को नीचे ले जाने वाला।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

भृशोष्णतीक्ष्णम् (च. नि. २.४०

अतिशयेनोष्णं तीक्ष्णञ्च द्रव्यम्, रक्तपिते निमित्तम् ।

अतिशय उष्ण और तीक्ष्ण ।

Intensely hot and sharp.

भेदनम् (च. वि. १.१७)

१. पिण्डित मलगुल्मादीनां विदारणम् यथा प्रियनिघण्टौ — 'भिनत्ति पिण्डितं गुल्मं पुरीषनिचयन्तथा । शक्त्या तद् भेदनं ज्ञेयं चित्रकः कटुका यथा ॥' इति ।

क्षारो भेदनः लवणोऽपि ।

पिण्डित मल आदि का विदारण ।

Breaking faceal mass, abdominal lump etc.

२. शस्त्रकर्मविशेषः — वृद्धिपत्रादिभिः शस्त्रैः स्फोटनम् (ड०)

विदारण । Incision.

भेदनीयः (च. सू. ४.८)

भेदने हितो भेदनीयः । भेदनीयो महाकषायो यथा— 'सुवहार्कोरुबुकाग्निमुखीचित्राचित्रकचिरबिल्व-शङ्खिनीशकुलादनीस्वर्णक्षीरिण्य इति दशेमानि भेदनीयानि भवन्ति' इति ।

भेदन के लिए हितकर ।

Useful for breaking.

भौतिकम् (च. शा. ८.२७)

भूतोपघाताय हितं वचागुग्गुल्वादि । (चक्रः)

भूतों के निवारण में उपयोगी ।

Useful in disorders caused by bhūtas (evil spirits or micro-organisms).

भ्रमकरः (च. सू. २६.४३(४)

भ्रमं करोति भ्रमयतीति । कटुरसकर्म ।

भ्रमकारक ।

Causing vertigo.

भ्रमकृत् (सु. चि. २४.८६)

भ्रमं करोतीति ।

भ्रमकर ।

भ्रमघ्नाः (च. चि. २२.३५)

भ्रमं घ्नन्तीति, भ्रमनाशका इत्यर्थः ।

भ्रमनाशक ।

Alleviating vertigo.

म

मङ्गल्यम् (च. सू. २७.२२५)

मङ्गलाय हितं मङ्गल्यम्, 'मगि सर्पणे' धातोः, शरीरवृद्धिकरं शुभञ्च ।

यथोक्तं—'पाकेऽम्लमुष्णं वातघ्नं मङ्गल्यं बृंहणं दधि' इति ।

शरीरवृद्धिकर और शुभ ।

Promoting development and auspicious.

मज्जाभिवर्धनः (च. सू. २६.४३(१)

मज्जानमभितो वर्धयतीति । मधुररसकर्म ।

मज्जावर्धक ।

Promoting bone-marrow.

मज्जविवर्धनः (च. सू. १३.१७)

मज्जानं विशेषेण वर्धयतीति ।

मज्जगुणः ।

मज्जावर्धक ।

मण्डलनुत् (च. चि. ७.८८)

मण्डलं तदाख्यं कुष्ठं नुदति विक्षिपति विनाशयतीति । मण्डलकुष्ठनाशकः ।

मण्डलकुष्ठनाशक ।

Alleviating maṇḍala kuṣṭha, a type of leprosy.

मण्डलकुष्ठविनाशनम् (च. चि. ७.९०)

मण्डलकुष्ठं विनाशयतीति ।

मण्डलकुष्ठनाशक ।

मतिकरम् (सु. सू. ४५.९६)

मतिः बुद्धिः, अनागतज्ञानमिति डल्हणः, तां करोतीति । घृतकर्म ।

बुद्धिवर्धक ।

Promoting intellect.

मदकृत् (सु. सू. ४५.१८९)

मदकारी, मादकः इति । मदकारिलक्षणं शार्ङ्गधरोक्तं यथा—'बुद्धिं लुम्पति यद् द्रव्यं मदकारि तदुच्यते । तमोगुणप्रधानं च यथा मद्यं सुरादिकम् ॥' इति ।

मदकारक (मादक) ।

Narcotic, intoxicating.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मदघ्नः (च. सू. २७.९४)
मदं हन्ति नाशयतीति, यथा—मदघ्नस्तण्डुलीयकः, मदघ्नी चाप्युपोदिका इति ।
मदनाशक ।
Anti-narcotic.

मदजननम् (च. चि. २४.३४)
मदोत्पत्तिः, यथा 'सत्त्वं तदाश्रयं चाशु संक्षोभ्य जनयेन् मदम्' इति ।
मदोत्पत्ति ।
Appearance of narcosis.

मदविनाशिनी (च. सू. २.३३)
मदं विनाशयतीति, यथा यवागूप्रकरणे 'उपोदिकादधिभ्यां तु सिद्धा मदविनाशिनी' इति ।
मदनाशक ।

मदापहः (सु. सू. ४६.२५८)
मदो बुद्धिलोपः, विषमद्यशोणितोत्थो विकार इति डल्हणः, तमपहन्तीति ।
मदनाशक ।

मदावहम् (सु. सू. ४५.२०४)
हर्षकारि (ड०) । मद्यगुणः ।
मादक, हर्षदायक ।
Intoxicating, exhilarating.

मद्यविकारनुत् (च. सू. २३.३८)
मद्यविकारनाशकः, मद्यजनितं चेतोविकारं नाशयतीत्यर्थः ।
मद्यजन्य विकारों का नाशक ।
Alleviating adverse effects of wine.

मधुरः (च. वि. १.४)
मधु ओजः राति ददाति इति मधुरः, किञ्च, मधुना रीयते उत्पाद्यते यः स मधुरः रसविशेषः, सलिलपृथिव्यात्मकः ।
मधुर, मीठा । Sweet.

मधुरप्रभावाणि (च. वि. ८.१३८)
मधुरकार्यकारीणि । मधुररसस्य यानि धातुवर्धनादिकर्माणि तानि कुर्वन्तीत्यर्थः ।
मधुरकार्यकारी ।
Exerting effects of sweet.

मधुरप्रायाणि (च. वि. ८.१३८)
उत्कृष्टमधुररसानि । (चक्र०))
प्रायः मधुर ।
Almost sweet.

मधुरविपाकाः (च. वि. १.१६)
विपाके मधुराः यथा पिप्पल्यः ।
विपाक में मधुर ।
Sweet in final transformation.

मनउपघातकरम् (च. वि. २.७)
मनस उपघातं करोतीति ।
मनोविकारजनक ।
Causing mental disorders.

मनःप्रबोधनम् (च. चि. ९.३२)
मनः प्रबोधयति जागरयतीति ।
मन को जाग्रत करने वाला ।
Awakening mind.

मनःप्रसादः (च. सू. १६.१८)
मनसो नैर्मल्यम् ।
मन की स्वच्छता, प्रसन्नता ।
Clarity and happiness of mind.

मनःप्रसादकरम् (च. सि. १.३०)
मनसो नैर्मल्यं करोतीति ।
मन को स्वच्छ (प्रसन्न) करने वाला ।
Causing clarity and happiness of mind.

मनःसंप्रबोधनम् (च. चि. १०.१४)
मनः सम्यक् प्रबोधयति जागरयतीति ।
मन को जाग्रत करना ।
Awakening mind.

मनःसंवेजनम् (च. चि. ९.२९)
सेंवजनमिति उद्वेजनम् (चक्र०), मनस उद्वेगकरमित्यर्थः ।
मन को क्षुब्ध करना ।
Causing mental shock.

मनस्करम् (च. सू. १.१०७)
मनः प्रशस्तं करोतीति । 'एतदेव च नित्यस्येह मनसः करणं यन् मनसः प्रकर्षबुद्धध्यत्कर्षादिगुणकरणम्' इति चक्रः । दुग्धकर्म ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मानसिक विकास करने वाला।

Promoting mental development.

मनोज्ञम् (सु. सू. ४६.३५८)

हृद्यं, रुचिकरम्।

सुन्दर, रुचिकर।

Pleasing, relishing.

मनोबलप्रदः (च. सू. २५.५०)

मनसो बलं प्रददातीति, मनोबलकरः।

मनोबलकर।

Promoting mental power.

मनोबोधनः (च. सू. २६.४३(२)

मनो बोधयति जागरयतीति। अम्लरसकर्म।

मन को जागृत करना।

Awakening mind.

मनोऽर्थः (च. सू. ८.१३)

मनसो विषयः, यथोक्तं—'मनसस्तु चिन्त्यमर्थः, पुनश्च—'चिन्त्यं विचार्यमूह्यं च ध्येयं संकल्प्यमेव च। यत् किञ्चिन् मनसो ज्ञेयं तत् सर्वं ह्यर्थसंज्ञकम्॥' इति।

मन के विषय।

Objects of mind.

मनोव्याकुलनानि (सु. शा. ४.४७)

मनःक्षोभणानि, यथा— 'निद्रातियोगे वमनं हितं संशोधनानि च। लंघनं रक्तमोक्षश्च मनोव्याकुलनानि च।' इति।

मन को क्षुब्ध करने वाले।

Mind-agitating.

मन्दः (च. शा. ६.१०)

तीक्ष्णविपरीतः, गुर्वादिगुणविशेषः।

मन्द। Dull.

मन्दवीर्यत्वम् (च. वि. ८.१२७)

देशकालाद्युपहतत्वाद् वीर्यस्य मन्दत्वम्, यथाऽतिशीतोपहतत्वादुष्णस्वभावस्य संशोधनभेषजस्य मन्दवीर्यत्वम्।

वीर्य की मन्दता।

Diminished degree of potency.

मन्याशूलघ्नम् (सु. चि. २४.२९)

मन्याशूलं हन्तीति।

मन्याशूलनाशक।

Alleviating pain in neck sides.

मलपाचनः (अ. हृ. सू. १५.४०)

मलभूतमामं मलं सामं वा पाचयतीति।

आम या साम मल का पाचन।

Digestant for mala (āma) or faeces associated with āma.)

मलपातनम् (भा. नि. १.४८)

मलं पुरीषं बहिः पातयति निष्कासयतीति। भेदनं केवलं विबन्धं भिनत्ति, इदं तु मलं पातयतीति विशेषः, यथोक्तं भावमिश्रेण शुण्ठीप्रसङ्गे—'विबन्धभेदनी या तु सा कथं ग्राहिणी भवेत्। शक्तिर्विबन्धभेदे स्याद् यतो न मलपातने॥' इति।

मल को बाहर निकालना।

Expelling faeces.

मलपित्तनुत् (सु. चि. ५.४१)

मलभूतं मलसहितञ्च पित्तं नुदति बहिः क्षिपतीति। गुग्गुलुकर्म।

मलभूत पित्त को बाहर निकालने वाला।

Expelling bile with faeces.

मलभेदनम् (सु. सू. ४५.८२)

मलं मूत्र पूरीषम् (ड०), तस्य भेदनं सारकमित्यर्थः।

मल को निकालने वाला।

Eliminating urine and facces

मलशोधनम् (च. चि. ६.१६)

मलानां शोधनं बहिष्करणम्।

मलशोधन।

Elimination of impurities.

मलसङ्गहरम् (च. सि. १.७)

मलसङ्गो विबन्धः, तं हरतीति, विबन्धनाशक इत्यर्थः।

विबन्धनाशक।

Removing constipation.

मलानुलोमनः (सु. सू. ४६.३८८)

मलं मूत्रं पुरीषञ्च, तयोरनुलोमनः स्वमार्गे प्रवर्त्तकः। मलानुलोमनी यथा—'मलानुलोमनी पथ्या पेया दीपनपाचनी' इति पेयागुणे (अ. हृ. सू. ६.२९)।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मल का अनुलोमन ।

Pushing urine and faeces in their passages.

मलापहम् (च. सू. १५.२२)

मलमपहन्तीति । संशोधनफलम् ।

कटुरसोऽपि मलापहः (च. सू. २६.४३(४)) ।

मल का नाशक ।

Removing impurities.

मसृणम् (च. चि. २.४.२४)

स्निग्धम्, 'चिक्कणं मसृणं स्निग्धम्' इत्यमरः ।

चिकना । Smooth.

महाभिष्यन्दि (सु. सू. ४५.५५)

दोषधातुमलस्रोतसामतिशयक्लेदप्राप्तिजनकं (तद्द्वारा स्रोतोरोधकञ्च) महाभिष्यन्दि । (ड०)

अत्यन्त अभिष्यन्दी ।

Producing excessive secretion in channels and thereby obstructing them.

मांसकरम् (च. चि. ८.१५५)

मांसवर्धकम्, यथा—'मांसेनोपचिताङ्गानां मांसं मांसकरं परम्' इति ।

मांसवर्धक ।

Promoting muscles.

मांसकोषणः (च. सू. २६.४३(३)

मांसं कुष्णाति शृणातीति, मांसगालन इत्यर्थः । अत्युपयुज्यमानलवणरसकर्म ।

मांस को गलाने वाला ।

Causing decay of muscles.

मांसदार्ढ्यकृत् (सु. सू. ४६.९८)

मांसस्य दार्ढ्यं स्थैर्यं करोतीति, मांसस्थिरीकरण इत्यर्थः ।

मांस को दृढ़ करने वाला ।

Producing firmness in muscles.

मांसदोषघ्नम् (च. सू. २७.१४८)

मांसगतविकारनाशकम्, यथा—'रसासृङ्मांसमेदोजान् दोषान् हन्ति बिभीतकम्' इति ।

मांसगत विकारों का नाशक ।

Alleviating disorders of muscles.

मांसप्रदम् (च. चि. ११.५२)

मांसवर्धकम् ।

मांसवर्धक ।

Promoting muscles.

मांसलः (च. सू. २७.६५)

मांसं लाति वर्धयतीति, मांसवर्धकः, यथा—'बर्ही हिततमो बल्यो वातघ्नो मांसशुक्रलः' इति ।

मांसवर्धक ।

मांसवर्धनम् (च. चि. ११.३०)

मांसं वर्धयतीति ।

मांसवर्धक ।

मांसविदहनः (च. सू. २६.४३(३))

मांसं विदहति दग्धमिव करोतीति । अत्युपयुज्यमानाम्लरसकर्म ।

मांस को विदग्ध करने वाला ।

Affecting muscles as if burnt.

मांसविलेखनः (च. सू. २६.४३(४))

मांसं विलिखति कर्षति कृशीकरोतीति ।

कटुरसकर्म ।

मांस को कृश करने वाला ।

Decreasing muscular tissue.

मांसविवर्धनम् (च. चि. १८.१३४)

मांसं विशेषेण वर्धयतीति, यथोक्तं—'कासमात्ययिकं मत्वा क्षतजं त्वरया जयेत् । मधुरैर्जीवनीयैश्च बलमांसविवर्धनैः ॥' इति ।

मांसवर्धक ।

मांसस्थिरीकरणः (च. सू. २६.४३(५)

मांसं स्थिरं दृढं करोतीति । तिक्तरसकर्म ।

मांस को दृढ बनाने वाला ।

Providing firmness to muscles.

मांसापहम् (च. सू. २१.२७)

मांसक्षयकरम् ।

मांस को क्षीण करने वाला ।

Decreasing muscles.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मांसाभिवर्धनः (च. सू. २६.४३(१)

मांसधातुमभिवर्धयतीति। मधुररसकर्म।

मांसवर्धन।

मात्रागुरु (च. सू. ६.९)

मुद्गादि प्रकृतिलघ्वपि द्रव्यमतिमात्रया गृहीतं यद्गुरु चिरपाकि भवति तन्मात्रागुरु।

मात्रा से गुरु।

Heavy by quantity.

मादनम् (सु. सू. ४०.५)

मत्तताकरणं, इदं मदिरादीनां कर्म। (ड०)

मदजनक।

Intoxicating.

मान्द्यम् (च. सू. ७.४९)

मन्दवेगेन गतिः।

मन्दता। Dullness.

मारुतकोपनम् (च. क. १२.६)

मारुतं वातं कोपयतीति, वातकोपनमित्यर्थः।

वातकोपन।

Aggravating vāta.

मारुतघ्नम् (च. सू. २.१४)

मारुतं वातं हन्तीति, वातशामकमित्यर्थः।

वातशांमक।

Pacifying vāta.

मारुतरोगघ्नम् (च. चि. १८.१३९)

मारुतरोगान् वातविकारान् हन्तीति, वातव्याधिनाशनमित्यर्थः।

वातव्याधिनाशक।

Alleviating vātika disorders.

मारुतानुलोमनम् (च. चि. २४.११९)

वातानुलोमनम्, यथा—'स्रोतोविबन्धनुन्मद्यं मारुतस्यानुलोमनम्' इति। मद्यकर्म।

वातानुलोमन।

Carminative.

मारुतापहम् (च. चि. २८.१८१)

वातशामकम्।

वातशामक।

मार्गविवरणः (च. सू. २६.४३(४)

मार्गान् स्रोतांसि विवृणोत्यवरोधमपाकृत्य स्फुटीकरोतीति। कटुरसकर्म।

स्रोतःशोधक।

Reopens the channels by removing obstruction.

मार्गविशोधनः (च. सू. २६.४३(३)

मार्गान् स्रोतांसि विशोधयतीति।

लवणरसकर्म।

स्रोतःशोधक।

मार्गशुद्धिः (च. चि. ५.६०)

मार्गस्य स्रोतसः शुद्धिः नैर्मल्यं निरवरोधत्वञ्च, यथोक्तं— 'प्रयोज्या मार्गशुद्ध्यर्थमरिष्टाः कफगुल्मिनाम्' इति।

स्रोतःशुद्धि।

Purity of channels e.g. clarity and freedom from obstruction.

मार्गोपरोधः (च. सू. २६.८२)

स्रोतोरोधः।

स्रोतों में रुकावट।

Obstruction in channels.

मार्दवकरम् (च. चि. २५.४२)

मार्दवं करोत्यापादयतीति, यथोक्तं व्रणचिकित्सायां — 'काठिन्यमार्दवकरे धूपनालेपने शुभे' इति।

आप्यद्रव्यकर्म (च. सू. २६.११)

मृदुताजनक।

Softening.

मार्दवकारकम् (च. चि. ३०.१२३)

मार्दवकरम्, यथा—'स्तब्धानां कर्कशानां च कार्यं मार्दवकारकम्' इति योनिव्यापदि।

मार्दवजनक।

मुखकान्तिकारकम् (सु. चि. २४.२२)

मुखकान्तिं करोतीति।

मुखकान्तिकर।

Promoting lustre on face.

मुखजाड्यनाशनम् (च. चि. २६.२१३)

मुखे जाड्यं स्तब्धतां रसानभिज्ञत्वं च नाशयतीति।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मुख की जडता को दूर करने वाला।

Alleviating stiffness and loss of taste in mouth.

मुखजाड्यहरम् (सु. चि. २४.१४)

मुखे जाड्यं हरतीति। स्नेहगण्डूषकर्म।

मुखजाड्यनाशन।

मुखदौर्गन्ध्यहरम् (सु. चि. २४.१४)

मुखे दौर्गन्ध्यं हरतीति।

मुख की दुर्गन्ध को दूर करने वाला।

Removing foul smell of mouth.

मुखधावनाः (च. चि. २६.२०५)

मुखं धावयन्ति शोधयन्तीति, यथोक्तं मुखरोगे– 'सक्षौद्रास्त्रिफलापाठामृद्वीकाजातिपल्लवाः। कषायतिक्तकाः शीता क्वाथाश्च मुखधावनाः॥' इति।

मुखशोधन।

Mouth-washing.

मुखपाकनाशनम् (च. चि. २६.२१३)

मुखपाकहरम्।

मुखपाक को दूर करने वाला।

Alleviating stomatitis.

मुखबोधनम् (च. सू. २६.७५)

मुखं बोधयति रसान् प्रति जागरयतीति।

अम्लरसलिङ्गम्।

मुख (रसनेन्द्रिय) को जाग्रत करने वाला।

Awakening mouth (gustatory sense organ).

मुखप्रह्लादकारकः (च. सू. २६.७८)

मुखे प्रह्लादं करोतीति। तिक्तरसलिङ्गम्। अत्र शिवदासो वक्ति– तिक्तो मुखस्य प्रह्लादकारकोऽरुचिहन्तृत्वात्।

मुख में आह्लाद करने वाला।

Creating pleasant feeling in mouth.

मुखप्रियम् (च. सू. २७.१११)

स्वादु, यथा–'मुखप्रियं च रूक्षं च मूत्रलं त्रपुसं त्वति' इति।

स्वादिष्ट। Palatable.

मुखरोगापहा (च. चि. २६.२०२)

मुखरोगनाशक।

Alleviating diseases of mouth.

मुखवैरस्यनाशनम् (च. चि. ८.१३४)

मुखे वैरस्यं विकृतरसत्वं विगतरसत्वं वा नाशयतीति।

मुखवैरस्यनाशक

Removing abnormal taste in mouth.

मुखवैरस्यहरम् (सु. चि. २४.१४)

मुखवैरस्यनाशनम्।

मुखवैरस्यनाशन।

मुखवैशद्यकरम् (च. चि. ३.१५८)

मुखे पैच्छिल्यमाहृत्य वैशद्यं करोतीति।

मुखवैशद्यकारक।

Causing non-sliminess in mouth.

मुखवैशद्यकारकः (च. सू. २६.७८)

मुखवैशद्यकरः। तिक्तरसलिङ्गम्।

मुखवैशद्यकर।

मुखशोधनः (च. सू. २७.१६७)

मुखं शोधयतीति।

मुखशोधक।

Cleansing and refreshing mouth.

मुखशोफहरम् (सु. चि. २४.१४)

मुखशोफनाशनम्।

मुखशोफनाशक।

Alleviating swelling in mouth.

मुखशोषकरः (च. सू. २६.४३(५))

मुखे शोषं करोतीति। अत्युपयुज्यमानतिक्तरसकर्म।

मुखशोष उत्पन्न करने वाला।

Causing dryness of mouth.

मुखशोषकारकः (च. सू. २६.७८)

मुखशोषकरः। तिक्तरसलिङ्गम्।

मुखशोषकर।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मुखसौगन्ध्यकारकम् (सु. चि. २४.२२)

मुखे सौगन्ध्यं करोतीति । ताम्बूलकर्म ।

मुख को सुगन्धित करने वाला ।

Mouth-refreshing.

मुखसौष्ठवकारकरम् (सु. चि. २४.२२)

मुखे सौष्ठवं सौन्दर्यं करोतीति । ताम्बूलकर्म ।

मुख को सुन्दर बनाने वाला ।

Making mouth charming.

मुखादिसंस्रावी (च. सू. २६.७७)

मुखादिषु स्रावं वर्धयतीति । कटुरसलिङ्गम् ।

मुख आदि में स्राव को बढाने वाला ।

Stimulating secretion in mouth etc.

मुखास्रावः (च. सू. २६.७५)

लालास्रावः । अम्लरसलिङ्गम् ।

लालास्राव ।

Salivary secretion.

मुद् (च. चि. २४.६१)

प्रमोदः । मद्यकर्म ।

Pleasure.

मूढवातानुलोमनम् (च. चि. ८.४७)

मूढमपथे स्थितं वातमनुलोमयतीति ।

मूढ वात का अनुलोमक ।

Carminative for confounded vāta.

मूत्रकर्षी (च. सि. १.२८)

मूत्रं स्वमार्गे कर्षति गमयतीति ।

मूत्र को अपने मार्ग में खींचना ।

Drawing urine in its passage.

मूत्रकृच्छ्रघ्नम् (च. सू. २३.३७)

मूत्रकृच्छ्रहरम्, यथा– 'फाणितं सक्तवः सर्पिर्दधिमण्डोऽम्लकाञ्जिकम् । तर्पणं मूत्रकृच्छ्रघ्नमुदावर्तहरं पिबेत् ॥' इति ।

मूत्रकृच्छ्रनाशक ।

Removing dysuria.

मूत्रकृत् (अ. कृ. सू. ६.६१)

मूत्रलः ।

मूत्रविरेचनीय ।

Diuretic.

मूत्रजननम् (च. सू. २५.४०)

मूत्रलम् । 'इक्षुर्मूत्रजननानाम्(अग्र्यः)' इति ।

मूत्रविरेचनीय ।

मूत्रदोषनिवारणः (सु. उ. ५८.३६)

मूत्रस्य दोषान् विकारान् निवारयतीति, यथा– 'मुस्ताभयादेवदारुमूर्वाणां मधुकस्य च । पिबेदक्षसमं कल्कं मूत्रदोषनिवारणम् ॥' इति ।

मूत्रगत दोषों को दूर करने वाला ।

Eliminating disorders of urine.

मूत्रदोषहरः (सु. सू. ३८.४४)

मूत्रस्य दोषान् विकारान् हरति नाशयतीति, यथा– 'परुषकादिरित्येष गणोऽनिलविनाशनः । मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः ॥' इति ।

मूत्रदोषनिवारण ।

मूत्रमार्गविशोधनम् (सु. चि. ७.३५)

मूत्रमार्गस्य विशोधनं तद्गतदोषनिवारणम्, यथा– 'मूत्रमार्गविशोधनार्थं चास्मै गुडसौहित्यं वितरेत्' इति ।

मूत्रमार्ग का शोधक ।

Cleansing the urinary passage.

मूत्ररुजापहम् (सु. उ. ५८.३५)

मूत्रस्य रुजां कृच्छ्रत्वमपहन्तीति ।

मूत्रकृच्छ्रनाशक ।

मूत्रलाः (च. सू. २७.१०)

मूत्रं लान्तीति । शालिकर्म ।

मूत्रलानीति मूत्रवैरेचनिकानि (चक्र. च. चि. २८.१९७) ।

मूत्रविरेचनीय ।

मूत्रविबन्धघ्नम् (सु. सू. ४६.१८४)

मूत्रस्य विबन्धमवरोधं हन्तीति, यथा काश्मर्यफलगुणे– 'हृद्यं मूत्रविबन्धघ्नं पित्तासृग्वातनाशनम्' इति, अन्यच्च 'त्रिकण्टकबलाव्याघ्रीगुडनागरसाधितम् । वर्चोमूत्रविबन्धघ्नं शोफज्वरहरं पयः ॥' इति (च. चि. ३.२३६) ।

मूत्रविबन्ध को दूर करने वाला ।

Removing obstruction in urination.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मूत्रविरजनीयः (च. सू. ४.२)

मूत्रस्य विरजने दोषजन्यवर्णविकारनिरासे हितमिति। मूत्रविरजनीयो महाकषायो यथा— 'पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्र-मधुकप्रियङ्गुधातकीपुष्पाणीति दशेमानि मूत्रविरजनीयानि भवन्ति' इति।

मूत्र के विकृत वर्णों को दूर करना।

Removing abnormal colours in urine.

मूत्रविरेचनीयः (च. सू. ४.८)

मूत्रस्य विरेचनं करोतीति मूत्रविरेचनीयः (चक्र०)। मूत्रविरेचनीयो महाकषायो यथा— 'वृक्षादनीश्वदंष्ट्रा-वसुकवशिरपाषाणभेददर्भकुशकाशगुन्द्रेत्कटमूला-नीति दशेमानि मूत्रविरेचनीयानि भवन्ति' इति।

मूत्रल।

Diuretic.

मूत्रविवर्धनाः (सु. सू. ४६.१८)

मूत्रल।

मूत्रवैरेचनिकम् (चक्र. च. चि. २८.१९७)

मूत्रलम्।

मूत्रल।

मूत्रशोधनम् (सु०उ०४०.१०७)

मूत्रं शोधयति विरेचयतीति, मूत्रविरेचनमित्यर्थः। मूत्रशोधनैः तृणपञ्चमूलीपाषाणभेदगोक्षुरप्रभृतिभिरिति डल्हणः।

मूत्रल।

मूत्रसंहतीकरणाः (सु. सू. ४६.७९)

मूत्रं संहतं सान्द्रं कुर्वन्तीति।

मूत्र को सान्द्र करने वाले।

Making urine concentrated.

मूत्रसङ्ग्रहणीयः (च. सू. ४.८)

मूत्रस्य सङ्ग्रहणे स्तम्भने हित इति। मूत्रसङ्ग्रहणीयो महाकषायो यथा— 'जम्ब्वाम्रप्लक्ष-वटकपीतनोदुम्बराश्वत्थभल्लातकाश्मन्तकसोम-वल्का इति दशेमानि मूत्रसङ्ग्रहणीयानि भवन्ति' इति।

मूत्र को रोकने वाले।

Anti-diuretic.

मूत्रानुलोमनम् (च. सू. २३.३६)

मूत्रं स्वमार्गे गमयतीति, यथोक्तं यवागूगुणे— 'वातमूत्रपुरीषाणां दोषाणां चानुलोमनाः' इति (च. चि. ३.१५२)।

मूत्र का अनुलोमन।

Pushing urine in its passage.

मूत्रापकर्षणाः (उ. सू. सू. ४६.१८)

मूत्रमपकर्षयन्ति क्षपयन्तीति, प्रमेहिणां हिता इत्यर्थः।

मूत्रसंग्रहणीय।

मूत्रापहम् (सु. सू. ४५.७३)

मूत्रस्तम्भनम्।

मूत्रसंग्रहणीय।

मूर्च्छाकरः (च. सू. २६.४३(३))

मूर्च्छां संज्ञानाशं करोति मूर्च्छयतीति। अत्युपयुज्यमानलवणरसस्य कर्म।

मूर्च्छा करने वाला।

Causing fainting.

मूर्च्छाकृत् (सु. चि. २४.८६)

मूर्च्छाकरः।

मूर्च्छाकर।

मूर्च्छाघ्नाः (च. चि. २२.३५)

मूर्च्छां हन्तीति, मूर्च्छाहरा इत्यर्थः।

मूर्च्छानाशक।

Removing fainting.

मूर्च्छाप्रशमनः (च. सू. २६.४३(१))

मूर्च्छां प्रशमयतीति। मधुररसस्य कर्म।

मूर्च्छानाशक।

मूर्त्तम् (च. नि. ४.९)

घनम्।

ठोस। Solid.

मूर्धविरेचनम् (च. सू. ५.२७)

शिरोविरेचनम्।

शिरोविरेचन। Head-evacuation.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मूलविरेचनम् (च. चि. २६.१०२)

त्रिवृन्मूलादिभिर्विरेचनम्। (चक्र०)

मूल द्वारा विरेचन।

Rooty purgatives.

मृजाप्रदः (सु. चि. २४.३०)

मृजा शुद्धप्रभा (ड०), तां प्रददातीति। अभ्यङ्गगुणः।

शुद्धिकर एवं कान्तिवर्धक।

Cleansing and promoting glow.

मृतसञ्जीवनम् (च. चि. २३.३६)

विषेण मृतस्यामृत इव सञ्जीवनकरं भेषजम्। (चक्रः)

अचेतन को पुनः चैतन्य में ले आना।

Resuscitation.

मृत्स्नम् (च. चि. १.३.५६)

मसृणम्, चिक्कणमित्यर्थः।

चिकना। Smooth.

मृदुः (च. शा. ६.१०)

कठिनविपरीतः, गुर्वादिगुण विशेषः।

मृदु। Soft.

मृदुकरम् (च. सू. १३.१४)

मृदु देहं करोतीति, देहे मार्दवकरमित्यर्थः। घृतकर्म।

मार्दवकारक।

Softening.

मृदुत्वकरणम् (सु. चि. १.८६)

मार्दवकरणम्।

मार्दवकारक।

मृदुविरेचनम् (च. सू. २५.४०)

'चतुरङ्गुलो मृदुविरेचनानाम् (अग्र्यः)' इति।

मृदुविरेचन।

Laxative.

मेदोघ्नः (च. सू. २७.२०)

मेदो हन्तीति, मेदोहर इत्यर्थः, यथा—'मेदःक्रिमिविषघ्नश्च बल्यो वेणुयवो मतः।' इति।

मेद को घटाने वाला।

Anti-obesity (decreasing fat).

मेदोदोषघ्नम् (च. सू. २७.१४८)

मेदोजन्यान् दोषान् विकारान् हन्तीति, यथा—'रसासृङ्मांसमेदोजान् दोषान् हन्ति बिभीतकम्' इति।

मेदोदोष का नाशक।

Alleviating disorders caused by obesity.

मेदोऽपहम् (सु. सू. ४५.१४१)

मेद अपहन्तीति, मेदोहरमिति यावत्, यथा मधुगुणे — 'मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनम्' इति।

मेदोहर।

मेदोऽभिवर्धनः (च. सू. २६.४३(१)

मेदो अभितो वर्धयतीति। मधुररसकर्म।

मेदोवर्धक।

Promoting fat.

मेदोविलापनम् (सु. चि. २४.५१)

मेदसो विलापनं द्रवीकरणम्। (ड०)

मेद को विलीन करना।

Liquifying fat (and thereby leading to its destruction.)

मेदोविवर्धनम् (च. सू. २७.२३१)

मेदो विशेषेण वर्धयतीति।

घृतकर्म।

मेदोवर्धक।

मेदोविशोषी (सु. सू. ४६.३७०)

मेदो विशोषयतीति, यथा—'पटोलनिम्बयूषौ तु कफमेदोविशोषणौ' इति।

मेद का शोषक।

Absorting fat.

मेदोहरम् (च. सू. २१.२९)

मेदोनाशकम्।

मेदोनाशक।

Anti-obesity.

मेधाकरम् (च. चि. १.३.२७)

मेधां बुद्धिं करोतीति, यथा ऐन्द्ररसायने—'जराव्याधिप्रशमनं स्मृतिमेधाकरं परम्' इति।

मेधावर्धक।

Intellect-promoting.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मेधाकृत् (च. सि. १.२७)

मेधाकरः ।

मेधाकर ।

मेधावर्धनम् (च. सू. २७.२८७)

मेधां वर्धयतीति ।

मेधाकर ।

मेधाविवर्धनाः (सु. शा. १०.७०)

मेधां विशेषेण वर्धयन्तीति ।

मेधाकर ।

मेधाहिततमम् (च. सू. २७.६४)

मेधायै अतिशयेन हितम् । प्रकृष्टमेधाकरमित्यर्थः ।

मेधा के लिए उत्तम हितकर ।

Most wholesome for intellect.

मेध्यम् (च. चि. १.३.३१)

मेधायै हितम्, मेधावर्धकमित्यर्थः, यथा—'मेध्यानि चैतानि रसायनानि मेध्या विशेषेण च शङ्खपुष्पी' इति ।

मेधाकर ।

Intellect-promoting.

मेहापहः (सु. चि. १३.३४)

मेहमपहन्तीति, मेहनाशकः, यथा—'महावीर्यस्तुवरकः कुष्ठमेहापहः परः' इति ।

प्रमेहनाशक ।

Alleviating prameha.

मोहः (सु. क. २.७)

वैचित्त्यम् । विषकर्म ।

चित्तविकार ।

mental confusion.

मोहकरः (च. सू. २६.४३(४)

मोहं वैचित्यं कुरुते इति चक्रः ।

कटुरसकर्म ।

मोहजनक ।

Causing mental confusion.

य

युक्तिः (च. सू. २६.२९)

१. बहुहेतूनां संगतो योगोऽर्थक्रियाकरः युक्तिः, इमां संगतिं पश्यन्ती बुद्धिरपि युक्तिः । (द्र. सू. ३.७) परादिगुणविशेषः ।

युक्ति । Rationale.

२. हेतुपरकसंगतिमाधृत्य देहदोषाद्यपेक्षया भेषजस्य योजना, यथोक्तं—'मात्राकालाश्रया युक्तिः सिद्धिर्युक्तौ प्रतिष्ठिता । तिष्ठत्युपरि युक्तिज्ञो द्रव्यज्ञानवतां सदा' ॥इति ।

सयुक्तिक योजना ।

Rational application.

योगवाहि (च. सू. २७.२४९)

येन द्रव्येण युज्यते तस्यैव कर्म करोति, समानानुकारिद्रव्यप्रबोधितशक्तित्वात् ।

डल्हणोऽपि— 'यादृग्द्रव्येण संयोज्यन्ते तादृक् कर्म कुर्वन्तीति योगवाहित्वम् (सु. सू. ४५.१४२) । योगानुसारं वहति स्वकर्म करोतीति ।

योगवाही ।

Synergistic, potentiating.

योग्यत्वम् (च. सू. ९.७)

तत्र प्रतिकर्त्तव्ये व्याधौ योग्यत्वम् (चक्र०), कार्मुकत्वमित्यर्थः ।

प्रयोगयोग्यता ।

Effectivity, applicability.

योनिदोषहरः (सु. सू. ३८.५५)

योनिदोषान् योनिव्यापदो हरति नाशयतीति, यथा—'एष मुस्तादिको नाम्ना गणः श्लेष्मनिषूदनः । योनिदोषहरः स्तन्यशोधनः पाचनस्तथा ॥' इति ।

योनिदोषनाशक ।

Alleviating disorders of female genital tract.

योनिदोषहृत् (सु. सू. ३८.४९)

योनिव्यापदां नाशनः ।

योनिदोषहरः ।

योनिरोगनिबर्हणः (अ. हृ. सू. १५.४२)

योनिरोगनिवारणः ।

योनिदोषहरः ।

योनिविशोधनम् (सु. सू. ४५.११४)

योनिं विशोधयतीति । एरण्डतैलगुणः ।

योनि का शोधन करने वाला ।

Cleansing vagina (and uterus)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

योनिशूलप्रशमनम् (सु. सू. ४५.११२)

योनिशूलहरः। तैलगुणः।

योनिशूल का शामक।

Alleviating pain in vagina and uterus.

योन्यामयघ्नः (अ. हृ. सू. १५.४०)

योनिव्यापदां नाशनः।

योनिरोगनाशक।

योन्यास्रावविनाशनम् (च. चि. ३०.८३)

योनेः स्रावावधिक्यं विनाशयतीति।

योनिस्राव को दूर करने वाला।

Checking vaginal discharge.

र

रक्षोघ्नम् (च. शा. ८.४७)

१. रक्षांसि हन्तीति, गुग्गुल्वादि। (चक्र०)

राक्षसों का नाशक।

Destroying rakṣas (micro–organisms or evil spirits).

रक्तदूषणः (च. सू. २६.४३(२))

रक्तं दूषयतीति। अत्युपयुज्यमानाम्लरसकर्म।

रक्त को दूषित करने वाला।

Blood-vitiating.

रक्तनाशनाः (सु. उ. ४०.१२०)

रक्तस्तम्भनाः, यथा रक्तातिसारचिकित्सायां– 'प्रियालशाल्मलीप्लक्षशल्लकीतिनिशत्वचः। क्षीरे विमृदिताः पीताः सक्षौद्राः रक्तनाशनाः॥' इति।

रक्तस्राव को रोकने वाला।

Haemostatic.

रक्तनिबर्हणम् (च. चि. ४.८१)

रक्तस्रावनिवारणम्।

रक्तस्रावरोधक।

Haemostatic.

रक्तपित्तघ्नम् (च. चि. ३०.४२)

रक्तपित्तं हन्तीति, यथा योनिव्यापच्चिकित्सिते– 'कारयेद् रक्तपित्तघ्नं शीतं पित्तकृतासु च' इति।

रक्तपित्तशामक।

Pacifying rakta-pitta.

रक्तपित्तनिबर्हणाः (च. सू. २७.७२)

रक्तपित्तशमनाः।

Pacifying raktapitta.

रक्तपित्तनुत् (च. चि. ४.५४)

रक्तपित्तशमनम्।

रक्तपित्तशामक।

Alleviating raktapitta.

रक्तपित्तप्रकोपणम् (च. सू. २७.२९२)

रक्तपित्तं प्रकोपयतीति, यथा अतसीतैलगुणे–'उष्णवीर्यं हितं वाते रक्तपित्तप्रकोपणम्' इति।

रक्तपित्त का प्रकोपक।

Aggravating raktapitta.

रक्तपित्तप्रदूषणम् (च. सू. २७.२९०)

रक्तपित्तं प्रदूषयति कोपयतीति, यथा–'कटूष्णं सार्षपं तैलं रक्तपित्तप्रदूषणम्' इति।

रक्तपित्त को दूषित करने वाला।

Vitiating raktapitta.

रक्तपित्तप्रशमनः (च. सू. २६.४३)

रक्तपित्तं प्रकर्षेण शमयतीति। कषायरसकर्म।

रक्तपित्त का शामक।

Pacifying raktapitta.

रक्तपित्तप्रसादकृत् (सु. सू. १८.६)

रक्तस्य पित्तस्य च प्रसादं नैर्मल्यं कोपनिग्रसञ्च करोतीति।

रक्तपित्त का प्रसादन।

Restoring normalcy of raktapitta.

रक्तपित्तशमनाः (च. चि. ४.७४)

रक्तपित्तं शमयन्तीति।

रक्तपित्तशामक।

Pacifying raktapitta.

रक्तपित्तहरः (च. चि. ५.१७७)

रक्तपित्तशमनः, यथा रक्तगुल्मचिकित्सते–' रक्तपित्तहरं क्षारं लेहयेन् मधुसर्पिषा' इति।

रक्तपित्तशामक।

रक्तपित्ताभिवर्धनः (सु. सू. २०.२३)

रक्तपित्तमभितो वर्धयतीति। पूर्ववातगुणः।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रक्तपित्तवर्धक ।

Increasing rakta-pitta.

रक्तप्रदूषणः (सु. सू. ४६.३७७)

रक्तं प्रकर्षेण दूषयतीति, यथा–'तक्राम्लः पित्तकृत् प्रोक्तो विषरक्तप्रदूषणः ॥' इति ।

रक्तदूषक ।

Blood-vitiating.

रक्तप्रसादनम् (अ. हृ. सू. २७.४७)

दुष्टरक्तस्य प्रसादनं कलुषतामपाकृत्य तस्य प्रसन्नत्वोपपादनम् (अ. द.), वैमल्यापादनमित्यर्थः । यथा–'दुष्टं रक्तमनुद्रिक्तमेवमेव प्रसादयेत्' इति ।

रकतशोधन ।

Blood-purification.

रक्तलाः (सु. सू. ४६.३९४)

रक्तं लान्ति वर्धयन्तीति, रक्तवर्धका इत्यर्थः, यथा घृतपूरगुणे–'वातपित्तहरा वृष्या गुरवो रक्तमांसलाः' इति ।

रक्तवर्धक ।

Haematinic.

रक्तवर्धनः (च. सू. २६.४३(३))

रक्तं वर्धयति दूषणत्वेनेति, रक्तभारवर्धक इत्यर्थः । लवणरसकर्म ।

रक्तवर्धक ।

Hypertensive.

रक्तविभेदनम् (सु. उ. ४२.२०)

पिण्डितं रक्तं विशेषेण भिनत्तीति, यथा रक्तगुल्मे ।

पिण्डित रक्त को तोड़ने वाला ।

Breaking blood clot.

रक्तशुद्धिकरम् (भै. र., पृ. १०००)

रक्तशोधनम् ।

रक्तशोधक ।

Blood-purifier.

रक्तसंग्रहणम् (च. चि. १४.१८०)

रक्तस्तम्भनम्, यथा रक्तार्शसि–'तस्मात् स्रुते दुष्टरक्ते रक्तसंग्रहणं मतम्' इति ।

रक्तस्तम्भन ।

Haemostasis.

रक्तसांग्राहिकम् (च. सू. २५.४०)

रक्तस्तम्भनम्, यथा– 'काश्मर्यफलं रक्तसांग्राहिक-रक्तपित्तप्रशमनानाम्' इति ।

रक्तस्तम्भन ।

Haemostatic.

रक्तस्तम्भनी (अ. हृ. सू. २७.४८)

रक्तस्रावरोधिनी, यथा–'रक्त त्वतिष्ठति क्षिप्रं स्तम्भनीमाचरेत् क्रियाम्' इति ।

रक्तस्राव को रोकने वाली ।

Haemostatic.

रक्तस्थापनम् (च. चि. ३०.८७)

रक्तस्तम्भनम्, यथा रक्तयोनिचिकित्सिते– 'रक्तयोन्यामसृग्वर्णैरनुबन्धं समीक्ष्य च । ततः कुर्याद् यथादोषं रक्तस्थापनमौषधम् ॥' इति ।

रक्तस्तम्भन ।

Haemostatic.

रक्तातियोगप्रशमनम् (च. चि. ४.८०)

रक्तस्यातियोगमतिस्रावं प्रशमयति निरुणद्धीति, यथा– 'उशीरपद्मोत्पलचन्दनानां पक्वस्य लोष्टस्य च यः प्रसादः । सशर्करः क्षौद्रयुतः सुशीतो रक्तातियोगप्रशमाय देयः ॥'इति ।

तीव्र रक्तस्तम्भन ।

Checking excessive haemorrhage.

रक्तापहम् (च. चि. १४.१८७)

रक्तं रक्तस्रावमपहन्ति शमयतीति, रक्तस्तम्भनमित्यर्थः ।

रक्तस्तम्भन ।

रक्तोपशान्तिः (च. चि. १९.७९)

रक्तस्रावशमनम्, यथा रक्तातिसारचिकित्सिते–'घृतं यवागूमण्डेन कुटजस्य फलैः शृतम् । पेयं, तस्यानु पातव्या पेया रक्तोपशान्तये ॥' इति ।

रक्तस्राव का शमन ।

Checking haemorrhage.

रजःप्रदोषघ्नम् (च. चि. २८.१४३)

रजोदोषान् आर्तवविकारान् प्रकर्षेण हन्तीति ।

आर्त्तवविकारनाशक ।

Alleviating menstrual disorders.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रतिः (च. चि. २४.६५)

रतिकारकमित्यर्थः। (चक्र०)

रतिप्रद।

Pleasant.

रसः (च. सू. १.६४)

१. रस्यत आस्वाद्यत इति रसः, जिह्वाग्राह्यो वैशेषिको गुणः, यथोक्तं— 'रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा। निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः॥ वाग्भटोऽपि— 'रसाः स्वाद्वाम्ललवणतिक्तोषणकषायकाः। षड् द्रव्यमाश्रितास्ते तु यथापूर्वं बलावहाः॥' इति। (अ. हृ. सू. १.१४)

रस। Taste.

२. आद्यधातुः — 'अहरहर्गच्छतीत्यतो रसः। (सु. सू. १४.१३)

The first dhātu.

३. कल्पनाविशेषः —'यन्त्रनिष्पीडिताद्द्रव्याद्रसः स्वरस उच्यते' इति। (अ. सू. ४.७)

Juice.

४. पारदः —'रसनात् सर्वधातूनां रस इत्यभिधीयते' (र. र. १.७६)।

पारद। Mercury.

५. वीर्यम् —'ज्ञात्वा गतरसान्येतान्यौषधान्यथ तं रसम्' (च. चि. १.१.६६) इत्यत्र 'गतरसानि' इति 'गतवीर्याणि, यथाऽमरः—'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः।' इति।

शक्ति। Potency.

६. विषम् — 'दोषागान्तुजमृत्युभ्यो रसमन्त्रविशारदौ (सु. सू. ३४.७) इत्यत्र 'रसविशारदः' विषविशारद इति। (ड०)

विष। Poison.

७. सारः— रसायनमित्यत्र रसः सारभूतमोजः, तस्यायनं

लाभोपायो रसायनमिति (च. चि. १.१.८)। अत्रौजःपदेन तत्पुरोवर्त्तिसमस्तधातवो गृह्यन्ते।

ओज। Ojas

८. रसम् — बोलम्, गन्धद्रव्यविशेषः (ध. नि. ३.६२)।

रसदोषघ्नम् (च. सू. २७.१४८)

रसविकारान् हन्ति। बिभीतककर्म।

रसविकारनाशक।

Alleviating disorders of rasa.

रसनाप्रतिघातः (च. सू. २६.७८)

रसनायाः जिह्वा प्रतिघातः आघात इव, यथा तिक्तरसलक्षणे— 'प्रतिहन्ति निपाते यो रसनं स्वदते न च' इति।

जिह्वा पर आघात करने वाला।

Injuring gustatory sense.

रसनासंवेजनः (च. सू. २६.७७)

रसनां जिह्वां संवेजयेत् क्षोभयेदिति। कटुरसलिङ्गम्।

जिह्वा का क्षोभक।

Tongue-irritating.

रसविरुद्धम् (सु. सू. २०.१६)

अम्ललवणौ रसतः (विरुद्धौ)।

रस में विरुद्ध।

Antagonist in rasa.

रसविवर्धनः (च. सू. १३.१७)

रसं विशेषेण वर्धयतीति। मज्जकर्म।

रसवर्धक।

Promoting rasa.

रसविशेषाभिज्ञत्वकरम् (च. चि. ३.१५९)

रसविशेषाणामभिज्ञत्वं करोतीति। दन्तधावनकर्म।

रसविशेषों का परिज्ञान कराने वाला।

Helping prception of specific rasas.

रसादिशोषणः (च. सू. २६.४३(५))

रसादीन् शोषयतीति। तिक्तरसकर्म।

रसादि का शोषक।

Absorbing rasa etc.

रसाभिवर्धनः (च. सू. २६.४३(१))

रसं रसधातुमभितो वर्धयतीति। मधुररसकर्म।

रसवर्धक।

Promoting rasa.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रसायनम् (च. चि. १.१.८)

रसादीनां शस्तानामयनं लाभोपायो रसायनम्, यथोक्तं—'लाभोपायो हि शस्तानां रसादीनां रसायनम्' इति। अथवा, रसः धातुसारभूतभोजः, तस्यायनं लाभोपायो रसायनमिति।

रसायन।

Rasāyana (Promotive therapy)

रागनिवारणाः (च. चि. २९.१३५)

रागं त्वचि रक्तिमानं निवारयति हन्तीति।

लालिमा को दूर करने वाला।

Removing redness (in skin).

रागनुत् (च. चि. २९.१३३)

रागं रक्तिमानं नाशयतीति।

लालिमानाशक।

रुक्प्रशमनः (च. चि. २५.७९)

रुजं पीडां प्रशमयतीति, यथा—'उपनाहश्च कर्तव्यः सतिलो मुद्गपायसः। रुग्दाहयोः प्रशमनो व्रणेष्वेष विधिर्हितः॥' इति।

वेदनाशामक।

Analgesic.

रुङ्निवारणः (च. चि. २९.१३५)

पीडाशामकः।

वेदनाशामक।

Analgesic.

रुचिः (च. चि. १९.२३)

अन्नपानेष्वाहरणेच्छा, स्वादश्च।

रुचि।

Desire for food, relish.

रुचिकरम् (च. चि. ३.१४५)

रुचिं करोतीति।

रुचिकारक।

रुचिकारकम् (सु. उ. ३९.१०४)

मुखोपनीतस्याहारस्य रसनेन्द्रियस्येच्छा (स्वादश्च) रुचिः (ड०), तां करोतीति।

रुचिकारक।

Promoting desire for food and relish.

रुचिदम् (अ. कृ. सू. ४.३०)

रुचिकरम्।

रुचिकारक।

रुचिप्रदम् (च. सू. २७.१३७)

रुचिकरम्, यथा कपित्थगुणे—'मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्' इति।

रुचिकारक।

रुचिष्या (सु. सू. ४६.२९५)

रुचिकरी, यथा— 'सिण्डाकी वातला सार्द्रा रुचिष्याऽनलदीपनी' इति।

रुचिकारक।

रुच्यम् (सु. सू. ४५.२०४)

रुचये हितं रुच्यं, रुचिकरमित्यर्थः।

रुचिकारक।

रुजाघ्नम् (च. चि. २६.२५)

पीडाहरम्।

वेदनाशामक।

रुजापहम् (सु. चि. ८.१२)

रुजां पीडामपहन्ति हरतीति।

वेदनाशामक।

रुधिराभिवर्धनः (च. सू. २६.४३(१))

रक्तवर्धकः। मधुररसकर्म।

Haematinic.

रूक्षः (च. शा. ६.१०)

स्निग्धविपरीतः गुर्वादिगुणविशेषः। वातगुणः।

रूखा। Rough, Dry.

रूक्षणम् (च. सू. २२.४)

'रौक्ष्यं खरत्वं वैशद्यं यत् कुर्यात्तद्धि रूक्षणम्।' (च. सू. २२.१०)। रौक्ष्यमित्यादौ रौक्ष्यमेव प्रधानं बोद्धव्यं खरत्वदवैशद्ये तु तदनुगते' (चक्र.)।

रौक्ष्यापादनमित्यर्थः।

रूक्षताजनक।

Roughening.

रूक्षणात्मिकाः (च. सू. २७.३१)

रूक्षणस्वभावाः, यथा—'मधुरा शीतला गुर्व्यो बलघ्न्यो रूक्षणात्मिकाः। सस्नेहा बलिभिर्भोज्या

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विविधाः शिम्बिजातयः ॥' इति ।

रूक्षण स्वभाव की ।

Having nature of roughening.

रूपम् (च. सू. ८.११)

१. चक्षुर्ग्राह्यो वैशेषिकगुणः ।

चक्षु द्वारा ग्राह्य विशिष्ट गुण । Vision, sight.

२. व्याधेर्व्यक्तलिङ्गम् । (च. नि. १.९)

लक्षण । Symptoms.

रूपवर्धनः (च. सि. १२.१९(३))

कान्तिकरः ।

सौन्दर्यप्रद ।

Beautfying, Cosmetic.

रोगनुत् (च. चि. १.१.४)

रोगनिवारकः, यथा—'स्वस्थस्योर्जस्करं किञ्चित् किञ्चिदार्त्तस्य रोगनुत्' इति ।

रोगनिवारक ।

Curative (measure).

रोगप्रबाधकम् (च. चि. २४.६४)

रोगाणां प्रबाधकं प्रतिबन्धकं यथा—'मद्योत्थानाञ्च रोगाणां मद्यमेव प्रबाधकम्' इति; हेतुविपरीतार्थकारिताप्रभावादिति । (चक्रः)

रोगों को बाधित करने वाला ।

Preventive as well as curative.

रोगहरम् (च. सू. १५.२२)

रोगनाशकम् । संशोधनफलम् ।

रोगनाशक ।

Curative.

रोगोपशान्तिः (च. सि. १.४२)

व्याधिशमनम् ।

रोगशमन ।

Cure of disease.

रोचनः (च. सू. २६.४३(२))

भक्तं रोचयतीति । अम्ललवणरसयोः कर्म ।

रुचिकारक ।

Promoting desire for food and relish.

रोचिष्णु (सु. सू. ४५.१९३)

साधु रोचते, तृप्तस्यापि रुचिकरम् । (ड०)

रुचिकारक ।

रोपणः (च. सू. २६.४३)

व्रणस्य संरोहणपूर्वकः । प्राकृतरूपापादनः । कषायरसस्य कर्म ।

व्रणरोपण ।

Wound-healing.

रोपणीयः (च. चि. २५.४१)

रोपणे हितो रोपणीयः ।

रोपण में हितकर ।

Benefecial for wound-healing.

रोमशातनम् (सु. चि. १.१०६)

रोमापहरणम्, यथा—'तैलं भल्लातकस्याथ स्नुहीक्षीरं तथैव च । प्रगृह्यैकत्र मतिमान् रोमशातनमुत्तमम् ॥' इति ।

रोमनाशक ।

Depilatory.

रोमसञ्जननम् (सु. चि. १.१०३)

रोम्णां पुनरुत्पादनम्, यथा—'कासीसं नक्तमालस्य पल्लवांश्चैव संहरेत् । कपित्थरसपिष्टानि रोमसञ्जननं परम् ॥' इति ।

रोमों का उत्पादक ।

Repilatory.

रौक्ष्यम् (च. सू. २२.१०)

रूक्षत्वम्, तदापादनं रूक्षणस्य प्रधानं कर्म ।

रूक्षता । Roughness.

रौक्ष्यकराणि (च. सू. २६.११)

रौक्ष्यं कुर्वन्तीति । वायव्यद्रव्यकर्म ।

रूक्षता उत्पन्न करने वाले ।

Roughening

ल

लघुः (च. .शा. ६.१०)

१. गुरुविपरीतः, गुर्वादिगुणविशेषः । वातगुणः ।

लघु, Light (Property)

२. अचिरपाकी

हलका । Light (in digestion).

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लघुता (च. सू. ५.५२)

लघुत्वम्, गौरवविपरीतम्।

लघुता। Lightness.

लघुत्वम् (च. सू. ५.३७)

लाघवम्, गौरवविपरीतम्।

लघुता।

लघुपाकम् (सु. सू. ४५.१०३)

१. पाके लघु, क्षिप्रं पच्यत इति भावः।

पाक में लघु। Light in digestion.

२. विपाके लघु।

विपाक में लघु। Light in final transformation.

लङ्घनम् (च. सू. २२.४)

यत् किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम्' इति। (च. सू. २२.९)

शरीर में लघुत्व लाने वाला।

Lightening (producing lightness in body).

लवणः (च. सू. १.६५)

'लूञ् छेदने' धातोः, लुनाति छिनत्ति मलान् श्लेष्मादिकान् धातूंश्चेति लवणः, रसविशेषः, पृथिव्यग्न्यात्मकः।

लवण रस। Saline taste.

लाघवम् (च. सू. ७.३२)

१. लघुत्वानुभूतिः स्फूर्तिप्रदा।

लघुत्व की अनुभूति। Feeling of lightness.

२. शरीरस्य भारायामयोः ह्रासः, लङ्घनस्य कर्म, यथोक्तं—'यत् किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम्' इति। (च. सू. २२.९)

शरीर के भार एवं विस्तार में कमी।

Decrease in body-weight and volume.

लाघवकरम् (सु. सू. ४१.४(४))

देहे लघुत्वापादनम्। वायव्यद्रव्यकर्म।

लघुता उत्पन्न करने वाला।

Producing lightness.

लूताविषापहम् (च. चि. २३.२०२)

लूताजन्यं विषमपहन्तीति।

लूताविषनाशक।

Counteracting spider-poisoning.

लूताव्रणापहाः (च. चि. २३.२०४)

लूताजन्यव्रणहराः।

लूताजन्य व्रण का नाशक।

Alleviating wound caused by spider.

लेखनम् (सु. सू. ४०.५)

१. कर्शनं, पत्तलीकरणमिति डल्हणः। तच्च कफमेदसोरुल्लिख्यापनयनेन, शार्ङ्गधरोक्तं लक्षणं यथा— 'धातून् मलान् वा देहस्य विशोष्योल्लेखयेच्च यत्। लेखनं तद यथा क्षौद्रं नीरमुष्णं वचा यवाः॥' इति

कृश करने वाला। Reducing body weight (Slimming).

२. व्रणोपक्रमेष्वन्यतमं शस्त्रकर्म। (सु. चि. १.८)

संघृष्य व्रणादावुत्सन्नभागस्यापनयनम्।

Scarification.

लेखनात्मकाः (च. सू. २७.२६६)

लेखनस्वभावाः, यथा—'धानासंज्ञास्तु ये भक्ष्याः प्रायस्ते लेखनात्मकाः' इति।

लेखन स्वभाव वाले।

Of slimming nature.

लेखनीयः (च. सू. ४.८)

लेखने हितः। लेखनीयो महाकषायो यथा— 'मुस्तकुष्ठहरिद्रादारुहरिद्रावचातिविषाकटुरोहिणी-चित्रकचिरबिल्वहैमवत्य इति दशेमानि लेखनीयानि भवन्ति' इति।

लेखन में हितकर।

Useful in slimming (emaciating).

लेखी (सु. चि. ३५.१९)

लेखनः, यथा—'निरूहः शोधनो लेखी स्नैहिको बृंहणो मतः' इति।

लेखन।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लोमरोहणम् (च. चि. २५.४३)

रोमसञ्जननम् ।

रोमसञ्जनन ।

लोमशातनम् (सु. चि. १.१०५)

रोमापनयनम् ।

बाल हटाने वाला ।

Depilatory.

लोमसंवेजनः (च. सू. २६.४३(२))

रोमहर्षणः । अम्लरसस्यात्युपयुज्यमानस्य कर्म ।

रोमाञ्चित करने वाला ।

Horrpilatory.

व

वक्त्रक्लेदनाशनम् (सु. सू. ४६.२०३)

वक्त्रस्य मुखस्य क्लेदमार्द्रतां नाशयतीति ।

मुख की आर्द्रता को नष्ट करने वाला ।

Removing moistening of mouth.

वक्त्रक्लेदापहम् (सु. सू. ४६.२०१)

मुखस्यार्द्रतामपहन्तीति, यथा पूगफलगुणे– 'कफपित्तहरं रूक्षं वक्त्रक्लेदमलापहम्' इति ।

मुखक्लेदनाशक ।

वक्त्रदौर्गन्ध्यनाशनम् (सु. सू. ४६.२०३)

मुखदुर्गन्धहरम् ।

मुख की दुर्गन्ध का नाशक ।

Removing foul smell of mouth.

वक्त्रप्रह्लादनः (सु. सू. ४५.१५६)

मुखे आह्लादं जनयतीति, यथेक्षुरसगुणे– 'वक्त्रप्रह्लादनो वृष्यो दन्तनिष्पीडितो रसः' इति ।

मुख को आह्लादित करने वाला ।

Pleasing to mouth.

वक्त्रविशोधनम् (च. सू. २७.१३१)

मुखशोधनम्, यथा–'पित्तश्लेष्मकरं भव्यं ग्राहि वक्त्रविशोधनम्' इति ।

मुखशोधन ।

Mouth-cleansing.

वक्त्रशुद्धिकरः (च. चि. ८.१२४)

मुखशोधनः ।

मुखशोधन ।

वक्त्रशोधनः (च. सू. २६.४३(४))

मुखशोधनः । कटुरसकर्म ।

मुखशोधन ।

वदनप्रियः (च. सू. २७.१८७)

स्वादुः, यथा–'सुरासवस्तीव्रमदो वातघ्नो वदनप्रियः' इति । (द्र. -मुखप्रियः)

स्वादु । Palatable.

वन्ध्यासुतप्रदम् (च. चि. २६.१७३)

वन्ध्यत्वं विनाश्य पुत्रजननम्, यथा महामायूरघृतगुणे– 'योन्यसृक्शुक्रदोषेषु शस्तं वन्ध्यासुतप्रदम्' इति ।

वन्ध्यात्वनाशक ।

Anti-sterlity.

वपुर्विवर्धनाः (सु. शा. १०.७०)

शरीरवृद्धिकराः ।

शरीरवृद्धिकर ।

Promoting physical development.

वमनम् (च. सू. २.८)

मुखद्वारा दोषहरणम् यथा– उपस्थिते श्लेष्मपित्ते व्याधावामाशयाश्रये । वमनार्थं प्रयुञ्जीत भिषग्देहमदूषयन् ॥' इति । वमनद्रव्याणि अग्निवायुगुणभूयिष्ठानि । (सु. सू. ४१.६)

वमन । Emesis.

वमनोपगः (च. सू. ४.८)

वमनमुप सहायत्वेन गच्छतीति, यथा– मदनफलादीनां वमनद्रव्याणां मधुमधुकादीनि सहायानि भवन्तीति (चक्र.); वमनोपगो महाकषायो यथा– मधुमधुककोविदाकर्बुदारनीपविदुलबिम्बी-शणपुष्पीसदापुष्पाप्रत्यक्पुष्पा इति दशेमानि वमनोपगानि भवन्ति' इति ।

वमन में सहायक । Sub-emetics.

वमिघ्नम् (च. चि. २०.३२)

वमिं छर्दिं हन्तीति, यथा–'धात्रीरसेनोत्तमचन्दनं वा तृष्णावमिघ्नानि समाक्षिकाणि' इति ।

छर्दिनाशक ।

Anti-emetic.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वयःस्थापनः (च. सू. ४.८)

वयस्तरुणं स्थापयतीति वयःस्थापनम् (चक्र०), जरा- प्रतिषेधकमिति यावत्। वयःस्थापनो महाकषायो यथा– 'अमृताभयाधात्रीमुक्ताश्वेता-जीवन्त्यतिरसामण्डूकपर्णीस्थिरापुनर्नवा इति दशेमानि वयःस्थापनानि भवन्ति' इति। 'आमलकं वयःस्थापनानाम् (अग्र्यम्)' इति (च. सू. २५.४०)।

शरीर में तारुण्य को स्थापित करने/रखने वाला।

Age-sustaining.

वयःस्थापयिता (च. सि. १.२७)

वयः स्थापयतीति वयःस्थापयिता, वयःस्थापनः, वयःस्थापनत्वं चास्य स्रोतःशुद्धिकरत्वात् (चक्र.)। निरूहबस्तिगुणः।

वयःस्थापन।

वयोबलकरः (च. सू. २७.३१४)

वयःस्थापनः, यथा– 'सर्वरोगप्रशमनं यथास्वं विहितं रसम्। विद्यात् स्वर्यं बलकरं वयोबुद्धिक्रियायुषाम्॥' इति।

वयःस्थापन।

वयोहिततमः (च. सू. २७.६४)

वयःस्थापने हिततमः।

वयःस्थापन में हितकर।

Wholesome for age-sustaining.

वर्चःक्षयकरः (च. चि. १९.४१)

वर्चःक्षयं अतीसारजन्यं पुरीषमलक्षयं मुखशौषदौर्बल्योदार्वतादिभिः (चक्र०) लक्ष्यं हरति अपनयतीति, यथोक्तं– 'ओदनं रक्तशालीनां तेनाद्यात् प्रपिबेच्च तत्। तथा वर्चः-क्षयकृतैर्व्याधिभिर्विप्रमुच्यते॥' इति।

पुरीषक्षय को दूर करने वाला।

Alleviating symptoms of excessive loss of faeces (dehydration).

वर्चःसंहतीकरणाः (सु. सू. ४६.७९)

वर्चः संहतं सान्द्रं कुर्वन्तीति। (डा०)

पुरीष को बांधने वाले।

Making stool formed (Solid).

वर्चोऽनुलोमनम् (च. चि. १४.१२९)

वर्चः पुरीषमनुलोमयतीति, यथा–कण्टकार्या शृतं वापि शृतं नागरधान्यकैः। अनुपानं भिषग्दद्याद् वातवर्चोऽनुलोमनम्॥' इति। पेयागुणे च- 'स्नेहाग्निजननी पेया वातवर्चोऽनुलोमनी' इति। (च. सू. २७.२५०)

पुरीषानुलोमन।

Pushing faeces in course.

वर्चोदोषशिथिलीकरणम् (च. चि. १३.१६८)

गाढपुरीषस्य मृदूकरणम्।

कठिन पुरीष को मृदु करना।

Softening hard stool.

वर्चोभेदहितम् (च. सू. २७.११२)

सारकम्, यथा–'चिर्भटैर्वारुके तद्वद्वर्चोभेदहिते तु ते' इति।

सारक।

Wholesome for laxation.

वर्चोभेदि (च. सू. २७.११२)

सारकम्, यथा–'वर्चोभेदीन्यलाबूनि रूक्षशीतगुरुणि च' इति।

सारक।

Laxative.

वर्चोविबन्धघ्नम् (च. चि. ३.२३६)

वर्चसः पुरीषस्य विबन्धमवरोधं हन्तीति, पुरीषसारकमित्यर्थः।

विबन्धनाशक।

Relieving constipation.

वर्चोविबन्धनुत् (च. चि. १४.१०६)

सारकम्।

विबन्धनाशक।

वर्चोविवर्धनम् (सु. सू. ४५.७५)

प्रभूतपुरीषजननम्।

पुरीष की मात्रा को बढाने वाला।

Increasing the quantity of faeces.

वर्णकरम् (सु. सू. ४१.४(३)

१. वर्णो गौरादिः (ड०), तत्करम्। तैजसद्रव्यकर्म।

वर्णजनक। Causing complexion.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

२. वर्णं प्रशस्तं करोतीति। मधुररसकर्म (च. सू. २६.४३(१))।

वर्ण को प्रशस्त करने वाला। Beautifying.

वर्णकृत् (च. सि. १.२७)

वर्णकरः। निरूहगुणः।

वर्णकर।

वर्णक्षयकरम् (च. वि. २.७)

प्राकृतवर्णस्य ह्रासं करोतीति। हीनमात्राहारदोषः।

वर्ण का ह्रास करने वाला। Decreasing normal complexion

वर्णजननः (च. सि. १२.१८(१)

प्रशस्तवर्णकरः।

वर्ण को प्रशस्त करने वाला।

Beautifying.

वर्णदम् (च. सि. १.३०)

प्रशस्तवर्णकरम्।

वर्णजनन।

वर्णप्रदम् (च. सि. १.२९)

प्रशस्तवर्णकरम्।

वर्णजनन।

वर्णप्रसादः (च. सू. १६.१८)

वर्णस्य प्रसादो वैमल्यम्। संशोधनफलम्।

वर्ण की स्वच्छता।

Clarity of complexion.

वर्णप्रसादनः (सु. सू. ३८.२५)

वर्णं प्रसादयति विमलं करोतीति, यथा–'एलादिको वातकफौ निहन्याद् विषमेव च। वर्णप्रसादनः कण्डूपिडकाकोठनाशनः॥'इति। ऐन्द्ररसायनञ्च-'आयुष्यं पौष्टिकं धन्यं स्वरवर्णप्रसादनम्' इति (च. चि. १.३.२७)।

वर्ण को स्वच्छ करने वाला।

Making complexion clear.

वर्णवर्धनम् (च. चि. १.३.३१)

वर्णं वर्धयति प्रशस्ततरं करोतीति यथा मेध्यरसायनगुणे–'बलाग्निवर्णस्वरवर्धनानि' इति।

वर्ण को बढ़ाने वाला।

Promoting complexion.

वर्णविनाशनः (सु. चि. २४.७९)

वर्णं प्राकृतं विनाशयति क्षपयतीति।

वर्ण का नाशक।

Decreasing or causing loss of complexion.

वर्णविशोधनः (च. सू. २७.१८५)

वर्णं विशोधयति दोषानपास्य प्राकृतं करोतीति।

वर्ण का शोधन।

Purifying complexion.

वर्णहिततमः (च. सू. २७.६४)

अधिकतमो वर्णकरः।

वर्ण के लिए अधिकतम हितकर।

Most benefecial for complexion.

वर्णोत्तमकरम् (च. चि. १.२.३)

वर्णमुत्तमं प्रशस्ततमं करोतीति। रसायनकर्म।

उत्तम वर्ण करने वाला।

Promoting excellence of complexion.

वर्णोपरोधः (च. सू. २६.८४)

प्राकृतवर्णक्षयः। वैरोधिकाहारदोषः।

वर्ण का क्षय।

Loss of complexion.

वर्ण्यः (च. सू. ४.८)

वर्णाय हितः। वर्ण्यः महाकषायो यथा–'चन्दनतुङ्गपद्मकोशीरमधुकमञ्जिष्ठासारिवापयस्यासितालता इति दशेमानि वर्ण्यानि भवन्ति' इति।

वर्ण के लिए हितकर।

Wholesome for complexion (complexion- promoting).

वर्धनम् (च. चि. ३.२८६)

वृद्धिकरम्।

वर्धक (बढ़ाने वाला)।

Promoting, Increasing.

वलीपलितनाशनम् (च. चि. २९.७०)

वलीपलितं जरालिङ्गं नाशयतीति, यथा जीवनीयघृतगुणे–'बलवर्णकरं धन्यं वलीपलितनाशनम्' इति।

वलिपलितनाशक।

Removing wrinkles and greying.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वल्यापादनः (च. सू. २६.४३(३))

वलीं त्वक्शैथिल्यं जरालिङ्गमापादयति जनयतीति। अत्युपयुज्यमानलवणरसस्य कर्म।

वली (झुर्री) उत्पन्न करने वाला।

Causing wrinkles.

वस्त्रक्रिमिनुत् (च. चि. २३.१००)

वस्त्रक्रिमिः यूका (चक्र.), तमपनयतीति। वस्त्रक्रिमियों का नाशक।

Destroying insects (mite) of clothes.

वह्निदीपनः (च. चि. १८.३५)

वह्निमग्निं दीपयति प्रज्वलयतीति। अग्नि को दीप्त करने वाला।

Stimulating digestive fire.

वह्निनाशनम् (सु. सू. ४५.५५)

अग्निसादनम्, यथा माहिषक्षीरगुणे—'महाभिष्यन्दि मधुरं माहिषं वह्निनाशनम्' इति। अग्नि को नष्ट करने वाला।

Causing loss of digestive power.

वह्निविधमनः (सु. सू. ४५.७९)

अग्निनाशनः (ड०), यथा दधिसरगुणे — 'वह्नेर्विधमनश्चापि कफशुक्रविवर्धनः' इति। अग्निनाशक।

वह्निसंधुक्षणम् (सु. चि. ३१.५७)

अग्निदीपनम्। स्नेहकर्म। अग्निदीपक।

वाक्प्रदम् (अ. हृ. उ. ७.२८)

वाचं प्रशस्तां प्रददातीति, प्रशस्तवाक्कर इत्यर्थः। कूष्माण्डघृतगुणः। वाणी को प्रशस्त करना।

Promoting excellent speech.

वाक्संगः (सु. क. २.१३)

वागवरोधः। वाणी का अवरोध।

Loss of speech, aphasia.

वाग्विबोधनम् (च. चि. २४.६३)

वाचं विशेषेण बोधयति प्रेरयतीति। मद्यकर्म। वाणी को प्रेरित करने वाला।

Speech-stimulating.

वाङ्निग्रहणः (च. सू. २६.४३)

वाचमवरुणद्धीति। कषायरसकर्म। वाणी को अवरुद्ध करना।

Causing obstruction of speech.

वाजीकरणम् (सु. चि. २६.६)

अवाजी वाजी क्रियतेऽनेनेति। 'तत् त्रिविधं— जनकं, प्रवर्तकं जनकप्रवर्तकं चेति। तत्र जनकं मांसघृतादिकं यतस्तद्रसादिधातु क्रमेण परिणतं सत् प्रधानधातुपुष्टिं करोति, प्रवर्तकमुच्चटा-चूर्णादिकं शुक्रवैरेचनिकं, न च तस्य वैरेचनिकोक्त्या शुक्रक्षयकारित्वं स्यात्, अतो विरेचनं शुक्रस्य पतनायाभिमुखीभावमात्रकरणं; जनकप्रवर्त्तकं तु गव्यघृतगोधूममाषकाकाण्डफलादिकम्। केवलं देहबलकरं जनकं गोधूमादिकं, केवलं मनोबलकरं संकल्पादि तु प्रवर्तकं, घृतक्षीरादि देहमनोबलकरं सदुभयकरमिति। (ड०)

वाजीकरण।

Aphrodisiac.

वातकफकासहरः (च. चि. १८.१२२)

वातकफजं कासं हरतीति। वातकफज कास का नाशक।

Alleviating cough caused by vāta and kapha.

वातकासनिबर्हणम् (च. चि. १८.४९)

वातजकासहरम्। वातज कास को दूर करने वाला।

Alleviating cough caused by vāta.

वातकासनुत् (च. चि. १८.३५)

वातजकासहरम्। कण्टकारीघृतगुणः। वातज कास का नाशक।

वातगुल्मरुजापहम् (च. चि. ५.५८)

वातगुल्मे या रुजा पीडा तामपहन्तीति, यथा— 'मातुलुङ्गरसो हिङ्गु दाडिमं विडसैन्धवे। सुरामण्डेन पातव्यं वातगुल्मरुजापहम्॥' इति। वातगुल्म की पीडा का नाशक।

Removing pain of vātika gulma.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वातघ्नम् (च. चि. ३०.४९)

वातनाशनम् ।

वातनाशक ।

Alleviating (aggravation of) vāta (and consequent disorders).

वातजननम् (च. सू. २५.४०)

वातवर्धनम्, यथा 'जाम्बवं वातजननानाम्' इति ।

वातवर्धक ।

Increasing vāta.

वातनुत् (च. चि. २८.१३६)

वातहरम्, यथा—'कार्पासास्थिकुलत्थानां रसे सिद्धं च वातनुत्' इति ।

वातनाशक ।

Alleviating (disorders of vāta).

वातप्रकोपणानि (च. सू. १२.६)

वातं प्रकोपयतीति, यथा—'वातप्रकोपणानि खलु रूक्षलघुशीतदारुणखरविशदशुषिरकराणि शरीराणाम्' इति ।

वातप्रकोपक ।

Vāta-aggravating.

वातप्रशमनानि (च. सू. १२.६)

वातं प्रशमयन्तीति, यथा—'वातप्रशमनानि पुनः स्निग्धगुरूष्णमृदुश्लक्ष्णपिच्छिलघनकराणि शरीराणाम्' इति ।

वातशामक ।

Vāta-pacifying.

वातरक्तनुत् (च. .चि. २९.५७)

वातरक्तनाशनः ।

वातरक्त को दूर करने वाला ।

Alleviating vātarakta.

वातरक्तरुजापहम् (च. चि. २९.१२३)

वातरक्ते या रुजा पीडा तामपहन्तीति । पिण्डतैलगुणः ।

वातक्त की पीडा का शामक ।

Removing pain of vātarakta.

वातरुजापहम् (सु. चि. ८.१८)

वातजां रुजां पीडामपहन्तीति, यथा भगन्दर-चिकित्सिते— 'परिषिञ्चेद् गुदं चास्य तैलैर्वातरुजापहैः' इति ।

वातिक पीड़ा का शामक ।

Relieving pain caused by vāta.

वातरोगघ्नम् (च. चि. १८.१४३)

वातरोगहरम् ।

वाताव्याधिनाशक ।

Alleviating vātika disorders.

वातरोगनुत् (च. चि. २८.१७९)

वातरोगहरम् ।

वातव्याधिनाशक ।

वातरोगहरम् (च. चि. २८.१२३)

वातरोगनाशनम्, यथा—'चित्रकं नागरं रास्नां पौष्करं पिप्पलीं शटीम् । पिष्ट्वा विपाचयेत् सर्पिर्वातरोगहरं परम् ॥' इति ।

वातव्याधिनाशक ।

वातलः (च. सू. २६.६१)

वातवर्धकः,. यथा—'शुक्रहा बद्धविण्मूत्रो विपाको वातलः कटुः' इति ।

वातवर्धक ।

Increasing vāta.

वातविकारकरम् (च. वि. २.७)

वातविकारं करोतीति, वातव्याधिजनकमित्यर्थः ।

वातव्याधिजनक ।

Causing vātika disorders.

वातविबन्धनुत् (च. चि. १४.१०६)

अपानवातस्य विबन्धमवरोधं हन्तीति, यथा—'पिप्पलीपिप्पलीमूलदधिदाडिमधान्यकैः । सिद्धं सर्पिर्विधातव्यं वातवर्चोविबन्धनुत् ॥' इति ।

अपान वात के विबन्ध का नाशक ।

Relieving obstruction of wind, carminative.

वातव्याधिप्रशमनः (सू. वि. ४.४)

वातव्याधिनाशनः ।

वातव्याधिनाशकः ।

वातव्याधिविनाशनम् (च. चि. २८.१५६)

वातव्याधिहरम् ।

वातव्याधिनाशक ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वातव्याधिहरम् (च. चि. ३०.४७)

वातव्याधिनाशनम् ।

वातव्याधिनाशक ।

वातश्लेष्मजित् (च. चि. २१.१३४)

वातश्लेष्माणौ जयतीति, वातकफहर इत्यर्थः ।

वातकफ का शामक ।

Pacifying vāta and kapha.

वातश्लेष्महरम् (च. चि. २१.१२०)

वातश्लेष्माणौ हरत्यपनयतीति, वातकफहरमित्यर्थः, यथा—'वातश्लेष्महरं कर्म ग्रन्थिवीसर्पिणे हितम्' इति ।

वातकफशामक ।

वातश्लेष्माविरोधि (च. सू. २७.१६०)

वातश्लेष्मणोरविरोधि अप्रकोपकमिति, यथा—'विष्टम्भयति कारञ्जं वातश्लेष्माविरोधि च' इति ।

Non-aggravating to vāta and kapha.

वातसाधारणः (सु. सू. ४६.८०)

वाते साधारणो मध्यस्थः, साधारणदेशवत्, न चायं वातं कोपयति न च वातशमं करोति, यथा शशः माधुर्याद् वातशमहेतुः, कषायात् सशैत्याच्चाहेतुरिति साधारणत्वम् । (ड०)

वातोदासीन ।

Neutral to vāta.

वातहरम् (च. चि. १७.८४)

वातशमनम्, यथा हिक्काश्वासचिकित्सिते—'तिलोमामाषगोधूमचूर्णैर्वातहरैः सह । स्नेहैश्चोत्कारिका साम्लैः सक्षीरैर्वा कृता हिता' इति ।

वातशामक ।

Vāta-pacifying.

वाताक्षिरोगनुत् (च. चि. २६.२४०)

वातजान् नेत्ररोगान् हन्तीति ।

वातज नेत्ररोगों का नाशक ।

Alleviating eye diseasess caused by vāta.

वातादिविबन्धकरः (च. सू. २६.४३)

वातादीनां विबन्धं गत्यवरोधं करोतीति, यथा कषायरसगुणे— 'वातमूत्रपुरीषरेतांस्यवगृह्णाति' इति, 'अवगृह्णातीति बद्धानि करोतीति चक्रः ।

वातादि का विबन्धकर ।

Causing obstruction of wind etc.

वातानुलोमता (च. चि. १७.७२)

वातस्य स्वमार्गे सुखं प्रवृत्तिः, यथा हिक्काश्वासचिकित्सते स्नेहस्वेदगुणे 'खानि मार्दवमायान्ति ततो वातानुलोमता' इति ।

वातानुलोमन ।

Carmination.

वातानुलोमनम् (च. सू. ७.१३)

वातस्य स्वमार्गे प्रवर्त्तनम्, यथा वातनिग्रहजे विकारे— 'पानानि बस्तयश्चैव शस्तं वातानुलोमनम्' इति, स्वेदाग्निजननी पेया वातवर्चोऽनुलोमनी' इति च (च. सू. २७.२५०) ।

वातानुलोमन ।

Carmination.

वातानुलोम्यम् (च. चि. १४.२४७)

वातानुलोमता, यथाऽर्शश्चिकित्सोपसंहारे—'यद् वायोरानुलोम्याय यदग्निबलवृद्धये । अन्नपानौषधद्रव्यं तत् सेव्यं नित्यमर्शसैः ॥' इति ।

वातानुलोमन ।

वातामयापहः (च. चि. २७.४१)

वातव्याधिनाशनः ।

वातव्याधिनाशक ।

वातार्तिघ्नम् (च. चि. २९.८१)

वातविकारशमनम्, यथा—'बलाशतावरीरास्नादशमूलैः सपीलुभिः । श्यामैरण्डस्थिराभिश्च वातार्तिघ्नं शृतं पयः ॥' इति ।

वातव्याधिनाशक ।

वाताविरोधि (च. चि. १७.७५)

वातस्याविरोधि अप्रकोपकम् । विरोधि प्रकोपकं, विपरीतन्तु शमनमिति विरोधिविपरीतयोर्विशेषः ।

वात का अप्रकोपक ।

Non-aggravating to vāta.

वातासृग्ज्वरनाशनम् (च. चि. २९.११३)

वातरक्तजं ज्वरं नाशयतीति, यथा— 'महापद्ममिदं तैलं वातासृग्ज्वरनाशनम् ॥' इति ।

वातरक्तजन्य ज्वर का नाशक ।

Alleviating fever in vātarakta.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वातास्रदाहनुत् (च. चि. २९.११५)

वातरक्तजं दाहं हरतीति, यथा—'खुड्डाकपद्मकमिदं तैलं वातास्रदाहनुत्' इति।

वातरक्तजन्य दाह को दूर करने वाला।

Alleviating burning sensation in vātarakata.

वातास्रामयनाशनम् (च. चि. २९.१०२)

वातरक्तरोगं नाशयतीति, यथा 'सुकुमारकमित्येतद् वातास्रामयनाशनम्' इति।

वातरक्तनाशक।

Alleviating vātarakta.

वातिकानि (च. चि. ८.७३)

सवातिकैरिति वातिकोत्तरवातिकैः, तन्त्रान्तरे तु वातिकान्युत्तरवातिकानि च गणेन पठितानि यथा—'बिल्वोऽग्निमन्थः काश्मर्यं श्रेयसी पाटला बला। शालपर्णी पृश्निपर्णी बृहती कण्टकरिका॥ वर्धमानो मूलकञ्च वातिकान्यवतारयेत्॥' 'करमर्द सबदरं कुलत्थाः शुष्कमूलकम्। श्वदंष्ट्रा वेणुपर्णी च साश्वगन्धा शतावरी। ऋष्यप्रोक्ता गुडूची च मधुकं शिग्रुरेव च। यवान्यारग्वधश्चैव यच्चान्यत् किञ्चिदीदृशम्। सर्वमेतद् विजानीयाद् भिषगुत्तरवातिकम्॥' इति चक्रः।

वातिकानि वाते हितानि।

वातव्याधि में हितकर।

Wholesome in vātavyadhi.

वामिनी (सु. सू. ४६.२१५)

१. वमनकारिणी, यथा—'तिक्तालाबुरहृद्या तु वामिनी वातपित्तजित्' इति।

वमनकारिणी।

Emetic.

२. योनिव्यापद्विशेषः। (च. चि. ३०.३३)

विकर्तिकाघ्नः (च. चि. २६.८४)

विकर्तिका कर्तनवत् पीडा हृदये गुदे वा। विकर्तिकेह हृदयपरिकर्तिकाकारा वेदनेति चक्रः, तां हन्तीति।

विकर्तिका (शूलविशेष) का शामक।

Relieving cutting pain (in chest or rectum)

विकासी (सु. सू. ४६.५२३)

विकासिलक्षणं यथा—'विकासी विकसन्नेवं धातुबन्धान् विमोक्षयेत्' इति। 'विकसन् प्रसर्पन्, एवमिति अपक्व एव सकलं देहं व्याप्य, धातुबन्धान् विमोक्षयेत् धातुशैथिल्यं करोतीत्यर्थः।' (ड०)। शार्ङ्गधरो लिखति-'सन्धिबन्धांस्तु शिथिलान् यत् करोति विकासि तत्। विश्लिष्यौजश्च धातुभ्यो यथा क्रमुककोद्रवाः॥' इति (शा. सं. १.४.२०)। धातूनां हिंसक इति शिवदासः (च. .सू. २६.७९)।

अवसादक।

Depressant.

विचारकराणि (च. सू. २६.११)

विचरणं विचारो गतिरित्यर्थः। (चक्र.)

वायव्यद्रव्यकर्म।

गतिकारक।

Causing movements.

विचारणकरम् (सु. सू. ४१.४(४))

विचारणं मनसोऽनेकविकल्पकारणम्, 'विंचरणकरम्' इति पाठे' गतिविशेषकरमिति। (ड०)

वायव्यद्रव्यकर्म।

गतिकारक।

विच्छेदनः (च. क. १.५)

विश्लेषणः, पृथक्करण इति।

पृथक् करने वाला।

Disintegrating, separating.

विज्जलः (च. वि. ८.९६)

पिच्छिलः

पिच्छिलः। Slimy.

विट्कर्षी (च. सि. १.२८)

विशं पुरीषं कर्षति स्वमार्गे इति।

पुरीष को खींचना।

Drawing faeces to its passage.

विडनुलोमनम् (च. सू. २३.३६)

पुरीषानुलोमनम्।

पुरीष का अनुलोमन।

Pushing faeces in passage.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विड्भेदी (सु. सू. ३८.३०)

पुरीषभेदनः, यथा— 'उक्तः श्यामादिरित्येष गणो गुल्मविषापहः। आनाहोदरविड्भेदी तथोदावर्त-नाशनः॥' इति।

विरेचन, पुरीष का भेदन।

Purgative, breaking faecal mass.

विदारणः (च. सू. २७.३०६)

विदारयति भिनत्ति गुल्मादीनिति।

क्षारगुणः।

गुल्म आदि को विदीर्ण करने वाला।

Tearing abdominal lump etc.

विदारणम् (ड०, सु. सू. २७.४; ३७.१०)

चिरबिल्वादिभिर्मिश्रकोक्तैरौषधैः पक्वशोथस्य विदारणम्; भेदनमित्यर्थः।

विदीर्ण करना।

Tearing mature inflammation (Abscess).

विदाहः (च. सू. २७.७५)

विशेषेण दाहानुभूतिः।

विदाह।

Burning sensation.

विदाहजननः (सु. सू. २०.२३)

विदाहं जनयतीति।

विदाहजनक।

Causing burning sensation.

विदाहि (सु. सू. २१.२१;४५,१५८)

यदम्लोद्गारदाहतृष्णाप्रभृतीनुदीर्य कृच्छ्रात् पाकमुपगच्छति तद् विदाहि। 'द्रव्यस्वभावादथ गौरवाद् वा चिरेण पाकं जठराग्नियोगात्। पित्तप्रकोपं विदहत् करोति तदन्नपानं कथितं विदाहि॥' इति (ड०), यथा— मरिचमद्यसर्षप-प्रभृतीनि।

विदाहजनक।

Causing burning with hypracidity and poor digestion.

विपरीतगुणम् (च. सू. १.५९)

विपरीता वातगुणप्रतिपक्षा गुणा यस्य तद् विपरीतगुणं, गुणशब्देन चेह धर्मवाचिना रसवीर्यविपाकप्रभावाः सर्व एव गृह्यन्ते, तेन प्रभावादपि यद् वातविपरीतं तदपि गृह्यते। (चक्र.)

विपरीतगुणयुक्त।

Having antagonistic properties.

विपरीतगुणभूयिष्ठाः (च. वि. १.७)

अधिकतमा विपरीतगुणा येषु ते। विपरीतगुणापेक्षया तेषामल्पबलत्वं, यथोक्तं चक्रेण— 'तेन विपरीतगुणा एव विशेषेण विपरीतगुणभूयिष्ठापेक्षया शमयन्तीति दर्शयति।' अन्यत्रापि— 'सर्वथा विपरीतगुणैरधिका प्रशस्ता च शान्तिर्भवति.... विपरीतगुणभूयिष्ठैर्न तथा शान्तिर्भवति।' इति।

अधिकतम विपरीतगुणों से युक्त।

Having majority of antagonistic properties.

विपाकः (च. सू. २६.५८)

पाकनिष्ठाजन्या द्रव्यपरिणतिः (द्र. सू. ५.१)। वाग्भटो यथा—'जाठरेणाग्निना योगाद् यदुदेति रसान्तरम्। रसानां परिणामान्ते स विपाक इति स्मृतः॥' इति।

पाक की चरम परिणति।

Final transformation after digestion.

विपाकविरुद्धम् (सु. सू. २०.१६)

यथा—'तत्र मधुरतिक्तौ रसविपाकाभ्यां (विरुद्धौ) मधुरकषायौ च' इति।

विपाक में विरुद्ध।

Antagonist in vipāka.

विबन्धघ्नम् (च. सू. २७.२९.९)

विबन्धं मलावरोधं हन्ति अनुलोमनत्वेनेति, यथा हिङ्गुगुणे 'वातश्लेष्मविबन्धघ्नं कटूष्णं दीपनं लघु' इति।

विबन्धनाशक।

Relieving constipation.

विबन्धनाशनम् (च. चि. ८.१४४)

विबन्धो वातादीनामप्रवृत्तिः (ड., सु. सू. ४५.१७८), तं नाशयतीति।

विबन्धनाशक।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विबन्धनुत् (च. चि. २४.६३)

विबन्धनाशनम्। मद्यकर्म।

विबन्धनाशक।

विबन्धभेदनी (भा. प्र. नि. १.४८)

विबन्धं मलादीनामवरोधं भिनत्ति विदारयतीति, यथोक्तं शुण्ठीगुणे भावमिश्रेण—'विबन्धभेदनी या तु सा कथं ग्राहिणी भवेत्। शक्तिर्विबन्धभेदे स्याद् यतो न मलपातने॥' इति।

Breaking constipation.

विभक्तिः (च. सू. २६.३३)

खण्डनं यथा गुडूचीकाण्डादेः; विभागविशेषः।

विभाजित करना।

Separating by cutting.

विभागः (च. सू. २६.२९)

संयोगविरुद्धः परादिगुणविशेषः, स च त्रिविधः—विभक्तिः, वियोगो भागशो ग्रहश्चेति (द्र. सू. ३.७)। चरकोऽपि—'विभागस्तु विभक्तिः स्याद् वियोगो भागशो ग्रहः' इति।

विभाग।

Disjunction.

विमलम् (च. सू. ६.४७)

निर्मलम्, शुद्धमिति।

स्वच्छ, शुद्ध।

Clean, Pure, Clear.

वियोगः (च. सू. २६.३३)

वियोगोऽपाकरणं यथा निदानपरिवर्जनम्, गणादेकस्य द्रव्यस्यापाकरणञ्च (द्र. सू. ३.७)। विभागविशेषः।

वियोग (पृथक् करना)।

Disjoining, elimination.

विरजनीयम् (च. सू. २५.४०)

मूत्रविरजनीयं पुरीषविरजनीयं वा।

विकृत वर्ण को ठीक करना।

Removing abnormal colour (in urine or stool).

विरसम् (सु. सू. ४५.१९८)

विकृतरसम्।

विकृतरसयुक्त।

Having abnormal taste.

विरूक्षणम् (सु. सू. १५.३२)

विशेषेण रूक्षणम्, मेदोघ्नमिति डल्हणः, यथा—गुग्गुलुत्रिफलामधुयवप्रभृति।

विशेष रूप से रूक्षता करने वाला (मेदोनाशक)।

Roughening, anti-obesity.

विरूक्षणकरम् (सु. सू. ४१.४(४))

विशेषेण रूक्षणं करोतीति। वायवीयद्रव्यकर्म।

विरूक्षण।

विरूक्षणीयम् (च. सू. २५.४०)

विरूक्षणे। हितम्।'उद्दालकान्नं विरूक्षणीयानाम् (अग्र्यम्)' इति।

विरूक्षण में हितकर।

Benefecial for roughening.

विरेकः (च. सू. २.१०)

विरेचनम्।

विरेचन। Purgative.

विरेचनम् (च. सू. १.८०)

विशेषेण रिक्तीकरोत्याशयमिति, यथा पुरीषविरेचनं, मूत्रविरेचनं, शुक्रविरेचनञ्च, वमनमपि आमाशयशोधनत्वाद् विरेचनं यथोक्तं— 'उभयं वा शरीरमलविरेचनाद् विरेचनसंज्ञां लभते' इति (च. क. १.४)। प्रायः 'विरेचन' पदेन संशोधनाङ्गं पुरीषनिर्हरणमधोभागं गृह्यते यथोक्तं चरकेणैव 'अधोभागं विरेचनसंज्ञकम्' इति। विरेचनद्रव्याणि यथा निकुम्भादिगणोक्तानि (अ. हृ. सू. १५.२) पृथिव्यम्बुगुणभूयिष्ठानि (सु. सू. ४१.६)।

विरेचन।

Purgative.

विरेचनोपगः (च. सू. ४.८)

विरेचनमुप सहायत्वेन गच्छति, विरेचनसहाय इत्यर्थः। विरेचनोपगो महाकषायो यथा—'द्राक्षाकाश्मर्यपरुषकाभयामलकबिभीतककुवल-बदरकर्कन्धुपीलूनीति दशेमानि विरेचनोपगानि भवन्ति' इति।

विरेचन में सहायक।

Sub-purgative.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विलङ्घनम् (च. चि. ३.९५)

विशेषेण लङ्घनम्, यथोक्तं—'वमनं पाचनं रूक्षमन्नपानं विलङ्घनम्। कषायोष्णं च विषमे ज्वरे शस्तं कफोत्तरे ॥' इति।

विशेष रूप से लङ्घन।

Specifically lightening.

विशदः (च. शा. ६.१०)

पिच्छिलविपरीतः, गुर्वादिगुणविशेषः। विशदं धूलिवदिति डल्हणः (सु. सू. ४१.४ (३))।

पिच्छिलतारहित।

Non-slimy.

विशेषशीतम् (च. सू. ६.३७)

अत्यर्थशीतम्। (चक्र.)

अत्यन्त शीत।

Excessively cold.

विशोधनम् (च. चि. १२.१७)

१. मलनिर्हरणेन शरीरस्य शुद्धीकरणम्, यथोक्तं श्वयथु चिकित्सिते— 'अथामजं लङ्घनपाचनक्रमैर्विशोधनैरुल्वणदोषमादितः' इति; 'पलाशवत् प्रयोज्या वा त्रायमाणा विशोधिनी' इति च (च. चि. १९.६०)।

मलों को बाहर निकाल कर शरीर को शुद्ध करना।

Cleansing by evacuation, Purification.

२. व्रणानां पूयादिनिर्हरणेन शोधनम्। (च. चि. २५.३८)

विशोषणम् (सु. चि. २.८७)

विशेषेण शोषयति क्लेदमेदःकफादीनिति। डल्हणस्तु— लघनम्; आहारोऽपि विशोषणं तिक्तकटुकषायादिरिति।

विशेष रूप से शोषक।

Specifically drying.

विशोषी (सु. सू. १८.६)

विशेषेण शोषयितुं अथवा विशेषेण शुष्कतां यातुं शीलं यस्य सः। प्रलेपविशेषणम्।

विशोषण।

विश्लेषणः (सु. सू. ४२.१०(३))

'पृथक्करणः प्रत्यवयवानाम्, छेदित्वात्' (ड०)। लवणरसकर्म।

पृथक्करण।

Separation, disjoining.

विषघ्नः (च. सू. ४.८)

विषं हन्तीति, विषनाशक इत्यर्थः। विषघ्नो महाकषायो यथा— 'हरिद्रामञ्जिष्ठामुवहासूक्ष्मैलापालिन्दीचन्दनकतकशिरीषसिन्धुवारश्लेष्मातका इति दशेमानि विषघ्नानि भवन्ति' इति।

विषनाशक।

Anti-Poison.

विषनुत् (च. चि. २३.९८)

विषनाशनः।

विषनाशक।

Anti-Poison.

विषप्रदूषणः (सु. सू. ४६.३०४)

विषस्य प्रदूषणः प्रकोपणः। (ड०)

विष का प्रकोपक।

Aggravating Poison.

विषप्रशमनम् (सु. सू. ४०.५)

विषं प्रशमयतीति विषप्रशमनत्वमगदादेः।(ड०)

विष का शामक।

Pacifying Poison.

विषमज्वरनाशनाः (च. चि. ३.२९६)

विषमज्वरं नाशयन्तीति, यथा—'योगाः परं प्रवक्ष्यन्ते विषमज्वरनाशनाः' इति। त्रिफला च विषमज्वरनाशनी (सु. सू. ३८.५७)।

विषमज्वरनाशक।

Alleviating irregular fever, anti-malarial.

विषवर्धनः (च. सू. २६.४३(३))

विषं वर्धयतीति। अत्युपयुज्यमानलवणरसस्य कर्म।

विषवर्धक।

Aggravating Poison.

विषविनाशनम् (सु. क. ५.३५)

विषं विनाशयतीति, यथोक्तं—'वेगानुपूर्व्या कर्मोक्तमिदं विषविनाशनम्' इति।

विषघ्न।

Anti-Poison.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विषवृद्धिकरम् (सु. क. ८.१३७)

विषवर्धनम्, तिलकुलत्थाद्यन्नम्। (ड०)

विषवर्धक।

विषसूदनम् (सु. सू. ४६.३२६)

विषं सूदते हिनस्तीति, विषघ्नमित्यर्थः, यथा सुवर्णगुणे—'दोषत्रयापहं शीतं चक्षुष्यं विषसूदनम्' इति।

विषघ्न।

विषहरणम् (चक्र., च. सू. २६.७०)

विषघ्नम्।

विषघ्न।

विषापहः (च. चि. ९.७२)

विषमपहन्तीति, विषघ्न इत्यर्थः।

विषघ्न।

विष्टम्भि (च. सू. २७.११०)

विष्टम्भकरम्। 'विष्टम्भो गुडगुडाशब्दः, अन्ये तु सवाततोदशूला मलस्याप्रवृत्तिर्विष्टेम्भः' इति डल्हणः (सु. सू. ४५.१५८), अस्मन्मते तु कोष्ठे वाताधिक्यं साध्मानादिलिङ्गं विष्टम्भः।

विष्टम्भ उत्पन्न करने वाला।

Wind-forming, flatulant.

विष्टम्भजित् (अ. हृ. सू. ५.३५)

विष्टम्भहरः, वातानुलोमनमिति हेमाद्रिः, यथोक्तं—'तद्वन्मस्तु सरं स्रोतःशोधि विष्टम्भजिल्लघु' इति।

विष्टम्भनाशक।

Checking formation of wind and flatulant.

विष्यन्दकराणि (च. सू. २६.११)

विष्यन्दः प्रस्रवणं 'स्यन्दू प्रस्रवणे' धातोः, तं कुर्वन्तीति। आप्यद्रव्यकर्म।

स्रावकारक।

Promoting oozing.

विष्यन्दनम् (सु. चि. ४.३३)

स्रवणम् (ड०), यथोक्तं लवणगुणे—'विष्यन्दनादुष्णभावाद् दोषाणाञ्च विपाचनात्। संस्कारपाचनाच्चेदं वातरोगेषु शस्यते॥' इति।

स्रवण।

Oozing.

विसूचिकाघ्नम् (च. चि. २६.२०)

विसूचिकां हन्तीति, यथा—'द्विरुत्तरं हिङ्गु वचाग्निकुष्ठं सुवर्चिका चैव विडङ्गचूर्णम्। सुखाम्बुनानाहविसूचिकार्तिहृद्रोगगुल्मोर्ध्व-समीरणघ्नम्॥' इति। विसूचिकालक्षणं माधवोक्तं यथा—'सूचीभिरिव गात्राणि तुदन् संतिष्ठतेऽनिलः। यत्राजीर्णेन सा वैद्यैर्विसूचीति निगद्यते॥' इति।

विसूचिकानाशक।

Relieving visūcikā (needling pain, cholera)

विस्रम् (सु. सू. ४५.३७)

आमगन्धि, यथाऽमरः—'विस्रं स्यादामगन्धि यत्' इति।

आमगन्धयुक्त।

Having fishy smell.

विस्रंसनम् (च. वि. १.१८)

सारणम्, वातादीनामधः प्रेरणम्। लवणकर्म। यथोक्तं— 'तद्रोचनपाचनोपक्लेदनविस्रंसनार्थ-मुपयुज्यते' इति।

वात आदि को नीचे की ओर ले जाना।

Carrying wind etc down, carminative, laxative.

विस्रंसनसमर्थम् (च. वि. १.१८)

सारकम्।

सारक।

Laxative.

विहतसन्धानम् (च. सू. १.१०८)

विहतस्य क्षतस्य सन्धानं संश्लेषणम्। क्षीरकर्म।

क्षत का सन्धान।

Promoting union in injured part.

वीर्यम् (च. सू. २६.६५)

शक्तिः; चरके यथा—'येन कुर्वन्ति तद् वीर्यम्', 'वीर्यं तु क्रियते येन या क्रिया' इति च। 'द्रव्यकर्तृके कर्मणि करणभूतो द्रव्यगुणो वीर्यम्' इति बोपदेवः सिद्धमन्त्रप्रकाशे; द्रव्यगुणसूत्रे तु 'वीर्यं शक्तिः क्रियासाधनम्' इति।

शक्ति। Potency.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वीर्यकरी (सु. सू. ६.१५)
वीर्यं शक्तिः (ड०), तत्करी ।
शक्तिप्रद ।
Energizer.

वीर्यदम् (च. सि. १.३०)
शक्तिप्रदम्, पौरुषप्रदं वा ।
अनुवासनकर्म ।
शक्तिप्रद, शुक्रप्रद ।
Energizer, semen-promoting.

वीर्यप्रदम् (च. सू. २७.१९४)
शक्तिप्रदम् । मद्यकर्म ।
शक्तिप्रद ।

वीर्यविरुद्धम् (सु. सू. २०.१६)
वीर्यतो विरुद्धम् यथा –'मधुराम्लौ रसवीर्यविरुद्धौ मधुरलवणौ च' इति ।
वीर्य में विरुद्ध ।
Antagonist in virya (potency).

वीर्योपरोधः (च. सू. २६.८४)
वीर्यस्य शक्तेः उपरोधः भ्रंशः । वैरोधिकाहारकर्म ।
शक्ति का ह्रास ।
Detrioration of energy.

वीर्योष्णः (च. सू. २६.६८)
वीर्येणोष्णः (स्पर्शेनापि) यथा चित्रकः । वाग्भटेऽपि 'वीर्योष्णैरुष्णसंस्पर्शैस्तगरागुरुकुङ्कुमैः' इत्यादि (अ. हृ. चि. १.१३७) ।
वीर्य से उष्ण ।
Hot by potency.

वीसर्पनाशनः (च. चि. २१.५५)
वीसर्पं नाशयतीति ।
वीसर्पनाशक ।
Alleviating erysipelas.

वीसर्पनिवारणः (च. चि. २९.१३५)
वीसर्पनाशनः ।
Alleviating erysipelas.

वीसर्पनुत् (च. चि. २१.५०)
वीसर्पनाशनः ।
वीसर्पनाशन ।

वीसर्पशान्तिः (च. चि. २१.५६)
वीसर्पशमनम् ।
वीसर्पशामक ।
Pacifying erysipelas.

वृत्तिकरम् (च. सू. २५.४०)
शरीरस्थितिकरम् (चक्र०), यथा–'अन्नं वृत्तिकराणाम् (अग्र्यम्)' इति ।
शरीर को स्थित रखने वाला ।
Maintaining body.

वृषता (च. सू. १६.१८)
पौरुषम् । संशोधनफलम् ।
पौरुष ।
Virility, sexual potency.

वृष्यम् (सु. सू. ४५.४९)
वृष्यं शुक्रजनकम् (ड०), वाजीकरणं वा ।
शुक्रल, वाजीकरण ।
Semen-promoting, aphrodisiac.

वृष्यतमः (च. सि. १२.१८(११))
अतिशयेन वृष्यः ।
अधिकतम वृष्य ।
Aphrodisiac in highest degree.

वेदनापहः (सु. सू. १८.६)
वेदनां पीडामपहन्तीति, वेदनाशामक इत्यर्थः ।
वेदनाशामक ।
Analgesic.

वेदनाशमनम् (सु. सू. ५.४२)
वेदनां शमयतीति, यथा–'या वेदना शस्त्रनिपातजाता तीव्रा शरीरं प्रदुनोति जन्तोः । घृतेन सा शान्तिमुपैति सिक्ता कोष्णेन यष्टीमधुकान्वितेन ॥' इति ।
वेदनाशामक ।
Analgesic.

वेदनास्थापनः (च. सू. ४.८)
वेदनायां संभूतायां तां निहत्य शरीरं प्रकृतौ स्थापयतीति वेदनास्थापनमिति चक्रः, वेदनां स्पर्शानुभूतिं प्रकृतौ स्थापतीति वा । वेदनास्थापनो महाकषायो यथा– 'शालकट्फलकदम्बपद्मकतुम्बमोचरसशिरीषवञ्जुलैलवालुकाशोका इति दशेमानि वेदनास्थापनानि भवन्ति' इति ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वेदनाशामक, स्पर्शसंज्ञास्थापन।

Analgesic, aesthetic (restoring mormal sensation).

वेदनोपशमः (सु. चि. १.१७)

पीडाशमनम्।

पीड़ा की शान्ति।

वेपथुनाशनः (सु. चि. २४.८७)

वेपथुः कम्पः, तं नाशयतीति।

कम्पनाशक।

Removing shivering.

वैमल्यम् (च. सू. ५.६२)

निर्मलत्वं, प्रसाद इति यावत्।

स्वच्छता, पवित्रता।

Cleanness, purity.

वैलक्षण्यम् (च. सू. २६.३३)

पृथक्त्वविशेषः, जातिगतभेदतः लक्षणवैभिन्न्यम्, यथा गौरश्वाद् विलक्षणोऽतः पृथक्, सैरेयकश्च वासकात् पृथक् वैलक्षण्यात्।

जातिगत पार्थक्य।

Class separateness.

वैवर्ण्यकारी (सु. चि. २४.८६)

वैवर्ण्यं वर्णविकारं कर्तुं शीलमस्येति, वर्णविकारकर इत्यर्थः।

वर्णविकारजनक।

Causing abnormal complexion.

वैवर्ण्यकृत् (सु. चि. २४.८४)

वर्णविकारकरः।

वैवर्ण्यकारी।

वैशद्यम् (च. सू. २२.११)

विशदस्य भावः, रूक्षणोपक्रमस्य कार्यम्।

पैच्छिल्यराहित्य

Non-sliminess.

वैशद्यकरम् (सु. सू. ४१.४ (४))

वैशद्यं करोतीति। वायवीयद्रव्यकर्म।

वैशद्यजनक।

Causing non-sliminess.

वैशद्यकारकः (च. चि. ३०.१२२)

वैशद्यकरः, यथा– 'कासीसं त्रिफलां कांक्षी समङ्गाम्रास्थि धातकी। पैच्छिल्ये क्षौद्रसंयुक्तश्चूर्णो वैशद्यकारकः।' इति।

वैशद्यकर।

वैशेषिकगुणाः (चक. च. सू. १.४९)

'सार्थाः गुर्वादयो बुद्धिः' इत्यस्य व्याख्यायां चक्रो वक्ति– 'अनेन त्रिविधा अपि वैशेषिकाः सामान्या आत्मगुणाश्चोद्दिष्टाः' इति। वैशेषिकत्वञ्च विशिष्टभूताश्रितत्वं विशिष्टेन्द्रियग्राह्यत्वञ्च। ते च शब्दस्पर्शरूपरसगन्धा इति।

वैशेषिक गुण।

Specific property.

वैस्वर्यनुत् (च. चि. २६.२१३)

वैस्वर्यं स्वरभेदं हन्तीति।

स्वरभेदनाशक।

Alleviating hoarseness of voice.

व्यक्तलवणम् (च. सू. ६.३७)

प्रकृष्टलवणम्।

जिसमें लवण व्यक्त हो।

Prominently salty.

व्यक्तस्नेहम् (च. सू. ६.३७)

सुस्निग्धम्।

सुस्निग्ध।

Prominently unctuous.

व्यक्ताम्लम् (च. सू. ६.३७)

प्रकृष्टाम्लम्।

जिसमें अम्ल रस सुस्पष्ट हो।

Prominently sour.

व्यवायवर्धनम् (सू. सू. ४६.९७)

वाजीकरणम्।

मैथुनशक्तिवर्धक।

Improving sexual potency.

व्यवायि (च. सू. १३.९८)

अखिलदेहव्याप्तिपूर्वकपाकगामि (चक्रः), 'व्यवायी चाखिलं देहं व्याप्य पाकाय कल्पते' इति (सु. सू. ४६.५२३); तथैव शार्ङ्गधरोऽपि 'पूर्वं व्याप्याखिलं

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कायं ततः पाकं च गच्छति । व्यवायि तद् यथा भङ्ग फेनञ्चाहिसमुद्भवम् ॥' इति (शा. स. १.४.१९) ।

शरीर में शीघ्र व्याप्त हो जाने वाला ।

Easily assimilable after ingestion or application.

व्याधिकरः (च. सू. २५.४०)

रोगजनकः, यथा 'मिथ्यायोगो व्याधिकराणाम् ' इति ।

रोगजनक ।

Pathogenic.

व्रणमार्दवशमनम् (च. चि. २५.१०९)

व्रणस्य मार्दवं शमयतीति ।

व्रण की मृदुता का शामक ।

Removing softness of wound.

व्रणरोपणम् (च. चि. २१.९६)

व्रणस्य रोपणम्, यथा–'दूर्वास्वरससिद्धं च घृतं स्याद् व्रणरोपणम्' इति । (द्र. -रोपणम्)

व्रणरोपण ।

Wound-healing.

व्रणशैथिल्यकरम् (च. चि. २५.१०८)

व्रणे शैथिल्यं करोतीति ।

व्रण में शैथिल्य लाने वाला ।

Causing slackness in wound.

व्रणशैथिल्यप्रसाधनः (च. चि. २५.११०)

व्रणे शैथिल्ये प्रसाधयति प्रकर्षेणापादयतीति, यथा– 'लोध्रन्यग्रोधशुङ्गानि खदिरस्त्रिफला घृतम् । प्रलेपो व्रणशैथिल्यसौकुमार्यप्रसाधनः ॥' इति ।

व्रणशैथिल्यकर ।

व्रणशैथिल्यशमनम् (च. चि. २५.१०९)

व्रणे शैथिल्यं शमयति हरतीति ।

व्रण की शिथिलता को दूर करने वाला ।

Removing slackness of wound.

व्रणशोधनः (च. चि. २५.८५)

व्रणं शोधयति पूयादिकमपाकृत्य शुद्धीकरोतीति, यथा– 'तिलकल्कः सलवणो द्वे हरिद्रे त्रिवृद्घृतम् । मधुकं निम्बपत्राणि प्रलेपो व्रणशोधनः ॥' इति ।

व्रणशोधक ।

Wound-cleansing.

व्रणसौकुमार्यप्रसाधनः (च. चि. २५.११०)

व्रणे सौकुमार्यं कोमलतां प्रसाधयति प्रकर्षेणापादयतीति ।

व्रण में कोमलता लाने वाला ।

Causing softness in wound.

व्रणहा (अ. कृ. सू. ६.३२)

व्रणं हन्तीति, व्रणहर इत्यर्थः, यथोक्तं– 'बृंहणः प्रीणनो वृष्यश्चक्षुष्यो व्रणहा रसः' इति ।

व्रणनाशक ।

Alleviating wound.

व्रणावसादनम् (च. चि. २५.१००)

व्रणस्यावसादनमुत्सन्नमांसक्षयकरम् (चक्र०) ।

व्रण का अवसादक ।

Wound-depressing.

व्रणोत्सादनम् (च. चि. २५.९९)

निम्नव्रणस्योत्थापनम् ।

व्रण को उठाने वाला ।

Wound-elevating.

व्रण्यः (सु. सू. ३८.३४)

व्रणेभ्यो हितो व्रण्यः । (ड०)

व्रण के लिए हितकर ।

Wholesome for wound.

श

शकृदानुलोम्यम् (च. चि. १४.१०८)

पुरीषानुलोमनम् ।

पुरीषानुलोमन ।

Laxative.

शक्तिरक्षणम् (च. चि. १४.८३)

प्राप्तशक्तेः रक्षणम्, यथाऽर्शसि तक्रविधाने– 'शक्त्यागमनरक्षार्थं दाढ्यर्थमनलस्य च । बलोपचयवर्णार्थमेष निर्दिश्यते क्रमः ॥' इति ।

शक्ति का रक्षण ।

Preservation of energy.

शक्त्यागमनम् (च. चि. १४.८३)

शरीरे शक्तेरागमनं प्रापणम्, शक्तियोग इत्यर्थः । शक्तेरागमनं योगः; तद्रक्षणञ्च क्षेमः; इत्थं योगक्षेमौ शक्तेः ।

शक्ति की प्राप्ति । Acquisition of energy.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शब्दः (च. सू. ८.११)

श्रोत्रेन्द्रियग्राह्य आकाशाश्रितो वैशेषिकगुणः, यथोक्तं— 'महाभूतानि खं वायुरग्निरापोऽनिलस्तथा। शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुणाः ॥' इति (च. शा. १.२७)।

शब्द। Sound.

शमनम् (अ. हृ. सू. १.१६)

यत् कुपितान् वातादीन् दोषान् शमयति तच्छमनम्, यथा तैलं घृतं माक्षिकमिति (अ. द.) उक्तञ्च— 'शमनं कोपनं स्वस्थहितं द्रव्यमिति त्रिधा' इति।

शामक।

Pacifying.

शमनीयम् (च. चि. ३.१६०)

शमने हितं शमनीयम्। शमनीयमिति पक्वदोषोपशमनम् (चक्रः), यथोक्तं— 'पाचनं शमनीयं वा कषायं पाययेद् भिषक्। ज्वरितं षडहेऽतीते लघ्वन्नप्रतिभोजितम् ॥ इति।

शामक।

Pacifying.

शरीरक्लेदोपयोक्ता (च. सू. २६.४३)

शरीरक्लेदस्याचूषकः (चक्रः)। कषायरसकर्म।

शरीर की आर्द्रता का उपयोग करने वाला।

Consuming the body moisture.

शरीरतापकरः (च. सू. २६.४३(४))

शरीरे तापं करोतीति। कटुरसस्यात्युपयुज्यमानस्य कर्म।

शरीरतापजनन।

Generating body-heat.

शरीरधातुव्यूहकरः (च. सू. २७.३)

शरीरे धातुव्यूहं करोतीति, धातुव्यूहो धातुसंघातः (चक्रः)। अन्नपानकर्म।

शरीर में धातुसमूह का जनक।

Producing aggregate of dhātus in body.

शरीरबलप्रदः (च. सू. २५.५०)

शरीरबलं प्रददातीति। आसवगुणः।

शारीर बल देने वाला।

Promoting physical strength.

शरीरबलसन्धानम् (च. सू. ५.९४)

शरीरस्य बलेन सन्धानं योजनं करोतीति (चक्र०)।

शरीर में बल लाने वाला।

Restoring physical strength.

शरीरोपघातकरम् (च. वि. २.७)

शरीरस्योपघातं विनाशं करोतीति।

शरीरविनाशकरः।

शरीरविनाशक।

Destroying the body.

शर्करानाशनः (सु. सू. ३८.२१)

शर्करां नाशयतीति।

शर्करानाशक।

Alleviating gravels.

शर्कराप्रच्यावनम् (च. चि. २६.६९)

शर्करां प्रच्यावतीति।

शर्करा को बाहर निकालना।

Expelling gravels.

शाखावातहरम् (च. सू. २७.२२१)

शाखासु रक्तादिधातुषु त्वचि च बाह्ये रोगमार्गे स्थितं प्रकुपितवातं हरति शमयतीति, यथोक्तं—'बल्यं स्थैर्यकरं सर्वमुष्णं चैकशफं पयः। साम्लं सलवणं रूक्षं शाखावातहरं लघु ॥' इति।

शाखागत वात का शामक।

Pacifying vāta located in dhātus and skin.

शिरेःप्रतिपूरणम् (सु. चि. २४.२६)

शून्यभूतस्य शिरसः पुनः पूरणम्। (ड०)

शिर का पुनः आपूरण।

Restoring normalcy to head by removing feeling of vacantness.

शिरः शूलघ्नम् (सु. चि. २४.२९)

शिरः पीडाहरम्।

शिरःशूलहर।

Relieving headache.

शिरःशूलनुत् (च. चि. ८.७७)

शिरःशूलहरम्।

शिरःशूलहर।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शिरःशूलप्रशमनम् (सु. सू. ४५.११२)

शिरःशूलं प्रशमयतीति। तिलतैलगुणः।

शिरःशूलशामक।

Relieving headache.

शिरस्तृप्तिः (सु. चि. २४.२६)

शिरसस्तर्पणम्।

शिर का तर्पण।

Satiation of head.

शिरोरोगापहम् (च. चि. २६.१६४)

शिरसो रोगानपहन्तीति। मायूरघृतगुणः।

शिरोरोगनाशक।

Alleviating head-diseases.

शिरोऽर्तिनुत् (च. चि. २६.१६०)

शिरःशूलहरम्, यथा—'रास्नास्थिरादिभिः सिद्धं सक्षीरं नस्यमर्तिनुत्' इति।

शिरःशूलहर।

शिरोलाघवम् (च. सि. १.५१)

शिरसो लघुत्वम्।

शिर मे लघुता।

Lightness in head.

शिरोविरेकः (च. चि. २१.१३१)

शिरोविरेचनम्।

शिरोविरेचन।

Head-evacuation.

शिरोविरेचनम् (सु. सू. ३९.६)

नस्यप्रयोगेण शिरःस्थं श्लेष्माणं विरेचयति स्रावयतीत्यर्थः (ड०), यथा—'मुखपाके सिराकर्म शिरःकायविरेचनम्' इति (च. चि. २६.२०४); 'प्रत्यक्पुष्पा शिरोविरेचनानाम् (अग्र्या)' इति।

(च. सू. २५.४०)

शिरोविरेचन करने वाला।

Causing head-evacuation, errhine.

शिरोविरेचनोपगः (च. सू. ४.८)

शिरोविरेचने उपगः सहायः, यथा—'ज्योतिष्मतीक्षवकमरिचपिप्पलीविडङ्गशिग्रुसर्षपापामार्गतण्डुलश्वेतामहाश्वेता इति दशेमानि शिरोविरेचनोपगानि भवन्ति' इति (शिरोविरेचनोपगो महाकषायः)। शिरोविरेचनोपगे तु शिरोविरेचनप्रधानान्येव द्रव्याणि बोद्धव्यानि (चक्र०)।

शिरोविरेचन में सहायक।

Sub-errhine.

शिवम् (च. चि. ३.१४५)

भद्रं, कल्याणकरमित्यर्थः, नैव कदाचिद्धानिकरमिति। यथोक्तमुदरचिकित्सिते—'दद्यान्मूत्रयुतं क्षीरं दोषशेषहरं शिवम्' इति।

लाभकर, हानिरहित। Wholesome, safe.

शिशिरस्पर्शम् (अ. हृ. सू. ५.७७)

शिशिरः शीतः स्पर्शो यस्य तत्, स्पर्शतः शीतं न तु वीर्ये इत्यर्थः, यथोक्तं 'दीपनं शिशिरस्पर्शं पाण्डुदृक्क्रिमिनाशनम्। गुडेक्षुमद्यमार्द्वीकशुक्तं लघु यथोत्तरम्॥' इति।

स्पर्श में शीत।

Cold in touch.

शीघ्रः (च. वि. ८.९८)

शीघ्रगतिः, शीघ्रकारी च।

वातगुणः। क्षारश्च शीघ्रकारी (सु. सू. ११.१६)।

शीघ्रगामी, शीघ्रकारी।

Fast, fastly acting.

शीघ्रपुंस्त्वदः (च. सू. २७.२४)

शीघ्रं पुंस्त्वं वृषत्वं ददातीति, यथा 'बल्यो बहुमलः पुंस्त्वं शीघ्रं माषं ददाति च' इति। अत्र चक्रः—'पुंस्त्वं शुक्रम्। शीघ्रमिति वचनेन शुक्रस्तुतिकरत्वलक्षणमपि वृष्यत्वं माषस्य दर्शयति, शुक्रस्तुतिकरञ्च वृष्यशब्देनोच्यत एव, वचनं हि— 'शुक्रस्तुतिकरं किञ्चित् किञ्चित् शुक्रविवर्धनम्। स्तुतिवृद्धिकरं किञ्चित् त्रिविधं वृष्यमुच्यते॥' इति, तदेवं सम्पूर्णवृष्यत्वं माषे बोद्धव्यम्' इति।

शीघ्र वाजीकरण।

Instantaneously aphrodisiac.

शीघ्रविरेचनः (च. क. ११.८)

शीघ्रं विरेचयतीति।

शीघ्र विरेचन कराने वाला।

Immediately purgative.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शीघ्रशुक्रविरेचनम् (सु. सू. १४.१७)

वाजीकरण्यस्त्वोषधयः स्वबलगुणोत्कर्षाच्छुक्रं शीघ्रं विरेचयन्ति। तत्र संकल्पपादलेपविशिष्टकान्तास्पर्शादयः स्वबलोत्कर्षात् स्वप्रभावोत्कर्षादित्यर्थः; घृतक्षीरादयः स्वगुणोत्कर्षात् स्वस्नेहाद्युत्कर्षादित्यर्थः; माषादयः स्वबलगुणोत्कर्षात् स्वप्रभावस्नेहाद्युत्कर्षादित्यर्थः। (ड०)

शीघ्र शुक्रपात कराने वाला।

Causing immediate discharge of semen.

शीतः (च. शा. ६.१०)

उष्णविपरीतः, गुर्वादिगुणविशेषः।

ठंढा। Cold.

शीतज्वरप्रशमनम् (च. चि. ३.२६७)

शीतयुक्तं ज्वरं प्रशमयतीति।

शीतयुक्त ज्वर का शामक।

Pacifying fever with rigour.

शीतज्वरापहः (च. चि. ३.२६८)

शीतज्वरमपहन्तीति।

शीतज्वरनाशक।

Alleviating fever with rigour.

शीततरम् (च. सू. २७.२१९)

अपेक्षयाऽधिकं शीतम्, यथा—'महिषीणां गुरुतरं गव्याच्छीततरं पयः' इति।

शीततर। Colder.

शीतनाशनः (सु. चि. २४.८७)

शैत्यहरः।

शीतनाशक।

Removing cold.

शीतप्रशमनः (च. सू. ४.८)

शीतं प्रशमयतीति, यथा—'तगरागुरुधान्यकशृङ्गवेरभूतीकवचाकण्टकार्यग्निमन्थश्योनाकपिप्पल्य इति दशेमानि शीतप्रशमनानि भवन्ति' इति शीतप्रशमनो महाकषायः।

शीतशामक।

Pacifying cold.

शीतलम् (च. सू. ६.२१)

शीतगुणोऽस्यास्ति, शीतं लाति वा।

शीतल, ठंढा।

Cold, causing cold.

शीतवीर्यम् (अ. हृ. चि. १.१३०)

वीर्यतः शीतम्, यथा चन्दनादिकम्।

वीर्य में शीत।

Cold in potency.

शीतस्पर्शः (च. चि. ४.१०६)

स्पर्शतः शीताः। (द्र. -शिशिरस्पर्शः)

स्पर्श में शीत।

Cold in touch.

शीतापनयनम् (च. सू. २५.४०)

शैत्यहरम्। 'रास्नागुरुणी शीतापनयनप्रलेपनानाम् (अग्र्ये)' इति।

शीतनिवारक।

Alleviating cold.

शीतीकरणम् (च. सू. २२.३२)

उष्णतामपाकृत्य शैत्यापादनम्। स्तम्भनकर्म।

ठंढा करना।

Refrigeration.

शीर्षविरेचनम् (च. सू. १.७९)

शिरोविरेचनम्, यथा 'श्वेता ज्योतिष्मती चैव योज्या शीर्षविरेचने' इति।

शिरोविरेचन।

शुक्रकरम् (च. चि. २८.९४)

शुक्रजनकम्, यथा—'प्रहर्षोऽन्नञ्च शुक्रस्थे बलशुक्रकरं हितम्' इति।

शुक्रजनक।

Semen-promoting.

शुक्रकृत् (अ. हृ. सू. ६.६१)

शुक्रजनकः।

शुक्रजनक।

शुक्रक्षयकरम् (सु. सू. ४६.२१४)

शुक्रक्षपणम्, यथा 'दृष्टिशुक्रक्षयकरं कालिन्दं कफवातकृत्' इति।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शुक्र को क्षीण करने वाला।

Decreasing semen.

शुक्रघ्नः (च. सू. २७.४)

शुक्रं हन्तीति, शुक्रनाशनः, यथा 'दृष्टिशुक्रघ्नः क्षारः' इति।

शुक्रनाशक।

Causing loss of semen.

शुक्रजनकप्रवर्त्तकम् (शा. सं. १.४.१६)

शुक्रस्य जनकं प्रवर्त्तकं रेचकं च, यथा—'दुग्धं माषाश्च भल्लातफलमज्जामलानि च। प्रवर्तकानि कथ्यन्ते जनकानि च रेतसः॥' इति।

शुक्र का जनक और प्रवर्त्तक।

Promoting as well as propelling semen.

शुक्रजननः (च. सू. ४.८)

शुक्रं जनयतीति, यथा— 'जीवकर्षभककाकोलीक्षीरकाकोलीमुद्गपर्णीमाषपर्णीमेदावृद्धरुहाजटिलाकुलिङ्गा इति दशेमानि शुक्रजननानि भवन्ति' इति शुक्रजननो महाकषायः।

शुक्रजनक।

Semen-promoting.

शुक्रदोषनाशनम् (च. चि. २९.१२०)

शुक्रदोषान्नाशयतीति। शुक्रदोषाः यथा— 'फेनिलं तनु रूक्षञ्च विवर्णं पूति पिच्छिलम्। अन्यधातूपसंसृष्टमवसादि तथाऽष्टमम्' इति (च. चि. ३०.१३९)।

शुक्रदोषों का नाशक।

Removing defects of semen.

शुक्रदोषहराः (सु. शा. २.१५)

शुक्रदोषान् हरन्तीति।

शुक्रदोषनाशक।

शुक्रदोषहत् (सु. सू. ३८.२१)

शुक्रदोषहरः, यथोक्तं 'मुष्ककादिर्गणो ह्येष मेदोघ्नः शुक्रदोषहत्' इति।

शुक्रदोषनाशक।

शुक्रनाशनम् (सु. सू. ४६.१५५)

शुक्रहरम्, यथा 'त्रिदोषविष्टम्भकरं लकुचं शुक्रनाशनम्' इति।

शुक्रनाशक।

Causing loss of semen.

शुक्रनुत् (च. सू. २७.२५)

शुक्रनाशनः, यथा—' राजमाषः सरो रुच्यः कफशुक्राम्लपित्तनुत्' इति।

शुक्रनाशक।

शुक्रप्रदम् (च. सू. २७.१३९)

शुक्रं प्रकर्षेण ददाति जनयतीति, प्रकृष्टशुक्रजनन इत्यर्थः. यथा— 'पक्वमाम्रं जयेद्वायुं मांसशुक्रबलप्रदम्' इति।

शुक्रजनन।

शुक्रप्रदोषघ्नम् (च. चि. २८.१४३)

शुक्रस्य प्रदोषान् विकारान् हन्तीति।

शुक्रदोषहरः।

शुक्रदोषहर।

शुक्रप्रवर्त्तिनी (शा. सं. १.४.१७)

शुक्ररेचनोद्दीपनी, यथा 'प्रवर्त्तिनी स्त्री शुक्रस्य' इति।

शुक्र को प्रवृत्त करने वाली।

Propelling semen.

शुक्ररेचनम् (शा. सं. १.४.१७)

शुक्रं रेचयति बहिः प्रेरयतीति, यथा—'शुक्रस्य रेचनं बृहतीफलम्' इति।

शुक्र को बाहर निकालने वाला।

Causing discharge of semen.

शुक्रलः (च. सू. २६.६१)

शुक्रजननः,. यथा— 'मधुरः सृष्टविण्मूत्रो विपाकः कफशुक्रलः' इति।

शुक्रजनन।

शुक्रवर्धनाः (च. चि. ११.७७)

शुक्रजननाः।

शुक्रजनन।

शुक्रविरेककृत् (अ. हृ. सू. ६.२१)

शुक्रविरेचनः, यथा माषगुणे 'गुरूष्णोऽनिलहा स्वादुः शुक्रवृद्धिविरेककृत्' इति। शुक्रस्य वृद्धिं, शुक्रस्यैव विरेकं बहिःप्रेरणं करोतीत्यरुणदत्तः।

शुक्रविरेचन।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शुक्रविरेचनम् (च. चि. २८.९४)

शुक्रं विरेचयति बहिः निःसारयतीति, यथा– 'विबद्धमार्गं दृष्ट्वा वा शुक्रं दद्याद् विरेचनम्' इति। अत्र 'विरेचनं' शुक्रविरेचनमेव प्रसङ्गात्।

शुक्ररेचन।

शुक्रविवर्धनः (सु. सू. ४५.७९)

शुक्रं विशेषेण वर्धयतीति, यथा– 'दध्नः सरो गुरुर्वृष्यो विज्ञेयोऽनिलनाशनः। वह्नेर्विधमनश्चापि कफशुक्रविवर्धनः॥' इति।

शुक्र को विशेष रूप से बढ़ाने वाला।

Specifically promoting semen.

शुक्रविशोधनम् (सु. सू. ४५.११४)

शुक्रं विशोधयतीति। एरण्डतैलगुणः।

शुक्रशोधक।

Purifying semen (semen-depurant)

शुक्रवृद्धिकृत् (अ. हृ. सू. ६.२१)

शुक्रवर्धनः।

शुक्र को बढ़ाने वाला।

शुक्रशोधनः (च. सू. ४.८)

शुक्रं शोधयति दोषानपास्य निर्मलीकरोतीति। शुक्रशोधनो महाकषायो यथा– 'कुष्ठैलवालुक-कट्फल समुद्रफेन कदम्बनिर्यासेक्षुकाण्डेक्षि-क्षुरकवसुकोशीराणीति दशेमानि शुक्रशोधनानि भवन्ति' इति।

शुक्रशोधन।

Semen–depurant.

शुक्रशोषणी (शा. सं. १.४.१८)

शुक्रं शोषयति क्षपयतीति, यथा– 'शोषणी च हरीतकी' इति।

शुक्रशोषक।

Drying semen.

शुक्रस्तम्भकम् (शा. सं. १.४.१८)

शुक्रं स्तभ्नाति निरुणद्धि विरेकादिति, यथा– 'जातीफलं स्तम्भकं च' इति। शुक्रविरेचनाद् विपरीतम्।

शुक्र को रोकने वाला।

Holding back semen; checking discharge of semen.

शुक्रहा (च. सू. २६.६१)

शुक्रनाशनः, यथा–'शुक्रहा बद्धविण्मूत्रो विपाको वातलः कटुः' इति।

शुक्रनाशक।

शुक्रापहाः (च. सू. २७.२६)

शुक्रनाशनाः, यथा कुलत्थगुणे 'उष्णाः- कषायाः पाकेऽम्लाः कफशुक्रानिलापहाः' इति।

शुक्रनाशक।

शुक्राभिवर्धनः (च. सू. २६.४३(१))

शुक्रमभिवर्धयतीति, प्रकृष्टशुक्रजनन इत्यर्थः। मधुररसकर्म।

प्रकृष्ट शुक्रजनक।

Excellently semen–promoting.

शुक्राशयशोधनम् (च. चि. २६.७२)

शुक्राशयं शोधयतीति, यथा रेतोऽभिघातजे कृच्छ्रे– 'विहङ्गमांसानि च बृंहणाय बस्तींश्च शुक्राशय-शोधनार्थम्' इति।

शुक्राशय का शोधन करने वाला।

Evacuating seminal vesicle.

शुचि (च. सू. ५.९९)

पवित्रम्।

पवित्र।

Pure, holy, clean.

शुषिरः (च. सू. १२.७)

शुषिश्छिद्रमस्यास्ति, रन्ध्रवानित्यर्थः। वातगुणः। शुषिरकरणं वातप्रकोपणस्य कर्म।

छिद्रयुक्त। Porous.

शुष्कः (च. सू. २७.२६६)

नीरसः धानादिः, मूलकादिश्च।

सूखा। Dry.

शूलघ्नी (च. चि. २५.७६)

१. शूलं पीडां हन्तीति, यथा– 'संसिद्धा समधूच्छिष्टा शूलघ्नी स्नेहशर्करा' इति।

वेदनाशामक। Analgesic.

२. उदरशूलं हन्तीति, यथा– 'पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

यवागूर्दीपनीया स्याच्छूलघ्नी चोपसाधिता ॥' इति ।

उदरशूलनाशक । Relieving colic.

शूलनाशनम् (च. सू. २७.३०२)

शूलं नाशयति शमयतीति, यथा बिडगुणे– 'तैक्ष्ण्यादौष्ण्याद् व्यवायित्वाद्दीपनं शूलनाशनम्' इति ।

उदरशूलनाशक ।

शूलनिवृत्तिः (च. चि. २९.१४०)

शूलनाशनम्, यथा– 'क्षीरपिष्टमुमालेपमेरण्डस्य फलानि च । कुर्याच्छूलनिवृत्त्यर्थं शताह्वामनिलेऽधिके ॥' इति ।

वेदनाशमन ।

Relief of pain.

शूलनुत् (च. चि. १५.१०४)

शूलनाशनम् ।

शूलनाशक ।

शूलप्रमर्दनी (सु. सू. ४५.१७७)

शूलहरी, यथा प्रसन्नागुणे– 'छर्द्यरोचकहृत्कुक्षितोदशूलप्रमर्दनी ॥' इति ।

शूलनाशन ।

शूलप्रशमनः (च. सू. ४.८)

शूलं प्रशमयतीति । शूलप्रशमनो महाकषायो यथा– 'पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचाजमोदाजगन्धाजाजीगण्डीराणीति दशेमानि शूलप्रशमनानि भवन्ति' इति ।

शूलशामक ।

Relieving colic, Intistinal antispasmodic.

शूलविमोक्षणम् (च. चि. ५.७२)

शूलनाशनम् ।

उदरशूलनाशक ।

शूलहरम् (सु. उ. ४२.१२२)

शूलनाशनम् ।

शूलनाशक ।

शूलहरणम् (चक्र०, च. सू. २६.७०)

शूलनाशनम् ।

शूलनाशक ।

शूलहृत् (च. चि. १४.५६)

पीडाहरः ।

वेदनाशामक ।

शैत्यम् (च. नि. १.३७)

शीतस्य भावः शैत्यम् ।

शैत्य । Coldness.

शैथिल्यकृत् (सु. सू. ४२.१०(३))

मांसादीनां शिथिलतां करोतीति । लवणरसकर्म ।

शिथिलता उत्पन्न करने वाला ।

Causing slackness.

शैथिल्याभिनिर्वृत्तिकरम् (च. वि. १.१८)

शिथिलताजनकम् ।

शैथिल्यजनक ।

शोकनाशनः (च. सू. २५.५०)

शोकं नाशयतीति । आसवगुणः ।

शोकहर ।

Anti–anxiety, tranquiliser.

शोकविनोदकम् (अ. हृ. चि. ७.७३)

शोकहरम् ।

शोकनाशक ।

शोकापहम् (च. सू. २७.१९४)

शोकहरम् ।

शोकहर ।

शोणितपित्तकृत् (सु. सू. ४६.३८)

रक्तपित्तकरः, यथा वन्यकुलत्थगुणे– 'आनाहमेदोगुदकीलहिक्काश्वासापहः शोणितपित्तकृच्च' इति ।

रक्तपित्तजनक ।

Causing raktapitta (intrinsic haemorrhage).

शोणितपित्तकोपी (सु. सू. ४६.४९)

रक्तपित्तं कोपयति, तदाख्यरोगं जनयतीति, यथा सिद्धार्थकगुणे–'पाके रसे चापि कटुः प्रदिष्टः सिद्धार्थकः शोणितपित्तकोपी' इति ।

रक्तपित्तकोपक ।

Aggravating rakta-pitta.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शोणितप्रदूषणम् (च. सू. २६.८२)

शोणितं रक्तं प्रकर्षेण दूषयतीति। वैरोधिकाहारदोषः।

रक्तदूषक।

Vitiating blood.

शोणितवर्धनम् (च. चि. ११.३०)

रक्तवर्धनम्।

रक्तवर्धक।

Haematinic.

शोणितसङ्घातभेदनः (च. सू. २६.४३(४))

शोणितसङ्घातं रक्तपिण्डं भिनत्ति विदारयतीति। कटुरसकर्म।

पिण्डित रक्त को तोड़ने वाला।

Breaking blood-clot, anti-coagulant.

शोणितस्थापनः (च. सू. ४.८)

शोणितस्य दुष्टस्य दुष्टिमपहृत्य प्रकृतौ शोणितं स्थापयतीति शोणितस्थापनम् (चक्रः)। शोणितस्थापनो महाकषायो यथा— 'मधुमधुक-रुधिरमोचरसमृत्कपाललोध्रगैरिकप्रियङ्गुशर्करा-लाजा इति दशेमानि शोणितस्थापनानि भवन्ति' इति।

रक्तस्थापन।

Restoring normalcy of blood, haemostatic.

शोणितास्थापनम् (सु. चि. १.४८)

शोणितातिप्रवृत्तिस्तम्भनम्। (ड०)

रक्तस्रावरोधक।

Haemostatic.

शोधनम् (अ. हृ. सू. १.२५)

१. शोधनं यत् कुपितान् दोषान् बहिः निःसार्य रोगोप्रशमनं करोति (अ. द.), यथोक्तं— 'शोधनं शमनञ्चेति समासादौषधं द्विधा' इति। 'शोधनं अधिकबहिर्निरसनेन दोषसाम्यकरम्, शमनन्तु अधिकक्षीणक्षपणवर्धनाभ्याम्' इति हेमाद्रिः।

मलों को बाहर निकालना।

Eliminating impurities and thereby making the body pure and healthy.

२. तद्वद् व्रणेऽपि पूयादिदोषाणामपाकरणं शोधनम्। (सु. सू. ४२.१०)

पूय आदि दोषों को हटा कर व्रण को स्वच्छ करना।

Cleaning wound by removing pus etc.

शोफघ्नम् (च. चि. २५.४०)

शोफं व्रणात्मकं हन्तीति, यथोक्तं व्रणचिकित्सिते— 'शोफघ्नं षड्विधं चैव शस्त्रकर्मावपीडनम्' इत्यादि। 'शोफघ्न उपक्रमो रक्तावसेकादिर्वक्ष्यमाण इति चक्रः। मध्वासवोऽपि शोफघ्नः। (सु. सू. ४५.१८९)

शोफ (व्रणशोथ) का नाशक।

Anti-inflammatory.

शोफजननम् (च. सू. २७.४)

शोफं जनयतीति यथा दधि।

शोफकारक।

Causing or aggravating inflammation.

शोफजित् (च. सू. २७.९१)

शोफघ्नम्, यथा—'कालशाकं तु कटुकं दीपनं गरशोफजित्' इति।

शोफनाशक।

शोफनिर्वापणः (च. चि. २५.४६)

शोफस्य निर्वापणः दाहौष्ण्यशमनः (चक्रः), यथोक्तं— 'न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः। ससर्पिष्कैः प्रलेपः स्याच्छोफनिर्वापणः परम्॥' इति।

शोफ में दाह का शामक।

Pacifying heat in inflammation.

शोफनिवारणः (च. चि. २९.१३५)

शोफघ्नः।

शोफनाशक।

शोफनुत् (सु. चि. १८.१८)

शोफनाशनः, यथा लोहारिष्टगुणे— 'शोफनुद् गुल्मकृत् कुष्ठमेहपाण्ड्वामयापहः' इति।

शोफनाशक।

शोफप्रबाधनः (च. चि. ७.९२)

शोफं प्रबाधते रुणद्धीति, शोफरोधन इत्यर्थः।

शोफ को रोकने वाला।

Anti-inflammatary.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शोफप्रशमनः (च. सू. २५.४०)

शोफं प्रशमयतीति। तक्राभ्यासो ग्रहणीदोष-शोफार्शोघृतव्यापत्प्रशमनानाम् (अभ्यः)।

शोफशामक।

Pacifying inflammation.

शोफस्फोटनः (च. सू. २६.४३(३))

शोफं स्फोटयति विदारयतीति, शोफविदारण इत्यर्थः। लवणरसकर्म।

(पक्व) शोफ को विदीर्ण करना।

Tearing mature inflammation (abscess).

शोफहरम् (च. चि. ३.२३६)

शोफनाशनम्।

शोफनाशक।

शोफापहः (सु. सू. १८.६)

शोफमपहन्तीति, यथा—'प्रदेहो वातश्लेष्मप्रशमनः शोधनो रोपणः शोफवेदनापहश्च' इति।

शोफनाशक।

शोषकरः (च. चि. २५.४०)

शोषं तदाख्यरोगं करोति जनयतीति, शोषोत्पादक इत्यर्थः, यथा—'स्त्रीष्वतिप्रसङ्गः शोषकराणाम्' इति।

शोषजनक।

Causing consumption.

शोषघ्नम् (च. सू. २५.४०)

शोषं हन्तीति, यथा— 'अजाक्षीरं शोषघ्नस्तन्य-सात्म्यरक्तसांग्राहिकरक्तपित्तप्रशमनानाम्' इति।

शोषनाशक।

Alleviating consumption.

शोषणः (च. सू. २६.४३)

शोषयति क्लेदं धातूंश्चेति। कषायरसकर्म। मरिचमपि शोषणं, यथोक्तं मरिचगुणे—'छेदित्वाच्छोषणत्वाच्च दीपनं कफवातजित्' इति (च. सू. २७.२९८)।

आर्द्रताशोषक, धातुशोषक।

Drying moisture and dhātus.

शोषनाशनम् (सु. सू. ४५.१७३)

शोषहरम्, यथा मार्द्वीकगुणे—'लघुपाकि सरं शोषविषमज्वरनाशनम्' इति।

शोषनाशक।

शोषनुत् (च. चि. ८.१७१)

शोषहरम्।

शोषनाशक।

शोषहरम् (च. चि. ८.१६९)

शोषघ्नम्।

शोषनाशक।

शौषिर्यकरम् (सु. सु. ४१.४(५))

शुषिरस्य भावः शौषिर्यं, तत् करोतीति।

आकाशीयद्रव्यकर्म। (द्र. -शुषिरः)

शौषिर्यजनक।

Making porous.

श्यावत्वकरः (च. सू. २६.४३)

त्वचि श्यावत्वमापादयतीति, वाताधिक्यात्। अत्युपयुज्यमानकषायरसस्य कर्म।

श्यावताजनक।

Causing darkness in skin.

श्रमघ्नम् (च. सू. २७.७८)

श्रमहरम्।

श्रमहर।

श्रमघ्नी (च. सू. २७.२५३)

श्रमहरी, यथोक्तं—लाजपेया श्रमघ्नी तु क्षामकण्ठस्य देहिनः' इति।

श्रमनुत् (सु. चि. २४.७०)

श्रमहरम्।

श्रमहर।

श्रमविनोदकम् (अ. हृ. चि. ७.७३)

श्रमापनयनम्।

श्रमह[illegible]।

श्रमहरः (च. सू. ४.८)

श्रमः श्रान्तत्वानुभूतिः, तं हरतीति। श्रमहरो महाकषायः यथा— 'द्राक्षाखर्जूरप्रियालबदरदाडिम-फल्गुपरुषकेक्षुयवषष्टिका इति दशेमानि श्रमहराणि भवन्ति' इति।

श्रम (थकावट) को दूर करने वाला।

Removing tiredness, acopic.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

श्रमहा (अ. हृ. सू. ६.६६)

श्रमहरः ।

श्रमहर ।

श्रमापहम् (च. सू. २७.१९४)

श्रमहरम् । मद्यकर्म ।

श्रमहर ।

श्रमापहरम् (च. चि. १.२.३)

श्रमापनयनम् । रसायनकर्म ।

श्रमहर ।

श्रोत्रहिततमः (च. सू. २७.६४)

श्रोत्रायातिशयेन हितः ।

श्रोत्र के लिए अधिकतम हितकर ।

Most wholesome for ear.

श्लक्ष्णः (च. शा. ६.१०)

खरविपरीतः, गुर्वादिगुणविशेषः ।

चिकना । Smooth.

श्लेष्मकर्षी (च. सि. १.२८)

श्लेष्माणमधो कर्षतीति । निरूहगुणः ।

कफ को खींचने वाला ।

Drawing kapha downwards.

श्लेष्मपरिशोषणम् (च. वि. ३.४०)

श्लेष्माणं कफं परिशोषयतीति । उष्णोदककर्म ।

कफ का शोषण ।

Drying kapha.

श्लेष्मपित्तजननम् (च. सू. २५.४०)

श्लेष्माणं पित्तञ्च जनयतीति, कफपित्तवर्धकमित्यर्थः । माषाः श्लेष्मपित्तजननानाम् (अग्र्याः) ।

कफपित्तकारक ।

Increasing kapha and pitta.

श्लेष्मप्रकोपणम् (सु. सू. ४५.८८)

कफप्रकोपकम् ।

कफप्रकोपक ।

Aggravating kapha.

श्लेष्मप्रशमनः (च. सू. २६.४३)

कफशामकः । कषायरसकर्म ।

कफशामक ।

Pacifying kapha.

श्लेष्मप्रसेकि (सु. सू. ४६.२२४)

कफस्रावववर्धकम्, यथा—'स्वादुपाक्यार्द्रमरिचं गुरु श्लेष्मप्रसेकि च' इति ।

कफस्रावववर्धक ।

Increasing mucous secretion.

श्लेष्मलम् (च. सू. २७.४)

कफवर्धकम् ।

कफवर्धक ।

Increasing kapha.

श्लेष्मविकारनुत् (च. सू. २७.१९)

कफजरोगनाशकः, यथा यवगुणे— 'स्थैर्यकृत् सकषायश्च बल्यः श्लेष्मविकारनुत्' इति ।

कफरोगनाशक ।

Alleviating disorders of kapha.

श्लेष्मविलयनम् (च. चि. १३.१५७)

श्लेमाणं कफं विलाययति द्रवीकरोतीति, यथोदरचिकित्सिते— 'अरिष्टान् दापयेत् क्षारान् कफस्त्यानस्थिरोदरे । श्लेष्मणो विलयार्थं तु दोषं वीक्ष्य भिषग्वरः ॥' इति ।

कफ को विलीन करना ।

Liquifying kapha (and then eliminating).

श्लेष्मविवर्धनः (च. सू. १३.१७)

श्लेमाणं कफं विशेषेण वर्धयतीति ।

कफवर्धक ।

श्लेष्मविष्यन्दनम् (च. चि. १७.७३)

कफद्रवीकरणम् । स्वेदनकर्म ।

कफ को द्रव बनाना ।

Liquifying kapha.

श्लेष्मशमनः (च. सू. २६.४३(४))

कफशामकः । कटुरसकर्म ।

कफशामक ।

श्लेष्महरम् (च. सू. ५.१६)

कफनाशकम्, यथा— 'चक्षुस्तेजोमयं तस्य विशेषाच्छ्लेष्मतो भयम् । ततः श्लेष्महरं कर्म हितं दृष्टेः प्रसादनम् ॥' इति ।

कफनाशक ।

Removing kapha.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

श्लेष्माक्षिरोगनुत् (च. चि. २६.२४२)

कफजनेत्ररोगनाशकः।

कफज नेत्ररोगों का नाशक।

Alleviating diseases of eye caused by kapha.

श्वयथुकरम् (सु. सू. ४०.५)

शोथजननम्। अम्लरसोऽत्युपयुक्तः क्षीणक्षतकृशदुर्बलानां श्वयथुमापादयति। (च. सू. २६.४३(२))

शोथकर।

Causing oedema.

श्वयथुघ्नम् (च. चि. १२.५८)

शोथहरम्।

शोथहर।

श्वयथुनाशनम् (च. क. ७.७१)

शोथहरम्।

शोथहर।

श्वयथुविलयनम् (सु. सू. ४०.५)

शोथप्रशमनम्।

शोथशामक।

श्वयथुशमनाः (च. चि. १४.५८)

श्वयथुं शोथं शमयन्तीति।

शोथशामक।

Pacifying swelling.

श्वयथुहरः (च. सू. ४.८)

श्वयथुं शोथं हरतीति, शोथनाशनः। श्वयथुहरो महाकषायो यथा– 'पाटलाग्निमन्थश्योनाकबिल्वकाश्मर्यकण्टकादिकाबृहतीशालपर्णीपृश्निपर्णीगोक्षुरका इति दशेमानि श्वयथुहराणि भवन्ति' इति।

शोथनाशक।

Relieving oedema.

श्वयथुहृत् (च. चि. १४.५६)

शोथहरम्।

शोथनाशक।

श्वासविकारनुत् (च. चि. १७.१०९)

श्वासरोगनाशकः, यथोक्तं– 'सौवर्चलं नागरञ्च भार्गीं द्विशर्कारायुतम्। उष्णाम्बुना पिबेदेतद्धिक्काश्वासविकारनुत्॥' इति।

श्वासरोगनाशक।

Alleviating dyspnoea (bronchial asthma.)

श्वासहरः (च. सू. ४.८)

श्वासं श्वासकृच्छ्रात्मकं रोगं हरति नाशयतीति। श्वासहरो महाकषायो यथा– 'श्टीपुष्करमूलाम्लवेतसैलाहिङ्ग्वगुरुसुरसातामलकीजीवन्तीचण्डा इति दशेमानि श्वासहराणि भवन्ति' इति।

श्वासनाशक।

Relieving dyspnoea.

श्वासहिक्कानिबर्हणः (च. चि. ८.९५)

श्वासं हिक्काञ्च निवारयतीति।

श्वास और हिक्का को दूर करने वाला।

Alleviating dyspnoea and hiccough.

श्वित्रनाशनः (च. चि. १४.१४३)

श्वित्रं श्वेतकुष्ठाख्यं रोगं नाशयतीति, यथाऽभयारिष्टगुणे–'सिद्धोऽयमभयारिष्टः कामलाश्वित्रनाशनः' इति।

श्वित्रनाशक।

Alleviating vitiligo.

श्वित्रप्रशमनम् (च. चि. ७.१६७)

श्वित्रनाशनम् यथा–'समनःशिलं विडङ्गं कासीसं रोचनां कनकपुष्पीम्। श्वित्राणां प्रशमार्थं ससैन्धवं लेपनं दद्यात्॥' इति।

श्वित्रशामक।

Relieving vitiligo.

श्वित्रहारी (सु. चि. ९.२६)

श्वित्रनाशनः।

श्वित्रनाशक।

श्वित्रापहम् (सु. चि. ९.१८)

श्वित्रनाशनम्।

श्वित्रनाशक।

ष

षडिन्द्रियप्रसादनः (च. सू. २६.४३(१))

षडिन्द्रियाणि मनसा समम् (चक्र०), तानि प्रसादयति प्रफुल्लीकरोतीति। मधुररसकर्म।

छः इन्द्रियों को प्रसन्न करने वाला।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Pleasing to all the six sense organs (including mind).

षाण्ढ्यकरम् (च. सू. २५.४०)

षाण्ढ्यं क्लैब्यं करोतीति।

क्लैब्यजनक।

Causing impotence.

स

संख्या (च. सू. २६.२९)

१. सम्यक् ख्यायते ज्ञायतेऽनयेति, यथोक्तं चरके— 'संख्या स्याद् गणितम्' इति। एकद्वित्र्यादि-संख्ययाऽऽक्तपरिमाणस्य बोधो भवति यथैकः कर्षः, द्वौ प्रस्थौ, त्रय आढका इत्यादि। परादिगुणविशेषः।

२. संप्राप्तिभेदः— 'संख्याविकल्पप्राधान्यबलकाल- विशेषतः। सा भिद्यते' इति माधवे।

गणना।

Enumeration.

संजीवनः (सु. चि. ३८.१११)

सम्यग् जीवयति प्राणशक्तिप्रदानेनेति, यथा मुस्तादिबस्तिगुणे— 'बल्यः संजीवनो वृष्यश्चक्षुष्यः शूलनाशनः। यापनानामयं राजा बस्तिर्मुस्तादिको मतः॥' इति।

उत्तम जीवनीशक्तिदायक।

Excellent vitaliser.

संज्ञाप्रदानहेतुः (च. सू. २५.४०)

संज्ञायाः बोधरूपायाः प्रदाने हेतुः निमित्तम्। वायुः प्राणसंज्ञाप्रदानहेतूनाम् (अग्र्यः)।

संज्ञास्थापन में कारण।

Resuscitative.

संज्ञाप्रबोधनम् (च. चि. ९.३२)

संज्ञां प्रबोधयति पुनर्जागरयतीति, यथोन्मादचिकित्सिते— 'प्रदेहोत्सादनाभ्यङ्गधूमाः पानं च सर्पिषः। प्रयोक्तव्यं मनोबुद्धिस्मृति-संज्ञाप्रबोधनम्॥' इति।

सुप्त संज्ञा को पुनर्जाग्रत करने वाला।

Reawakening conscionsness, resuscitative.

संज्ञास्थापनः (च. सू. ४.८)

संज्ञां ज्ञानं च स्थापयतीति संज्ञास्थापनः (चक्र०), संज्ञास्थापनो महाकषायो यथा— 'हिङ्कुकैटर्यारिमेद-वचाचोरकवयः स्थागोलोमीजटिलापलङ्कषाशोक-रोहिण्य इति दशेमानि संज्ञास्थापनानि भवन्ति' इति।

संज्ञा एवं ज्ञान को स्थापित करने वाला।

Resuscitative.

संतर्पणम् (च. सू. २३.५)

सम्यक् तर्पयतीति, यथा— 'संतर्पयति यः स्निग्धैर्मधुरैर्गुरुपिच्छिलैः। नवान्नैर्नवमद्यैश्च मांसैश्चानूपवारिजैः॥' इत्यादि। संतर्पणं धातूनां प्रीणनं, तर्पणन्तु तृप्तिमात्रकारकमिति विशेषः, यथोक्तं चक्रेण— 'स्निग्धैरित्यादिवचनमस्निग्धादिभिरपि शक्तुप्रभृतिभिस्तृप्तिमात्रकारकत्वेन संतर्पण-निषेधार्थम्' इति। तथा च— 'मांसशाकवसातैल-घृतमज्जफलौदनाः। बल्याः संतर्पणाः हृद्या गुरवो बृंहयन्ति च॥' इति (च. सू. २७.२५९)।

सन्तृप्त करने वाला।

Saturating, satiating.

संदीपनम् (च. चि. ५.१६८)

सम्यग् दीपयत्यग्निमिति, यथा— 'यवानीचूर्णितं तक्रं बिडेन लवणीकृतम्। पिबेत् संदीपनं वातकफमूत्रानुलोमनम्॥' इति।

उत्तम अग्निदीपन।

संपत् (च. सू. २५.२९)

प्रशस्तगुणता। (द्रव्यसन्दर्भे) क्रिमिसलिला-द्यनुपहतत्वेन रसादिसंपत्।(चक्र०)

प्रशस्तता।

Excellence; freedom from injury, impurity etc.

संपाचनम् (सु. चि. १.२५)

सम्यक् पाचनम् (शोफस्य), यथा 'निवर्तते न यः शोफो विरेकान्तैरुपक्रमैः। तस्य संपाचनं कुर्यात् समाहृत्यौषधानि तु॥' इति।

सम्यक् पाचन।

Proper maturation of inflammation.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

संप्रवर्त्तिनी (च. चि. १९.१७)

पुरीषं सम्यक् प्रवर्त्तयतीति, यथातीसारचिकित्सिते—'कृच्छ्रं वा वहतां दद्यादभयां संप्रवर्त्तिनीम्' इति।

मल को बाहर निकालने वाली।

Expelling faeces, purgative.

संप्रसादनाः (च. चि. २१.९८)

सम्यक् प्रसादयन्ति वैमल्यमापादयन्तीति। संप्रसादना इति सवर्णकराः, किं वा रक्तपित्तप्रसादना इति चक्रः।

सम्यक् प्रसादन (कोपशामक)।

Pacifying aggravated doṣas and thereby restoring normalcy.

संप्रीणनः (च. शा. ८.३१)

सम्यक् प्रीणयति तर्पयति रसाधानैरिति।

सन्तर्पण।

Saturating.

संबृहंणम् (च. चि. ६.१५)

सम्यक् बृंहणम्, यथा प्रमेहचिकित्सिते—'संबृंहणं तत्र कृशस्य कार्यं संशोधनं दोषबलाधिकस्य' इति।

सम्यक् बृंहण।

Proper body-promoting measures.

संयोगः (च. सू. २६.२९)

'योगः सह संयोग उच्यते' इति। 'सहेति मिलितानां द्रव्याणां प्राप्तिरित्यर्थः' (चक्र०); पुनश्च—'संयोगः पुनर्द्वयोर्बहूनां द्रव्याणां संहतीभावः' इति। (च. वि. १.२२ (३) परादिगुणविशेषः।

साथ मिलना।

Conjunction.

संरोहणः (सु. चि. १.६५)

व्रणं सम्यक् रोहयति रोपयतीति, यथा—'अपेतपूतिमांसानां मांसस्थानामरोहताम्। कल्कः संरोहणः कार्यस्तिलजो मधुसंयुतः॥' इति।

सम्यक् व्रणरोपण।

Proper wound-healing.

संशमनम् (सु. सू. १.२७)

यत् किञ्चित् पीतलीढादिकमनिर्हृत्य दोषं शमयति तत् संशमनम्, यदुक्तं— 'न शोधयति यद् दोषान् समान्नोदीरत्यपि। समीकरोति क्रुद्धांश्च तत् संशमनमुच्यते॥' इति। तदपि द्विविधं—बाह्यमाभ्यन्तरञ्च। तत्र बाह्यमालेपपरिषेकावगाहाभ्यङ्गशिरोवस्तिकवलग्रहगण्डूषादिकम्, आभ्यन्तरं तु पाचनलेखनबृंहणरसायनवाजीकरणविषप्रशमनादिकम्' (ड०)।

सम्यक् शमयतीति संशमनम्, सम्यक्त्वं च दुष्टदोषस्यानिर्हरणपूर्वकं शमनम्, अदुष्टस्यानुदीरणञ्च (ड०, सु. सू. ३९.७)।

सम्यक् शमन।

Proper pacification.

संशोधनम् (सु. सू. १.२७)

सम्यक् शोधयतीति संशोधनम्, तद् द्विविधं—बहिराश्रयमभ्यन्तराश्रयञ्च। तत्र बहिराश्रयं शस्त्रक्षाराग्निप्रलेपादयः,. अभ्यन्तराश्रयं चतुष्कारं—वमनं, विरेचनं, आस्थापनं, शोणितमोक्षणञ्च, अन्ये तु शोणितमोक्षणमित्यत्र शिरोविरेचनं मन्यन्ते (ड०)।

सम्यक् शोधन।

Proper purification (cleansing) by elimination of impurities.

संस्कारः (च. सू. २६.३०)

'संस्कारः करणं मतम्,' करणं गुणान्तराधायकत्वं संस्करणमित्यर्थः। (चक्र०)

'संस्कारो हि गुणान्तराधानमुच्यते' इति च (च. वि. १.२२ (२)। परादिगुणविशेषः।

संस्कार।

Processing, refinement.

संस्कारगुरु (यो. र., पृ. २९)

संस्काराद्गुरु।

संस्कार से गुरु।

Heavy by processing.

संस्तम्भनम् (सु. उ. ४०.६८)

संग्रहणम् (ड०), यथा—'यदा पक्वोऽप्यतीसारः सरत्येव मुहुर्मुहुः। ग्रहण्या मार्दवाज्जन्तोस्तत्र संस्तम्भनं हितम्॥' इति।

सम्यक् स्तम्भन।

Proper checking remedy.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

संहननः (सु. सू. ४६.३६१)

क्षतोरसां तथा भग्नविश्लिष्टसन्धीनां सन्धानकरः। (ड०)

सन्धानकर।

Union-promoting.

संहर्षणः (च. सू. २५.५०)

सम्यक् हर्षयति हर्षं जनयतीति। प्रवरासवगुणः।

सम्यक् हर्षदायक।

Proper exhilarating.

सकषायः (च. सू. २७.१९)

ईषत्कषायः।

किञ्चित् कषाय।

Slightly astringent.

सक्षारम् (सु. सू. ४५.२२४)

क्षारीयम्, यथाऽऽविकमूत्रगुणे– 'सक्षारं तिक्त-कटुकमुष्णं वातघ्नमाविकम्' इति।

क्षारीय।

Alkaline.

सङ्ग्रहणम् (च. चि. १९.१५)

सङ्गृह्णाति मलमिति, स्तम्भनमित्यर्थः, यथा– 'न तु सङ्ग्रहणं देयं पूर्वमामातिसारिणे' इति।

पुरीषस्तम्भन (मल को रोकने वाला)।

Checking, anti-diarrhoeal.

सङ्ग्रहणीयः (च. चि. १९.५०)

सङ्ग्रहणे हितः, पुरीषसङ्ग्रहणीय इत्यर्थः।

पुरीषस्तम्भन।

सङ्ग्राहकः (सु. सू. ४२.१०)

मलस्तम्भनः। कषायरसकर्म।

पुरीषस्तम्भन।

सङ्ग्राही (च. सू. २७.२९)

मलस्तम्भनः, यथा 'तेषां मसूरः सङ्ग्राही कलायो वातलः परम्' इति।

पुरीषस्तम्भन।

सङ्घातकरम् (सु. सू. ४१.४(१))

संघातः काठिन्यम् (ड०), तत्करं संघातकरम्। पार्थिवद्रव्यकर्म।

संघात उत्पन्न करने वाला।

Creating mass, form and hardness.

सङ्घातविधमनः (च. सू. २६.४३(३))

काठिन्यभेदनः। लवणरसकर्म।

सङ्घात को तोड़ने वाला।

Disintegrating mass and hardness.

सतिक्तम् (च. सू. १.१०३)

ईषतिक्तम्।

किञ्चित् तिक्त।

Slightly bitter.

सत्त्वोर्जनम् (च. सू. २७.३)

सत्त्वमूर्जयति मनोबलं करोति (चक्र०)। अन्नपानकर्म।

मनोबलकर।

Promoting mental power.

सद्यस्तर्पणम् (च. सू. २३.३१)

सद्यस्तर्पयतीति, यथा–'सद्यः क्षीणो हि सद्यो वै तर्पणेनोपचीयते' इति।

शीघ्र तृप्त करने वाला।

Immediately satiating.

सद्यः प्राणकरम् (यो. र., पृ. ३४)

सद्यः अचिरेण प्राणं बलं करोतीति, यथा--'सद्योमांसं नवान्नं च बाला स्त्री क्षीरभोजनम्। घृतमुष्णोदकस्नानं सद्यः प्राणकराणि षट्॥' इति।

शीघ्र बलकर।

Immediately strengthening.

सद्यः प्राणक्षयकरः (सु. सू. २०.२७)

सद्योबलक्षपणः।

सद्यः बलनाशक।

Immediately debilitating.

सद्यः प्राणहरम् (यो. र., पृ. ३४)

१. सद्यः अचिरेण प्राणं बलं हरतीति, यथा–'पूतिमांसं स्त्रियो वृद्धाः बालार्कस्तरुणं दधि। प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट्॥' इति।

सद्यः बलनाशक।

२. सद्योमारकानि विशिष्टमर्माणि यान्याहतानि सप्ताहाभ्यन्तरान् मारयन्ति (सु. शा. ६.२३); अत्र

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

डल्हणः—'यद्यपि सद्यःशब्दस्तत्क्षणवाची तथापि सद्यः प्राणहराणीत्यत्र सद्यः शब्दो सप्ताहाभ्यन्तरपरो ज्ञातव्यः' इति ।

सद्यः मारक । Immediately fatal.

सद्यः शूलनिवारणम् (च. चि. २९.१२४)

सद्यः पीडाहरम्, यथा वातरक्तचिकित्सिते—'दशमूलशृतं क्षीरं सद्यःशूलनिवारणम्' इति ।

सद्यः वेदनाशामक ।

Immediately alleviating pain, analgesic.

सद्यः शूलहरम् (सु. उ. ४२.१२९)

सद्यः उदरशूलं हरतीति, यथा कुक्षिशूलचिकित्सिते—'वचा सौवर्चलं हिङ्गु कुष्ठं सातिविषाऽभया । कुटजस्य च बीजानि सद्यः शूलहराणि तु ॥' इति ।

सद्यः उदरशूलहर ।

Immediately relieving colic.

सद्यः संतर्पणः (च. सू. २३.३९)

सद्यः सम्यक् तर्पयतीति ।'अत्र रूक्षसक्तुकृतस्यापि मन्थस्य द्रवत्वशैत्यदेहानुसारित्वैः सद्यः संतर्पकत्वं भवत्येव, अत एव 'सद्य' इत्युक्तम्; स्नेहादिबृंहणद्रव्ययोगात्तु कालान्तरतर्पकत्वमपि भवति । (चक्र०)

सद्यःसंतर्पक ।

Immediately satiating.

सद्यः संप्रहर्षणम् (च. चि. १.१९)

सद्यः सम्यक् प्रहर्षं मनःप्रफुल्लतां जनयतीति, यथोक्तं वाजीकरणगुणे—'अपत्यसंतानकरं यत् सद्यः संप्रहर्षणम्' इति ।

सद्यः हर्षदायक ।

Immediately exhilarating.

सद्योबलाः (च. सू. २७.२६३)

सद्यो बलकरास्तृप्तिकरा इति । चक्रस्तु—तदात्वेनैव वाजीकरणवद् बलकराः, एतेन परिणामे बलापहत्वमप्युक्तं भवतीति ।

सद्यः तृप्तिकर ।

Immediately satiating.

सद्योबलकराणि (च. सू. २७.८७)

सद्यो बलं कुर्वन्तीति ।

सद्यः बलकर ।

Immediately strengthening.

सन्धातृ (च. सू. २७.२४५)

सन्धानकारि । मधुकर्म, यथा— 'सन्धातृच्छेदनं रूक्षं कषायं मधुरं मधु' इति ।

सन्धानकारक ।

Union-promoting.

सन्धानम् (सु. चि. १.१३०)

विश्लिष्टानां त्वगादीनां संश्लेषणम् । यथा—'क्षतोष्मणो निग्रहार्थं सन्धानार्थं तथैव च । सद्योव्रणेष्वायतेषु क्षौद्रसर्पिर्विधीयते ॥' इति । घातविशेषाद् द्विधाभूतस्यावयस्यैकीभाव इति डल्हणः ।

सन्धान जुड़ना ।

Union of separated (injured) parts.

सन्धानकरः (च. सू. २६.४३)

सन्धानं क्षतादीनां संश्लेषणं करोतीति । कषायरसकर्म ।

सन्धानकारक ।

Union-promoting.

सन्धानकृत् (च. सू. २७.२१)

सन्धानकरः, यथा— 'सन्धानकृद् वातहरो गोधूमः स्वादुशीतलः' इति ।

सन्धानकारक ।

Union-promoting.

सन्धानीयः (च. सू. ४.८)

सन्धाने हितः । सन्धानीयो महाकषायो यथा—'मधुकमधुपर्णीपृश्निपर्ण्यम्बष्ठकीसमङ्गामोचर-संधातकीलोध्रप्रियङ्गुकट्फलानीति दशेमानि सन्धानीयानि भवन्ति' इति । सुश्रुतेऽपि — 'गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ । सन्धानीयौ हितौ पित्ते व्रणानां चापि रोपणौ ॥' इति । सन्धानीयाविति भग्नसन्धानकारकौ । (ड०)

सन्धान में हितकर ।

Wholesome for union-promoting.

सन्धिविश्लेषकृत् (अ. हृ. उ. २७.३५)

सन्धीनां विश्लेषं करोतीति । सन्धानविपरीतः ।

सन्धि को पृथक् करना ।

Causing dislocation, disunion.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सन्धिसंश्लेषकारि (अ. कृ. उ. २७.३४)

भग्नसन्धानकरम्, यथा— 'शाल्याज्यरसदुग्धाद्यैः पौष्टिकैरविदार्हिभिः। मात्रयोपचरेद् भग्नं सन्धिसंश्लेषकारिभिः॥' इति।

भग्नसन्धानकर।

Union-promoting in bones.

सन्निपातज्वरापहः (च. चि. ३.२१०)

सन्निपातजं ज्वरमपहन्तीति, यथा—'एष शट्यादिको वर्गः सन्निपातज्वरापहः' इति।

सन्निपातज्वरनाशक।

Alleviating sannipata fever.

सन्निपातप्रशमनाः (च. सू. २७.७०)

सन्निपातं प्रशमयन्तीति।

सन्निपातको शान्त करने वाले।

Pacifying aggregate of three doṣas.

समधुरम् (च. सू. १.१०९)

माधुर्यान्वितम्। मधुररसेन सहितम्। ईषन्मधुरं वा।

मधुर, किंञ्चित् मधुर।

Sweet, slightly sweet.

समभिष्यन्दि (च. सू. २७.११४)

अत्यभिष्यन्दी

अति अभिष्यन्दी।

Excessively increasing moisture.

समानगुणाः (च. सू. १२.५)

समानाः गुणा येषामिति, उक्तं हि—'समानगुणाभ्यासो धातूनां वृद्धिकारणमिति।'

गुणों में समान।

Similar in properties.

समानगुणभूयिष्ठाः (च. वि. १.७)

अधिकतमत्वेन समानाः गुणा येषु ते; यथोक्तं—'रसदोषसन्निपाते तु ये रसा यैर्दोषैः समानगुणाः समानगुणभूयिष्ठा वा भवन्ति ते तानभिवर्धयन्ति' इति।

अधिकतम समानगुण वाले।

Having majority of similar properties.

सरः (च. शा. ६.१०)

१. स्थिरविपरीतः, गुर्वादिगुणविशेषः।

अस्थिर, चल। Unstable, moving.

२. 'सरोऽनुलोमनः प्रोक्तः' (सु. सू. ४५.५२२), अनुलोमनो वातमलप्रवर्त्तनः। (ड०)

अनुलोमन। Carminative, laxative.

सर्वकर्मगुणकृत् (च. सि. ११.१६)

सर्वकर्मणां वमनादीनां गुणं दोषहरणादिकं करोतीति सर्वकर्मगुणकृत्, किं वा सर्वकर्माणि लंघनबृंहणादीनि, गुणांश्च बलाग्न्यादीन् करोति। (चक्रः)

सब कर्म और गुण को करने वाला।

Performing all actions and providing merits (favourable effects).

सर्वकासभिषग्जितम् (च. चि. १८.१८४)

सर्वेषां कासानां चिकित्सितम्, यथा—'कण्टकारीरसे सिद्धो मुद्गयूषः सुसंस्कृतः। सगौरामलकः साम्लः सर्वकासभिषग्जितम्॥' इति।

सर्वकासहर।

Alleviating all types of cough.

सर्वकासहरम् (च. चि. १८.१६४)

सर्वकासनाशनम्।

सर्वकासहर।

सर्वगदापहः (च. सि. १.२७)

सर्वान् गदानपहन्तीति।

सर्वगदापहत्वं संशमनेन ज्ञेयम्। (चक्रः)

सर्वरोगनाशक।

Panacea.

सर्वगदाविरोधि (च. सि. ११.१३)

सर्वेषु गदेषु अविरोधि अप्रतिकूलमनुकूलमित्यर्थः। गदाविरोधीति पदेन मदनस्य सार्वयौगिकत्वं ब्रूते। (चक्र०)।

सभी रोगों में कार्यकर।

Applicable in all cases.

सर्वग्रहनिवारणः (अ. हृ. उ. ३.४९)

सर्वान् ग्रहान्निवारयतीति, यथा—'भूर्जपत्रं घृतं धूपः सर्वग्रहनिवारणः' इति।

सभी ग्रहों को दूर करने वाला।

Warding off all grahas.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सर्वज्वरापहः (सु. सू. ३८.६१)

सर्वान् ज्वरानपहन्तीति, यथा—'आमलक्यादिरित्येष गणः सर्वज्वरापहः' इति ।

सभी ज्वरों का नाशक ।

Alleviating all types of fever.

सर्वदोषनिबर्हणम् (च. सू. २७.११३)

सर्वदोषहरम्, यथा पक्वकूष्माण्डगुणे—'सृष्टमूत्रपुरीषं च सर्वदोषनिबर्हणम्' इति ।

सर्वदोषशामक ।

Pacifying all doṣas.

सर्वदोषप्रकोपणम् (च. सू. २७.२९३)

सर्वान् दोषान् प्रकोपयतीति, यथा कुसुम्भतैलगुणे—'विदाहि च विशेषेण सर्वदोषप्रकोपणम्' इति ।

सर्वदोषकोपक ।

Aggravating all doṣas.

सर्वदोषहरम् (च. सू. २५.४०)

सर्वान् दोषान् हरतीति ।

सभी दोषों को दूर करने वाला ।

Eliminating all doṣas.

सर्वमार्गानुसारिणी (च. सू. १३.३४)

सर्वमार्गाः कोष्ठसन्धिमर्मशाखाः (चक्रः), ताननुसरतीति ।

सभी मार्गों में गतिशील ।

Moving through all the channels.

सर्वमूर्धगदापहः (च. चि. २६.२७७)

सर्वशिरोरोगनाशकः ।

सभी शिरोरोगों का नाशक ।

Alleviating all head-diseases.

सर्वमूषिकविषापहम् (च. चि. २३.२०५)

सर्वमूषिकविषनाशनम्, यथा—'त्वचं च नागरं चैव समांशं श्लक्ष्णपेषितम् । पेयमुष्णाम्बुना सर्वमूषिकाणां विषापहम् ॥' इति ।

सभी मूषिकविषों का नाशक ।

Counteracting all types of rat-poison.

सर्वमेहहरः (सु. सू. ३८.७४)

सर्वप्रमेहनाशकः ।

सभी प्रमेहों का नाशक ।

Alleviating all types of Prameha, anti-diabetic.

सर्वरोगनिबर्हणाः (च. क. १२.२९)

सर्वरोगनाशकाः ।

सभी रोगों के नाशक ।

Panacea.

सर्वरोगप्रशमनी (च. चि. १.१.३०)

सर्वरोगहरी । हरीतकीकर्म ।

सर्वरोगप्रशमनीमिति संयोगसंस्कारादिना, सर्वरोगहरत्वमभिधायापि कुष्ठादिहन्तृत्वाभिधानं विशेषेण कुष्ठादिहन्तृत्वोपदर्शनार्थमिति चक्रः ।

सर्वरोगनाशक ।

Panacea.

सर्वरोगहरा (च. क. ७.६)

व्यस्तसमस्तसर्वदोषारब्धरोगहरा (चक्रः) ।

सर्वरोगनाशिनी ।

Panacea.

सर्ववातविकारनुत् (च. चि. २८.१३९)

सर्ववातरोगनाशकम् ।

सभी वातरोगों का नाशक ।

Alleviating all vātika disorders.

सर्ववातामयापहम् (च. चि. २८.१७७)

सर्ववातरोगनाशकम् ।

सभी वातरोगों का नाशक ।

सर्वविषघ्नः (च. चि. २३.९९)

सर्वविषनाशकः ।

सभी विषों का नाशक ।

Counteracting all poisons.

सर्वविषापहः (च. क. ६.१५)

सर्वविषानपहन्तीति ।

सर्वविषनाशक ।

सर्वव्याधिप्रशमनम् (च. चि. ७.७२)

सर्वरोगहरम् ।

सर्वरोगहर ।

सर्वशिरोरोगनुत् (च. चि. २६.२७५)

सर्वशिरोरोगहरम् ।

सभी शिरोरोगों का नाशक ।

Alleviating all head-diseases.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सर्वशोथापहाः (च. चि. २३.१९१)

सर्वशोथहराः ।

सर्वशोथनाशक ।

Removing all types of oedema.

सर्वाक्षिरोगघ्नी (च. चि. २६.२५९)

सर्वनेत्ररोगहरी, यथा—'पिप्पल्यः किंशुकरसो वसा सर्पस्य सैन्धवम् । जीर्णं घृतं च सर्वाक्षिरोगघ्नी स्याद् रसक्रिया ॥' इति ।

सर्वनेत्ररोगनाशक ।

Alleviating all eye diseases.

सर्वाक्षिरोगनुत् (च. चि. २६.२४६)

सर्वनेत्ररोगहरी ।

सर्वनेत्ररोगनाशक ।

सर्वानिलव्याधिहरः (च. सि. ३.३६)

सर्ववातव्याधिनाशकः ।

सर्ववातव्याधिनाशक ।

Alleviating all types of vātavyādhi.

सर्वारोचकनाशनम् (च. चि. २६.२१९)

सर्वारोचकहरम् ।

सभी अरुचि का नाशक

Removing all types of anorexia.

सर्वार्थकारी (च. सि. १.२७)

सर्वानर्थान् प्रयोजनानि करोति साधयतीति । स्थिरत्वापकर्षादिविरुद्धार्थस्यापि भेषजविशेषयोगादिति चक्रः ।

सभी प्रयोजनों को सिद्ध करने वाला ।

Serving all purposes.

सर्वेन्द्रियविबोधनम् (सु. चि. २४.५७)

सर्वेन्द्रियाणि विबोधयति समुत्तेजयतीति । मद्यकर्म ।

सभी इन्द्रियों का उत्तेजक ।

Stimulating all sensory and motor organs.

सर्वोदरापहम् (च. चि. १३.११५)

सर्वोदररोगनाशकः ।

सभी उदररोगों का नाशक ।

Alleviating all types of udararoga.

सवर्णीकरणः (च. चि. २५.११६)

समानो वर्णः सवर्णः, न सवर्णः असवर्णः, असवर्णं सवर्णं करोतीति सवर्णीकरणः, व्रणादौ असरूपं वर्णमपास्य त्वचः सामान्यं वर्णं जनयतीत्यर्थः, यथा—'कालीयकनताम्रास्थि हेमकान्तारसोत्तमैः । लेपः सगोमयरसः सवर्णीकरणः परः ॥' इति ।

प्राकृत वर्ण लाने वाला ।

Restoring normal pigmentation.

सस्नेहम् (च. सू. १.६०)

ईषत्स्नेहम् । (चक्र०)

अल्प स्निग्ध ।

Slightly unctuous.

सहस्रवीर्यम् (च. सू. २७.२३२)

भूरिशक्तिकम्, यथा हि—'सहस्रवीर्यं विधिभिर्घृतं कर्मसहस्रकृत्' इति ।

अनेक शक्तियों से युक्त ।

Having numerous potencies.

साङ्ग्राहिकः (च. चि. १९.५६)

पुरीषस्तम्भनः ।

पुरीषस्तम्भन ।

Anti-diarrhoeal.

सात्म्यम् (च. सू. २७.२२४)

आत्मनः सुखकरत्वेनानुकूलम्, यथोक्तं— 'सात्म्यं नाम तद् यदात्मन्युपशेते' इति । अपरञ्च— 'देशानामामयानाञ्च विपरीतगुणं गुणैः । सात्म्यमिच्छन्ति सात्म्यज्ञाश्चेष्टितं चाद्यमेव च ॥' इति, वाग्भटेनापि— 'हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् । औषधान्नविहाराणामुपयोगं सुखावहम् ॥ विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ॥' (अ. हृ. नि. १.६) ।

अपने लिए अनुकूल ।

Suitable to oneself.

सादनः (च. सू. २६.४३(४))

अवसादं करोतीति । कटुरसकर्म ।

अवसादकर ।

Depressant.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

साधारणः (च. सू. २६.८)

सामान्यः ।

आग्नेयसौम्यसामान्यादुभयोरपि लङ्घनबृंहणयोः कर्त्ता, परस्परविरोधादकर्ता वा (चक्रः) ।

'कर्म साधारणं जह्यात्तृतीयकचतुर्थकौ' (च. चि. ३.२९२) इत्यत्रापि 'कर्म साधारणमिति भूतानुवन्धे दोषे च साधारणी चिकित्सा दैवव्यपाश्रया बल्यादिरूपा युक्तिव्यपाश्रया दोषानुरूपकषाय-पानादिरूपा च' इति चक्रः ।

सामान्य ।

General.

सान्द्रः (च. शा. ६.१०)

द्रवविपरीतः, घनः, गुर्वादिगुणविशेषः ।

ठोस, गाढा । Solid, thick.

सामान्यगुणाः (चक्र. च. सू. १.४९)

गुर्वादयो गुणाः विंशतिः । एते च सामान्यगुणाः, पृथिव्यादीनां साधारणत्वात् ।

सामान्य गुण ।

General properties.

साम्लम् (च. सू. २७.२२१)

ईषदम्लम् ।

किञ्चित् अम्ल ।

Slightly sour.

सारः (च. वि. ८.९६)

१. बलात्मकः, श्लेष्मगुणः ।

२. प्राकृतिको मुख्यधातुः यथा त्वक्सारः, रक्तसारः इत्यादिः । चक्रो वक्ति—'सारशब्देन विशुद्धतरो धातुरुच्यते ।' इति ।

३. स्थिरांशो वनस्पतीनाम्, 'अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः' (सु. शा. ५.२१) यथा शालसारः ।

४. रसो वीर्यं च—यथोक्तं 'ता एवौषधयो निदाघे निःसारा रूक्षाः' इति (सु. सू. ६.११)

१. बल । Strength.

२. प्राकृत मुख्य धातु । Constitutionally chief dhātu.

३. वृक्षों का स्थिर । Heart-wood of plants.

४. रस और वीर्य । Rasa and vīrya.

सारविधमनम् (च. वि. २.७)

ओजःक्षपणम् ।

ओज को क्षीण करने वाला ।

Decreasing ojas.

सार्वकार्मिकः (च. चि. २३.२०९)

सर्वकर्मसु योगिकः ।

सर्वकर्मसाधक ।

Useful in all measures.

सिराप्रगुणीकरणम् (च. चि. २६.१७)

सिराः प्रकृष्टगुणवतीः बलवतीश्च करोतीति । यथा निरूहगुणे—'स मूत्रवर्चोऽनिलसङ्गमस्यन् गुदं सिराश्च प्रगुणीकरोति' इति ।

सिराओं को प्राकृत एवं सबल बनाना ।

Making veins normal and firm.

सिरामुखविवित्तत्वम् (सु. चि. २४.५२)

सिरामुखस्य सुस्पष्टत्वम् । सिरामुखविवर्धनमिति डल्हणः ।

सिराओं के मुख को खोल देना ।

Expanding the opening of veins.

सुखम् (च. शा. १.७२)

१. अनुकूलवेदनीयम्, आत्मगुणः ।

२. आरोग्यम्, धातुसाम्यम्, यथोक्तं—'सुखसंज्ञकमारोग्यम्' इति (च. सू. ९.४); 'सुखहेतुः सुखम्' (चक्र०) ।

३. आयुषो भेदः—'हिताहितं सुखं दुःखमायुः' इति ।

1. Pleasure.

2. Health.

3. Happy (life).

सुखपरिणामकरः (च. सू. २५.४०)

सुखेनाहारस्य परिणामं पाकं करोतीति । 'एकाशनभोजनं सुखपरिणामकराणाम् (अग्र्यम्)' इति ।

सुखपूर्वक पाचन करने वाला ।

Easily digestible.

सुखपरिणामिताकरम् (च. सू. २७.३२५)

सुखेनाहारपाकं करोतीति । अनुपानकर्म ।

सुखपूर्वक पाचन करने वाला ।

Promoting easy digestion.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सुखविरेचनम् (च. सू. २५.४०)

सुखेन व्यापद्विरहितं विरेचयतीति, यथा—'त्रिवृत् सुखविरेचनानाम्' इति।

सुखपूर्वक विरेचन कराने वाला।

Simple purgative.

सुखायुःकृत् (च. सि. १.२७)

सुखायुषं करोतीति। बस्तिकर्म।

सुखी जीवन देने वाला।

Providing happy life.

सुगन्धः (सु. सू. ४६.५२१)

शोभनो गन्धः, यथा हि—'सुखानुबन्धी सूक्ष्मश्च सुगन्धो रोचनो मृदुः। इति सुश्रुतानुसारं विंशतिगुणेषु पठितः।

सुगन्ध।

Fragrance, pleasant smell.

सुगन्धिः (च. सू. २७.१५५)

शोभनो गन्धोऽस्यास्तीति, यथा कर्पूरः।

सुगन्धयुक्त।

Fragrant, aromatic.

सुदर्शनकरः (सु. चि. २४.४४)

सुरूपजननः।

सौन्दर्यकर।

Beautifying, cosmetic.

सुप्तिनुत् (च. चि. ७.६९)

सुप्तिः स्पर्शाज्ञानं, तां नाशयतीति।

शून्यतानाशक।

Removing numbness.

सूक्ष्मः (च. शा. ६.१०)

स्थूल विपरीतः, गुर्वादिगुणः। तत्स्वरूपं यथा—'सूक्ष्मस्तु सौक्ष्म्यात् सूक्ष्मेषु स्रोतःस्वनुसरः स्मृतः।' इति (सु. सू. ४६.५२४); यथा विषमद्यादीनि।

सूक्ष्म, सूक्ष्म स्रोंतो में प्रविष्ट होने वाला।

Fine, penetrating.

सूक्ष्ममार्गानुसारि (सु. सू. ४५.१३२)

सूक्ष्मस्रोतांस्यनुसर्तुं शीलं यस्य तत्, सूक्ष्मगुणान्वितमित्यर्थः। मधुगुणम्।

सूक्ष्म मार्गों में गतिशील।

Moving in minute channels.

सृष्टमूत्रम् (च. चि. २६.१८)

मूत्रलम्।

मूत्रल।

Diuretic.

सृष्टमूत्रपुरीषम् (च. सू. २७.११३)

मूत्रपुरीषयोरनुलोमनम्, यथा पक्वकूष्माण्डगुणे—'सृष्टमूत्रपुरीषं च सर्वदोषनिबर्हणम्' इति।

मूत्रल एवं विरेचन।

Diuretic and purgative.

सृष्टविट् (च. चि. २६.१८)

पुरीषसारकम्।

विरेचन।

सृष्टविण्मूत्रः (च. सू. २६.६१)

पुरीषमूत्रयोर्विरेचनः।

विरेचन एवं मूत्रल।

सृष्टशकृद्वातः (च. सू. २७.१८६)

पुरीषवातानुलोमनः।

विरेचन एवं वातानुलोमन।

सृष्टानिलम् (च. चि. २६.१८)

वातानुलोमनम्।

वातानुलोमन।

Carminative.

सौकुमार्यकरम् (सु. सू. ४५.९३)

सौकुमार्यं करोतीति। क्षीरोत्थनवनीतकर्म।

कोमलता लाने वाला।

Softening.

सौकुमार्यविनाशनः (सु. चि. २४.७९)

सौकुमार्यं विनाशयति हरतीति।

कोमलतानाशक।

Removing softness.

सौगन्ध्यम् (च. सू. ५.९६)

सुगन्धेर्भावः।

सुगन्ध।

Fragrance.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सौमनस्यम् (च. सू. ५.९६)

शोभनं मनः सुमनः, सुमनसे हितं सौमनस्यम्, मनः प्रसादजनकमित्यर्थः ।

मनःप्रसादजनक ।

Pleasing to mind.

सौमनस्यजननम् (च. सू. २५.४०)

मनःप्रसादकरम् ।

मनःप्रसादजनन ।

सौम्यः (च. सू. ६.५)

१. सोमप्रधानः चन्द्रप्रधानः यथा विसर्गकालः, यथोक्तं– 'अतो विसर्गः सौम्यः' इति ।

चन्द्रमा की प्रधानता वाला ।

With Predominance of the moon.

२. अप्प्रधानः यथा 'सौम्यं शुक्रमार्तवमाग्नेयमितरेषामप्यत्र भूतानां सान्निध्यमस्त्यणुना विशेषेण' इति । (सु. शा. ३.३)

जल की प्रधानता वाला । Having predominance of water principle.

सौषिर्यकराणि (च. सू. २६.११)

सौषिर्यं रन्ध्रबहुलता (चक्रः), तत् करोतीति । आकाशीयद्रव्यकर्म ।

सुषिरता करने वाला ।

Making porous.

स्कन्दनम् (सु. सू. १४.३९)

स्कन्दनं शोणितस्य स्त्यानीकरणम् (ड०) यथा– 'चतुर्विधं यदेतद्धि रुधिरस्य निवारणम् । सन्धानं स्कन्दनं चैव पाचनं दहनं तथा ॥' इति ।

जमाने वाला ।

Coagulant.

स्तन्यकरः (सु. सू. ३८.३६)

स्तन्यजननः, यथा काकोल्यादिगणगुणे– 'काकोल्यादिरयं पित्तशोणितानिलनाशनः । जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ॥' इति ।

स्तन्यजनन ।

स्तन्यजननः (च. सू. ४.८)

स्तन्यं जनयतीति । स्तन्यजननो महाकषायो यथा– 'वीरणशालिषष्टिकेक्षुवालिकादर्भकुशकाशगुन्द्रेत्कटकतृणमूलानीति दशेमानि स्तन्यजननानि भवन्ति' इति ।

स्तन्यजनन (स्तनों में दूध लाने वाला) ।

galactagogue.

स्तन्यदोषनिबर्हणम् (च. चि. ३०.२६८)

स्तन्यदोषान् निवारयतीति । स्तन्यदोषाः पुनरष्टौ यथा– वैवर्ण्यं फेनसङ्घातो रौक्ष्यञ्चेत्यनिलात्मके । पिताद्वैवर्ण्यदौर्गन्ध्ये, स्नेहपैच्छिल्यगौरवम् ॥ कफाद् भवति' इति (च. चि. ३०.२३७) ।

स्तन्य के दोषों का निवारक ।

Eliminating defects of breast-milk.

स्तन्यदोषविशुद्धिः (च. चि. ३०.२७९)

स्तन्यदोषापनयनम् ।

स्तन्यदोषों का निवारक ।

स्तन्यदोषहराः (अ. हृ. उ. २.२५)

स्तन्यदोषान् हरन्तीति, यथा– 'पाठाशुण्ठ्यमृतातिक्तातिक्तादेवाह्वसारिवाः । समुस्तमूर्वेन्द्रयवाः स्तन्यदोषहराः परम् ॥' इति ।

स्तन्यदोषनिवारक ।

स्तन्यविशोधनाः (च. चि. ३०.२७७)

स्तन्यं विशेषेण शोधयन्तीति, यथा– 'मुस्तनागरपाठाश्च पीताः स्तन्यविशोधनाः' इति ।

स्तन्यशोधन ।

galacto-depurant.

स्तन्यवृद्धिकरम् (सु. सू. ४६.२९९)

स्तन्यवर्धनम्, यथोक्तं विदार्यादिकन्दगुणे– 'रक्तपित्तहराण्याहुः शीतानि मधुराणि च । गुरूणि बहुशुक्राणि स्तन्यवृद्धिकराणि च ॥' इति ।

स्तन्यवर्धक ।

Promoting lactation.

स्तन्यशोधनः (च. सू. ४.८)

दोषानपास्य स्तन्यं शोधयतीति स्तन्यशोधनो महाकषायो यथा– पाठामहौषधसुरदारुमुस्तमूर्वागुडूचीवत्सकफलकिरातातिक्तककटुरोहिणीसारिवा इति दशेमानि स्तन्यशोधनानि भवन्ति' इति । तिक्तरसः स्तन्यशोधनः (च. सू. २६.४३(५)) ।

स्तन्यशोधक ।

Galacto-depurant.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्तन्यसंजननम् (च. चि. ३०.२२९)

स्तन्यं सम्यक् जनयतीति ।

स्तन्यजनन ।

स्तन्यामयघ्नः (अ. हृ. सू. १५.४०)

स्तन्यविकारनाशनः ।

स्तन्यविकारों को दूर करने वाला ।

Alleviating disorders of breast-milk.

स्तम्भकरः (च. सू. २६.७९)

स्तम्भं गतिराहित्यं जनयतीति, यथा कषायरसलक्षणे— 'वैशद्यस्तम्भजाड्यैर्यो रसनं योजयेद् रसः' इति ।

स्तब्ध करने वाला ।

Stiffening.

स्तम्भनम् (च. सू. २२.४)

स्तम्भते प्रतिबध्नाति धातुमलादीनिति, चरकोऽपि— 'स्तम्भनं स्तम्भयति यद् गतिमन्तं चलं ध्रुवम्' इति (च. सू. २२.१२) । स्तम्भयतीति निरुणद्धि, चलमिति किञ्चिद् गतिमत्, गतिमन्तमिति प्रव्यक्त-गतिमन्तमिति चक्रः । कषायरसः स्तम्भनः (च. सू. २६.४३) । वस्तुतस्तु षड्डुपक्रमे स्तम्भनं स्वेदनविपरीतं शीतगुणाधानं व्यनक्ति मूलतः, उपचारात्तु गत्यवरोधकम् ।

स्तम्भन ।

1. Refrigeration.
2. Holding back, checking.

स्तम्भनाशनः (सु. चि. २४.८७)

स्तम्भं गतिराहित्यं नाशयतीति ।

स्तम्भ का नाशक ।

Removing stiffness.

स्तम्भनीयम् (च. सू. २५.४०)

स्तम्भने हितम् । 'जलं स्तम्भनीयानाम् (अग्र्यम्)' इति ।

स्तम्भन में हितकर ।

Wholesome for refrigeration.

स्तम्भप्रशमनः (च. सू. २५.४०)

स्तम्भं प्रशमयतीति ।

स्तम्भशामक ।

Removing stiffness.

स्तम्भविधमनः (च. सू. २६.४३(३))

स्तम्भहरः । लवणरसकर्म ।

स्तम्भनाशक ।

स्तम्भशमनाः (च. चि. १४.५८)

स्तम्भशामकाः ।

स्तम्भशामक ।

स्तम्भी (सु. सू. ३८.१५)

अतिसारादेः स्तम्भनः । (ड०)

स्तम्भन ।

Checking.

स्तिमितः (च. वि. ८.९६)

आर्द्रः ।

आर्द्र, गीला ।

Moist.

स्थिरः (च. शा. ६.१०)

सरविपरीतः, गुर्वादिगुणविशेषः ।

स्थिरता ।

Stability.

स्थिरकरम् (च. सू. १३.१५)

अङ्गस्थैर्यकरम् । (चक्र०)

अङ्गों में स्थिरता लाने वाला ।

Promoting stability in body parts.

स्थिरमदः (सु. सू. ४५.१८८)

चिरकालमत्ततताकारी । (ड०)

चिरकाल तक मदकारी ।

Intoxicating for a long period, causing stable narcosis.

स्थूलः (च. शा. ६.१०)

१. सूक्ष्मविपरीतः, गुर्वादिगुणविशेषः ।

स्थूल । gross, blunt.

२. स्थूलं संहतावयवं लड्डुकपिष्टकादि ।

स्थूल । Massive.

स्थूलविलेखनः (सु. सू. ४६.४२)

स्थूलं विलेखयति कर्शयतीति, यथा यवगुणे— 'स्थैर्याग्निमेधास्वरवर्णकृच्च सपिच्छिलः स्थूलविलेखनश्च' इति ।

स्थूल को कृश करने वाला ।

Slimming.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्थैर्यम् (च. सू. ७.३२)
अङ्गानां स्थिरत्वम्, दृढत्वमित्यर्थः।
स्थिरता।
Stability.

स्थैर्यकरः (च. सू. २५.४०)
स्थैर्यं दृढत्वं करोतीति। 'व्यायामः स्थैर्यकराणाम् (अग्र्यः)' इति। मधुररसः स्थैर्यकरः (च०सू० २६.४३(१))। पार्थिवद्रव्याणि स्थैर्यकराणि (च. सू. २६.११), अत्र स्थैर्यमविचाल्यमिति चक्रः।
स्थिरता लाने वाला।
Providing stability.

स्थैर्यकृत् (सु. सू. ४५.४२)
स्थैर्यं दाढर्यं करोतीति। स्थैर्यं वयःस्थापनकारित्वमिति डल्हणः।
स्थैर्यकर।

स्थौल्यकरी (सु. चि. २४.७८)
स्थौल्यं करोतीति, स्थौल्यापादनीत्यर्थः।
स्थौल्य लाने वाली।
Making obese.

स्थौल्यविनाशनः (सु. चि. २४.७९)
स्थौल्यहरः।
स्थौल्यनाशन।
Anti-obesity.

स्थौल्यापकर्षणम् (सु. चि. २४.४१)
स्थौल्यहरम्।
स्थौल्यनाशक।

स्थौल्यापहम् (सु. सू. ४५.१४१)
स्थौल्यहरम्, यथा पुराणमधुगुणे—'मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनम्' इति।
स्थौल्यनाशक।

स्निग्धः (च. शा. ६.१०)
रूक्षविपरीतः, गुर्वादिगुणविशेषः।
स्निग्ध, चिकना।
Unctuous.

स्निग्धरूक्षः (च. सू. १४.८)
स्निग्धरूक्षद्रव्यकृतः। (चक्र०)
स्निग्ध और रूक्ष।
Unctuous and rough.

स्नेहकराणि (च. सू. २६.११)
स्नेहजननानि स्निग्धत्वापादनानीति। आप्यद्रव्यकर्म।
स्निग्धता लाने वाले।
Promoting unctuousness.

स्नेहनम् (च. सू. २२.४)
'स्नेहनं स्नेहविष्यन्दमार्दवक्लेदकारकम्' (च. सू. २२.११)। विष्यन्दः विलयनम् (चक्र०)। षडुपक्रमविशेषः।
स्नेहकारक।
Uncting.

स्नेहवन्ति (च. चि. १.३.१२)
स्निग्धानि।
स्निग्ध। Unctuous.

स्नेहविरेचनम् (च. चि. ५.१७२)
स्नेहैः एरण्डादिजैर्विरेचनम्।
स्निग्ध द्रव्यों से विरेचन।
unctuous purgative.

स्नेहव्यापत्प्रशमनम् (सु. सू. ४५.८४)
स्नेहव्यापत् स्नेहातियोगायोगसमुत्थो विकारः (ड०), तस्याः प्रशमनम्। तक्रगुणः।
स्नेहजन्य विकारों का शामक।
Alleviating complications of the intake of ghṛta (uncting material) including hyperlipidaemia.

स्नेहापहः (च. सू. २६.४३(४))
स्नेहमपहन्तीति, स्नेहनाशन इत्यर्थः। कटुरसकर्म।
स्नेहनाशक।
Removing unctuousness, anti-lipid.

स्नेहोपगः (च. सू. ४.८)
स्नेहस्य सर्पिरादेः स्नेहनक्रियायां सहायत्वेनोपगच्छन्तीति स्नेहोपगानि, मृद्वीकादिस्नेहोपगयुक्तस्य सर्पिरादेः स्नेहने प्रकर्षवती शक्तिर्भवतीत्यर्थः (चक्र०)। स्नेहोपगो महाकषायो यथा—'मृद्वीकामधुकमधुपर्णीमेदाविदारीकाकोलीक्षीरकाकोलीजीवकजीवन्तीशालपर्ण्य इति दशेमानि स्नेहोपगानि भवन्ति' इति।
स्नेहन में सहयोगी।
Promoting unction.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्पर्शः (च. सू. ८.११)

त्वग्ग्राह्यो वाय्वाश्रितो वैशेषिकगुणः।

स्पर्श। Touch.

स्पर्शाज्ञानम् (सु. क. २.१२)

सुप्तिः, त्वचि स्पर्शशून्यता।

सुप्ति, शून्यता।

Numbess, anaesthesia.

स्फुटस्रोतस्करम् (सु. सू. ४५.१९४)

स्रोतांसि स्फुटानि विवृतानि करोतीति, स्रोतोरोधहरमित्यर्थः। जीर्णमद्यकर्म, यथोक्तं– 'स्फुटस्रोतस्करं जीर्णं लघु वातकफापहम्' इति।

स्रोतों को खोलने वाला।

Opening the channels.

स्मृतिः (च. शा. १.७२)

अनुभवजन्यं ज्ञानम्। आत्मलिङ्गम्। 'स्मृतिस्तु पूर्वानुभूतार्थस्मर्तारं स्थायिनमात्मानं गमयति' इति चक्रः।

स्मृति। Memory.

स्मृतिकरम् (च. चि. १.३.२७)

स्मृतिं स्मरणशक्तिं करोति जनयतीति। रसायनकर्म।

स्मृतिवर्धक।

Improving memory.

स्मृतिप्रबोधनम् (च. चि. ९.३२)

स्मृतिं प्रबोधयति जागरयतीति, यथोन्मादचिकित्सिते– 'प्रयोक्तव्यं मनोबुद्धि-स्मृतिसंज्ञाप्रबोधनम्' इति।

स्मृति को पुनर्जाग्रत करना।

Re-awakening memory.

स्मृतिविवर्धनम् (च. सू. २७.२३१)

स्मृतिं स्मरणशक्तिं विशेषेण वर्धयतीति, यथा घृतगुणे– 'स्मृतिबुद्ध्यग्निशुक्रौजःकफमेदो-विवर्धनम्' इति।

स्मृतिवर्धक।

स्रंसनम् (च. सू. १३.७७)

रेचनम्। शार्ङ्गधरेणोक्तं यथा– 'पक्तव्यं यदपक्त्वैव श्लिष्टं कोष्ठे मलादिकम्। नयत्यधः स्रंसनं तद् यथा स्यात् कृतमालकः॥' इति। चरकेऽपि– 'पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत्, स्रंसनम् इति (च. चि. ३.१७१)।

विरेचन। Purgative.

स्रंसनीयम् (च. सू. २५.४०)

स्रंसने हितम्। यावशूकः स्रंसनीयपाचनीया-र्शोघ्नानाम् (अभयः)।

विरेचन में हितकर।

Wholesome in purgative.

स्रंसि (च. सू. २७.३०४)

१. स्रंसनम्। लवणकर्म, यथोक्तं 'रोचनं लवणं सर्वं पाकि स्रंस्यनिलापहम्' इति।

स्रंसन।

२. पूगफलम् (ध. नि. ३.३९)

सुपारी। Areca nut.

स्रावणम् (च. सू. ५.१५)

स्रावववर्धनम्, क्लेदस्य बहिः निःसारणम्।

स्रावववर्धक।

Promoting discharge.

स्रावनुत् (च. चि. २६.२१३)

स्रावरोधकम्।

स्राव को रोकने वाला।

Checking discharge.

स्रावापहम् (सु. चि. ८.१२)

स्रावरोधकम्, यथोक्तं भगन्दरचिकित्सिते– 'रुजास्रावापहं तत्र स्वेदमाशु प्रयोजयेत्' इति।

स्रावरोधक।

स्रोतःप्रसादनम् (च. सू. ३०.१४)

स्रोतसां स्फुटीकरणं निर्मलीकरणं वा, यथोक्तं हृद्रोग-चिकित्सिते– 'हृद्यं यत् स्याद्यदोजस्यं स्रोतसां यत् प्रसादनम्। तत्तत् सेव्यं प्रयत्नेन प्रशमो ज्ञानमेव च॥' इति।

स्रोतों को स्वच्छ करने वाला।

Cleansing or opening channels.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्रोतःशोधनम् (च. चि. ३.१४५)

स्रोतः शोधयति मलावरोधमपास्य विमलीकरोतीति, यथोक्तमुष्णोदकगुणे— 'दीपनं पाचनं चैव ज्वरघ्नमुभयं हि तत्। स्रोतसां शोधनं बल्यं रुचिस्वेदकरं शिवम्॥' इति।

स्रोतों को शुद्ध करने वाला।

Cleansing channels.

स्रोतः संप्रबोधनम् (च. चि. १०.१४)

स्रोतसां संप्रबोधनमिति दोषविरहितत्वेन सम्यक् स्व- व्यापारकरणम् (चक्र०)।

स्रोतों को जागृत करना।

Restoring normal functioning of channels.

स्रोतःखरीकरणः (च. सू. २६.४३(५))

स्रोतसां खरत्वमुपपादयति। तिक्तस्यात्युपयुज्यमानस्य कर्म।

स्रोतों में काठिन्य लाने वाला।

Causing hardness in vessels.

स्रोतोबन्धकृत् (च. सू. २६.४३)

स्रोतांस्यवबध्नाति, तेषु रोधमापादयन्तीति। अत्युपयुज्यमानकषायरसकर्म।

स्रोतोरोधकर।

Causing obstruction in channels.

स्रोतोमार्दवकृत् (अ. हृ. सू. ६.२८)

स्रोतांसि मृदूकरोतीति, यथोक्तं मण्डगुणे— 'स्रोतोमार्दवकृत् स्वेदी सन्धुक्षयति चानलम्' इति।

स्रोतों में मृदुता लाने वाला।

Providing softness in channels.

स्रोतोविबन्धनुत् (च. चि. २४.११९)

स्रोतोरोधहरम्, यथा मद्यगुणे—'स्रोतोविबन्धनुन्मद्यं मारुतस्यानुलोमनम्' इति।

स्रोतोरोधहर।

स्रोतोविबन्धमोक्षः (च. चि. ८.१७४)

स्रोतोरोधस्यापानयनम्।

स्रोतोरोध को दूर करना।

Removing obstruction in channels.

स्रोतोविशुद्धिः (च. चि. १८.१६७)

स्रोतःशोधनम्।

स्रोतों का शोधन।

Cleansing of channels.

स्रोतोविशोधनम् (सु. सू. ४५.८१)

स्रोतांसि विशेषेण शोधयतीति, यथा मस्तुगुणे— 'तृष्णाक्लमहरं मस्तु लघु स्रोतोविशोधनम्'इति।

स्रोतःशोधन।

स्रोतःशोधनम् (च. सू. २७.१९३)

स्रोतांसि शोधयति मलादीनपास्य निर्मलीकरोतीति। मद्यकर्म।

स्रोतों का शोधक।

Cleansing channels.

स्रोतःशोधि (अ. हृ. सू. ५.३५)

स्रोतःशोधनम्।

स्रोतःशोधक।

स्वप्नकरः (च. सू. २५.४०)

निद्राजननः।

निद्राजनन।

Hypnotic.

स्वप्नकृत् (अ. हृ. सू. ६.६६)

निद्राकरः।

निद्राजनन।

स्वप्नजननम् (च. सू. २७.८१)

निद्राकरम्।

निद्राजनन।

स्वरकृत् (च. सि. १.२७)

स्वरं प्राकृतं करोतीति। बस्तिकर्म।

स्वर को प्राकृत बनाने वाला।

Restoring normalcy to voice.

स्वरप्रदः (च. सू. २७.६५)

स्वरं प्राकृतं प्रददातीति।

स्वर को प्राकृत करने वाला।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्वरप्रसादनम् (च. चि. १.३.२७)

स्वरं प्रसादयति दोषानपास्य निर्मलीकरोतीति। स्वरो मनोज्ञो भवति येनेत्यर्थः। रसायनकर्म।

स्वर को मनोज्ञ बनाने वाला।

Making voice pleasant.

स्वरबोधनम् (च. चि. ८.९७)

स्वरं बोधयति मान्द्यादिदोषानपास्योत्थापयतीति, यथा– 'दशमूलशृतात् क्षीरात् सर्पिर्यदुदियान्नवम्। सपिप्पलीकं सक्षौद्रं तत् परं स्वरबोधनम्॥' इति।

स्वर को जाग्रत करना।

Re-awakening voice.

स्वरभेदविनाशनम् (च. सू. २७.१४९)

स्वरभेदं विनाशयतीति, यथोक्तं– 'स्वरभेदकफोत्क्लेदपित्तरोगविनाशनम्' इति बिभीतकगुणे।

स्वरभेदनाशक।

Alleviating hoarseness of voice.

स्वरवर्धनम् (च. चि. १.३.३१)

स्वरं वर्धयतीति। रसायनकर्म।

स्वर को बढ़ाने वाला।

Voice-promoting.

स्वरविशोधनः (च. सू. २७.१८५)

स्वरं विशेषेण शोधयतीति।

स्वरशोधक।

Alleviating defects of voice.

स्वरहिततमः (च. सू. २७.६४)

अधिकतमत्वेन स्वराय हितः।

स्वर के लिए अधिकतम हितकर।

Most wholesome for voice.

स्वरोत्तमकरम् (च. चि. १.२.३)

स्वरमुत्तमं करोतीति। रसायनकर्म।

स्वर को उत्तम करने वाला।

Making voice excellent.

स्वर्यम् (च. सू. २७.३१४)

स्वराय हितम्।

स्वर के लिए हितकर।

Wholesome for voice.

स्वल्पमूत्रकराः (च. सू. २७.७४)

मूत्रं स्वल्पं कुर्वन्तीति, प्रभूतमूत्रताहरा इत्यर्थः।

मूत्र को कम करने वाला।

Decreasing the quantity of urine.

स्वस्थवृत्तौ मतम् (च. सू. १.६७)

स्वस्थस्य वृत्तिः स्वस्थरूपतयाऽनुवर्त्तनम्, तत्राभिमतं पूजितमिति यावत्। समधातूनामवर्धकत्वेनाक्षयकरत्वेन च रसादिस्रोतस्सां चानुगुणत्वेन धातुसाम्यानुवृत्तिकरमुच्यते।(चक्र०)

स्वस्थ के लिए हितकर।

Maintaning and promoting health.

स्वस्थहितम् (अ. हृ. सू. १.१६)

स्वस्थेभ्यो हितम्। 'दोषादीनां मलपर्यन्तानां स्वप्रमाणस्थितानां साम्यानुवृत्तिहेतुर्यद्द्रव्यं तत् स्वस्थेभ्यो हितम्' इति (अ. द.), 'यद् द्रव्यं वातादीनां क्षयवृद्ध्योर्हेतुरपि स्वस्थस्य न तथा, तत् स्वस्थहितम्, यथा गुरुमधुररूक्षशीतोऽपि यवः स्वस्थ पित्तं न क्षपयति, गुरुमधुरस्निग्धशीतमपि क्षीरं स्वस्थस्य कफं न कोपयति' इति। (हेमाद्रि०)

स्वस्थ के लिए हितकर।

(द्र. – स्वस्थवृत्तौ मतम्)

स्वादुः (च. सू. १.६५)

१. मधुरो रसः।

मीठा। Sweet.

२. अभीष्टः रोचिष्णुः (च. सू. २६.८)

स्वादिष्ट। Palatable.

स्वादुप्रायम् (च. सू. २७.१३३)

मधुरप्रायम्।

प्रायः मधुर।

Almost sweet.

स्वापनम् (च. चि. २४.६३)

निद्रानयनम्। मद्यकर्म।

निद्राजनन।

स्वास्थ्यकरी (अ. हृ. उ. १.२८)

स्वास्थ्यं सुखं करोतीति, यथोक्तं वचागुणे– 'आयुर्मेधास्मृतिस्वास्थ्यकरीं रक्षोऽभिरक्षिणीम्' इति।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्वास्थ्यकर ।

Health-promoting.

स्वेदकरम् (च. चि. ३.१४५)

स्वेदजननम् । उष्णोदककर्म ।

स्वेदन ।

Diaphoretic.

स्वेदकृत् (सु. चि. २४.८६)

स्वेदजनन: ।

स्वेदजनन ।

स्वेदजननी (च. सू. २७.२५०)

स्वेदं जनयतीति, यथोक्तं पेयागुणे— 'क्षुत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगज्वरापहा ।
स्वेदाग्निजननी पेया वातवर्चोऽनुलोमनी ॥' इति ।

स्वेद लाने वाली ।

Diaphoretic.

स्वेदनम् (च. सू. २२.४)

'स्तम्भगौरवशीतघ्नं स्वेदनं स्वेदकारकम्' (च. सू. २२.११) । स्वेदकारकं घर्मकारकम् (चक्र०) ।

स्वेदजनन ।

Diaphoretic.

स्वेदप्रदम् (च. चि. ३.२४९)

स्वेदजननम् ।

स्वेदन ।

स्वेदापनयनम् (च. सू. २५.४०)

स्वेदहरम्, यथा— 'लामज्जकोशीरं दाहत्वग्दोष-स्वेदापनयनप्रलेपनानाम्' इति ।

स्वेद दूर करने वाला ।

Anti-diaphoretic.

स्वेदापह: (च. सू. २६.४३(४))

स्वेदहरम् । कटुरसकर्म ।

स्वेदनाशक ।

स्वेदास्राव: (सु. चि. ३२.२३)

स्वेदस्य आ समन्तात् स्राव: प्रवृत्ति: ।

स्वेद की प्रवृत्ति ।

Sweating.

स्वेदी (अ. हृ. सू. ६.२८)

स्वेदजनन:, यथा मण्डगुणे— 'स्रोतोमार्दवकृत् स्वेदी सन्धुक्षयति चानलम्' इति ।

स्वेदजनन ।

स्वेदोपग: (च. सू. ४.८)

स्वेदने सहायभूत: । स्वेदनोपगो महाकषायो यथा— 'शोभाञ्जनकैरण्डार्कवृश्चीरपुनर्नवायवतिलकुलत्थ माषबदराणीति दशेमानि स्वेदोपगानि भवन्ति' इति ।

स्वेदन में सहयोगी ।

Co-diaphoretics.

हनुविशोधनम् (सु. चि. २४.२२)

हनुं विशोधयतीति । ताम्बूलकर्म ।

हनु का शोधक

Cleansing jaw.

हनुशूलघ्नम् (सु. चि. २४.२९)

हन्वो: शूलं हन्तीति, हनुशूलहरम् ।

हनुशूलनाशक ।

Relieving pain in jaw.

हरिलोमनिवारण: (च. चि. २६.२६९)

हरिलोमानि कपिललोमानि निवारयतीति, यथा— 'क्षीरं प्रियालयष्ट्याह्वे जीवकाद्यो गणस्तिला: ।
कृष्णा वक्त्रे प्रलेप: स्याद्धरिलोमनिवारण: ॥' इति ।

भूरे बालों को दूर करने वाला ।

Eliminating grey hairs.

हर्ष: (च. चि. २४.६१)

१. उत्साह: कायिक: (चक्र०) । मद्यकर्म ।

उत्साह । Enthusiasm.

२. सङ्कल्पपूर्वकशुक्रोद्रेकध्वजोच्छ्रायादिकरीच्छा (चक्र०, च. चि. २.४.४८), व्यवायनिमित्त-शक्तिमूलञ्च हर्ष: । यथोक्तं— 'देहसत्त्वबलापेक्षी हर्ष:, शक्तिश्च हर्षजा' इति (च. चि. २.४.४५) ।

Sexual urge leading to erection of penis etc.

हर्षणम् (च. सू. ५.९७, चि० २.४.३६)

प्रफुल्लताकरम्, यथोक्तं वृष्यलक्षणे—'हर्षणं मनसश्चैव सर्वं तद् वृष्यमुच्यते ॥' इति ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

हर्षदायक।
Exhilarating.

हिक्काघ्नी (च. चि. २३.९७)
हिक्कानाशनी, यथा— 'बृहतीद्वयाढकीपत्र-धूमवर्तिस्तु हिक्काघ्नी' इति।
हिक्कानाशक।
Removing hiccough.

हिक्कानिग्रहणः (च. सू. ४.८)
हिक्काहरः। हिक्कानिग्रहणो महाकषायो यथा— 'शटीपुष्करमूलबदरबीजकण्टकारिकाबृहतीवृक्ष-रुहाभयापिप्पलीदुरालभाकुलीरशृङ्ग्य इति दशेमानि हिक्कानिग्रहणानि भवन्ति' इति।
हिक्का को रोकने वाला।
Checking hiccough, anti-hiccough.

हिक्कानुत् (च. चि. १७.१०९)
हिक्काहरम्।
हिक्कानाशक।

हिक्काप्रच्यावनाः (च. चि. १७.१३७)
हिक्कानाशनाः।
हिक्कानाशक।

हितः (च. चि. २६.८)
हित इत्यायतावनपकारी। (चक्र०)
हितकर।
Wholesome.

हितम् (च. सू. २५.३३)
१. धातुसाम्यकरम्, यथोक्तं— 'यदाहारजात-मग्निवेश! समांश्चैव शरीरधातून् प्रकृतौ स्थापयति विषमांश्च समीकरोतीत्येतद्धितं विद्धि।' इति।
धातुसाम्यकर। Promoting equilibrium of dhātus.
२. आयुषो भेदः—'हिताहितं सुखं दुःखमिति' (च. सू. १.४१, ३०.२४)।
हितकर आयु। Wholesome life.

हिमस्पर्शम् (अ. हृ. चि. १.१३२)
स्पर्शतः शीतम्, यथा काञ्जिकादि।
स्पर्श में शीत।
Cold in touch.

हृत्कण्ठकर्षणम् (च. क. ७.९)
हृदयं कण्ठञ्च कर्षतीति, हृत्कण्ठावरोधकर-मित्यर्थः।
हृदय और कण्ठ को खींचने वाला।
Causing spasm in heart and throat.

हृद्गदघ्नम् (च. चि. २६.८२)
हृद्रोगहरम्।
हृद्रोगनाशक।
Alleviating heart-disease.

हृच्छूलघ्नम् (च. चि. ८.१४४)
हृदयशूलहरम्।
हृदयशूलनाशक।
Relieving cardiac pain.

हृत्पीडनः (च. सू. २६.४३)
हृदये पीडां जनयतीति। कषायरसस्यात्युपयुज्य-मानस्य कर्म।
हृदयशूलकारक।
Causing cardiac pain.

हृत्संप्रबोधनम् (च. चि. १०.१४)
प्रबोधनमिति दोषविरहितत्वेन सम्यक् स्वव्यापारकरणम्। (चक्रः)
हृदय को जाग्रत करने वाला।
Awakening heart (restoring its normal functioning).

हृदयपरिदहनः (च. सू. २६.४३(२))
हृदयं परिदहति तत्र दाहं जनयतीति। अत्युपयुज्यमानस्याम्लरसस्य कर्म।
हृदय में दाह करने वाला।
Causing burning in cardiac region.

हृदयप्रियाः (सु. सू. ४६.४०७)
हृद्याः, रुचिकरा इत्यर्थः।
रुचिकर। Relishing.

हृदयावरणम् (च. चि. २३.३६,४६)
हृदयमावृणोति रक्षितुमाघातादिति। हृदयरक्षाकर-मौषधमिति चक्रः; हृदयप्रच्छादनं हृदयरक्षाकारिभिः विषघ्नधारणादिभिरिति डल्हणः।
विषोपक्रमविशेषः।
Heart-Protecting.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

हृदयोपघातकरः (च. वि. १.१७)

हृद्विकारजनकः ।

हृदयरोगजनक ।

Causing cardiac disorders.

हृद्यम् (च. सू. २७.३०१)

१. रुच्यम् । अम्लं हृद्यानाम् (च. सू. २५.४०)

रुचिकर । Palatable.

२. हृदयाय हितम् (च. सू. ३०.१४)

हृद्यो महाकषायो यथा— 'आम्राम्रातकलिकुचकरमर्दवृक्षाम्लाम्लवेतसकुवलबदरदाडिममातुलुङ्गानीति दशेमानि हृद्यानि भवन्ति' इति ।

हृदय के लिए हितकर । Wholesome for heart.

हृद्विशोधनम् (च. चि. २३.२३९)

हृदयं विशोधयतीति, हृद्विशुद्धिकरमित्यर्थः, यथा विषचिकित्सिते—'सूक्ष्मं ताम्ररजस्तस्मै सक्षौद्रं हृद्विशोधनम्' इति ।

हृदय का शोधक ।

Cleansing heart.

ह्लादनम् (सु. सू. ४१.४ (२))

सुखोत्पादनम् (ड०) । आप्यद्रव्यकर्म ।

आह्लादकर ।

Pleasing.

ह्लादि (सु. सू. ४५.१३२)

सुखकारि । (ड०)

आह्लादजनक ।

द्रव्याश्रितानां शीतोष्णप्रभृतीनां गुणात्मनाम् ।
सकर्मकमिदं काण्डं द्वितीयं पूर्णतां गतम् ॥

इति प्रियव्रतशर्मकृते द्रव्यगुणकोषे गुणकाण्डं सकर्मकं द्वितीयम् ॥२ ॥

द्रव्याणां बहुनामधेयनिकरः पर्यायपर्याकुलो
यत्रास्ते सगुणो निरुक्तिसहितः सत्कर्मभिश्चान्वितः ।
आचार्यः कृतवान् यमात्मरतये रामावतारात्मजः
कोषस्तोषकरः सतां मतिमतां भूयात्स लोकप्रियः ॥
गुणबाणखनेत्राब्दे विक्रमीये प्रियव्रतः ।
प्रणीतवानिमं कोषं वाराणस्यां निजास्पदे ॥



Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Prof. P. V. Sharma is well known for his valuable contributions in the field of Āyurveda. For the last five decades he has been writing on various aspects of Āyurveda-literary as well as scientific, conceptual as well as historical.

Born on Ist. November 1920 in a small village Mustafapur near Patna in the family of traditional Vaidyas he obtained highest degrees in Āyurveda and Sanskrit from the Banaras Hindu University and held highest academic and administrative positions in B.H.U. and Bihar Govt. He retired in 1980 after having served his alma mater as Professor and Head, Department of Dravyaguna; Director, Postgraduate Institute of Indian Medicine and Dean, Faculty of Indian Medicine.

Prof. Sharma has been participating in international conferences abroad and has been associated with several committees on Āyurveda on national level. He has authored 45 books and has about 450 published papers to his credit.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Kashi Ayurveda Series-17

Cakrapāṇidatta's

CAKRADATTA

Edited and translated into English
by
Prof. Priya Vrat Sharma

Cakradatta, also known as 'Cikitsāsaṅgraha' or 'Cakrasaṅgraha' is a popular text on Ayurvedic Medicine by Cakrapāṇidatta, the illustrious commentator on the saṃhitās of Caraka and Suśruta. It is of historical importance because it has documented the system of medicine prevalent during the Pāla Kingdom. Almost all the later works are based on this ancient work. Uptill now there was no any book in English on Ayurvedic Medicine. This edition would serve this purpose as it contains theories and practices of Ayurvedic Medicine describing all the diseases with principles of treatment, single drug remedies and compound formulations used therein. In the end, an appendix containing the medicinal plants used in the text along with botanical names has been given. An exhaustive introduction deals with the historical informations about the author and the main features of the text.

The book would be useful for teachers, students and research scholars and general physicians.

(1994) Rs. 800.00

CHAUKHAMBHA PUBLISHERS
A HOUSE OF AYURVEDIC AND INDOLOGICAL BOOKS
K. 37/109, Gopal Mandir Lane,
VARANASI - 221001 (India)

Branch ↦ **CHAUKHAMBHA ORIENTALIA**
Bungalow Road, 9 U.B., Jawahar Nagar
(Near Kirorimal College)
DELHI - 110007 (India)
Phone 2911617, 238790

Bharatiya Vidya Bhavan, New Delhi Collection